कृशदुर्ब्बलभीरूणां नाड़ी मर्म्माश्रिता च या।
क्षारसूत्रेण तां छिन्द्यान्नतु शस्त्रेण बुद्धिमान् ॥
एषण्या गतिमन्विष्य क्षारसूत्रानुसारिणीम्।
सूचीं निदध्याद्गत्यन्ते तथोन्नम्याशु निर्हरेत् ॥
सूत्रस्यान्तं समानीय गाढ़बन्धं समाचरेत्।
ततः क्षारबलं वीक्ष्य सूत्रमन्यत् प्रवेशयेत् ॥
क्षाराक्तं मतिमान् वैद्यो यावन्न छिद्यते गतिः।
भगन्दरेऽप्येष विधिः कार्य्यो वैद्येन जानता ॥
अर्ब्बुदादिषु चोत्क्षिप्य मूले सूचं निधापयेत्।
सूचीभिर्यववक्त्राभिराचितं वा समन्ततः।
मूले सूत्रेण बध्नीयाच्छिन्ने चापचरेद्व्रणम् ॥ १६ ॥

कृशेत्यादि। चशब्दः समुच्चयार्थः, अकृशादीनामपि या नाड़ी मर्म्माश्रितेत्यर्थः। क्षारसूत्रेण च्छेदनप्रकारमुपदिदिक्षन्नाह एषण्येति। 'सू० ११ अ०' उक्तं क्षारसूत्रमनुसारयतीति क्षारसूत्रानुसारिणी। गत्यन्ते नाड़ीसीमायामुन्नम्योन्मुखीकृत्य निर्हरेद्बहिराहरेत्। क्षारबलं सूत्रार्पितक्षारदौर्ब्बल्यम्। अत्र सूचीं निदध्याद्गत्यन्त इति सामान्येनोक्तेऽप्यत्यायतायां नाड्यां विशालव्रणभयादन्तरान्तरा क्षारसूत्रेण च्छेत्तुमुपदिशन्त्याचार्य्या यथेतरत्र तथाविधामायतां नाड़ीं शस्त्रेणेति सुधियः शृणुध्वम्। भगन्दर इति। भगन्दरोऽत्र न्याय्यतया कृशादीनामेव प्रत्येतव्यः। प्रसङ्गाद्विधिमिममर्ब्बुदाधिमांसप्रभृतिष्वतिदिशति अर्ब्बुदादिष्विति। वा शब्दोयमवधारणार्थः। च शब्देनेह विशिनष्टि उत्क्षिप्येति। उत्क्षिप्य दाहातिक्रमभयादनागुन्न-

या द्विव्रणीयेऽभिहितास्तु वर्त्त्यस्ताः
सर्व्वनाडीषु भिषग्विदध्यात् ॥ १७ ॥
घोण्टाफलत्वग्लवणानि लाक्षा पूगीफलं वा लवणञ्च पत्रम् ॥
स्नुह्यर्कदुग्धेन तु कल्क एष वर्त्तीकृतो हन्त्यचिरेण नाडीः ॥१८
विभीतकाम्रास्थिवटप्रवाला हरेणुकाशङ्खिनिवीजभस्म।
वाराहिकन्दश्च तथा प्रदेया नाडीषु तैलेन च मिश्रयित्वा ॥१९
धुस्तूरजं मदनकोद्रवजञ्च वीजं
कोशातकी शुकनसा मृगभोजनी च।
अङ्कोटवीजकुसुमं गतिषु प्रयोज्यं
लाक्षोदकाहतमलासु विकृत्य चूर्णम् ॥ २० ॥

अथ चालिताभिर्यववक्राभिः सूक्ष्मस्थूलसूत्रानुसरणार्थं यवाकारमुखाभिः सूचीभिर्मूले मूलाविच्छेदेन समन्ततः आचितं ग्रथितं यथा स्यात्तथैव सूत्रं प्रसृतं क्षारसूत्रं निधापयेत् प्रवेशयेदित्यर्थः। सूत्रेण तेनैव बध्नीयादावेष्ट्य गाढमित्याकूतम्। अथातुरश्चेत् क्षारसूत्रजनितदुःखमपि कथञ्चिदपि सोढुं न शक्येत तर्हि कागतिरित्याहुरिति। घोण्टेत्यादि। वा शब्दोऽयं लाक्षान्तं पत्रान्तञ्च योगौ विभजते। अत्र 'घोण्टा तु पूगः' इति कोषान्तरे सत्यप्यनन्तरं पूगीफलोपयोगात् साधारणशब्दविशेषाच्च घोण्टाफलपदेन पूगीफलमेवाभिप्रेयत इत्याहुः। तथाच क्रमुकगुवाकफलञ्च गुडत्वक् च सैन्धवञ्चेति घोण्टाफलत्वग्लवणानि। नेह घोण्टा बदरीति केनचिदुक्तं युक्तमनुपयोगात्। विभीतकेत्यादि। अत्र विभीतकादिभस्मानुषङ्गाद्वाराही-कन्दोऽपि भस्मीकृत एवादीयते। शङ्खिनी यवतिक्ता, व्यस्तसमस्तानामेषा-

चूर्णीकृतैरथ तिमिश्रितमेभिरेव
तैलं प्रयुक्तमचिरेण गतिं निहन्ति ।
एष्वेव मूत्रसहितेषु विधाय तैलं
तत्साधितं गतिमपोहति सप्तरात्रात् ॥ २१ ॥
पिण्डीतकस्य तु वराहविभावितस्य
मूलेषु कन्दशकलेषु च सौवहेषु ।
तैलं कृतं गतिमपोहति शीघ्रमेतत्
कन्देषु चामरवरायुधसाह्वयेषु ॥ २२ ॥
भल्लातकार्कमरिचैर्लवणोत्तमेन
सिद्धं विडङ्गरजनीद्वयचित्रकैश्च ।

मुपयोगः साधिष्ठः । धुस्तूरेत्यादि । कोद्रवो धान्यभेदः "कोदो" इति प्राकृताः कथयन्ति । शुकनासा श्योनाकः, मृगभोजनी इन्द्रवारुणी महो-ठोनाम 'भोकड़ा' इत्यभिधीयते । चूर्णमिति क्रियाविशेषणात् चूर्णं विकृत्य चूर्णीकृत्येत्यर्थः । एष्वित्यादि । एषु धुस्तूरबीजादिषु तैलं विधाय तत् साधितं लाक्षोदकशोधितामित्यर्थः । "साधितः शोधितोऽपिच' इति शब्द-रत्नावली । अत्र धुस्तूरबीजादीनां कल्को गोमूत्रं चतुर्गुणं देयमित्यु-पदेशः ॥ १६—२१ ॥

तैलत्रितयमुपदिदिक्षति पिण्डीतकस्येत्यादिना । पिण्डीतको मदनः वराहस्तु वाराहीकन्दः । सुरसानामौषधिः 'गोयालिया' इति परिचीयते । तस्याः एतानि सौवहानि । अत्र कन्दशकलेष्विति निर्देशात् पादिर्का कल्कत्वेन गृहीतं कन्दं खण्डयित्वा तैले विभर्जयन्ति कुशलाः । एतेनैव शेषः श्लोकपादोऽपि व्याख्यातप्रायः । वज्रेण समान आह्वयो येषां ते अमर-

श्यामार्कवत्स च रसेन निहन्ति तैलं
नाडीं कफानिलकृतामपचीं व्रणांश्च ॥ २३ ॥

स्तन्ये गते विकृतिमाशु भिषक् तु धात्रीं
पीतां घृतं परिणतेऽहनि वामयेत् तु ।
निम्बोदकेन मधुमागधिकायुतेन
वान्तागतेऽहनि च मुद्गरसाशना स्यात् ॥ २४ ॥

एवं त्र्यहं चतुरहं षडहं वमेद्वा
सर्पिः पिबेत् त्रिफलया सह संयुतं वा ॥ २५ ॥

भार्गीं वचामतिविषां सुरदारु पाठां
मुस्तादिकं मधुरसां कटुरोहिणीञ्च ।
धात्री पिबेत् तु पयसः परिशोधनार्थ-
मारग्वधादिषु वरं मधुना कषायम् ॥ २६ ॥

सामान्यमेतदुपदिष्टमतो विशेषाद्-
दोषान् पयोनिपतितान् शमयेद् यथास्वम् ।
रोगं स्तनोत्थितमवेक्ष्य भिषग्विदध्यात्
यद्विद्रधावभिहितं बहुशो विधानम् ॥ २७ ॥

वराहुकसदृश्या स्ते च काष्ठालुकेभ्यो न भिद्यन्ते तदभावेतु 'शाकरकन्द' इति समाख्यस्यैव व्यवहारो दृश्यते । भल्लातकेत्यादि । यस्तैलं सिद्धं स्यात् हन्तीति योजना । अत्र भल्लातकादीनां चित्रकान्तानां कल्कः, मार्कवो भृङ्गराजस्तस्य रसस्तु चतुर्गुणः । स्तन्य इत्यादि । वान्तमागतं यत्र तस्मिन् वान्तागते ।

सम्पच्यमानमपि तन्तु विनोपनाहैः
सम्भोजनेन खलु पाचयितुं यतेत।
शीघ्रं स्तनो हि मृदुमांसतयोपनद्धः
सर्व्वं प्रकोथमुपयात्यवदीर्य्यते च ॥ २८ ॥
पक्वे च दुग्धहरिणीः परिहृत्य नाड़ीः
कृष्णाश्च चूचुकयुगं विदधीत शस्त्रम्।
आमे विदह्यति तथैव गते च पाकं
धात्र्याः स्तनौ सततमेव च निर्द्दुहीत ॥ २९ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने-
विसर्प-नाड़ीस्तनरोगचिकित्सितं नाम
सप्तदशोऽध्यायः ॥ १७ ॥

मुस्तादिरारग्वधादिश्च सू० ३८ अ० द्रष्टव्यौ। वरमभीष्टं बलाबलविशेषा-च्छीतं फाण्टं शृतं वेति यावत्। उपनाहो मिश्रकोक्तैः पाचनौषधैः प्रलिप्तः। दुग्धहरिणीः स्तन्याभिवाहिनीः परिहृत्य कृजुमस्त्रोपयोगेनेति शेषः। परि-शिष्टं निगदव्याख्यातम् ॥ २२—२९ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये चिकित्सितस्थाने विसर्पनाड़ीस्तनरोगचिकित्सितं नामसप्तदशोऽध्यायः।

अष्टादशोऽध्यायः ।

अथातो ग्रन्थ्यपच्यर्बुदगलगण्डचिकित्सितं व्याख्यास्यामः ॥१

ग्रन्थिष्वथामेषु भिषग्विदध्याच्छोफक्रियायां विहितं विधिज्ञः ।
रक्षोघ्नलक्ष्मापि नरस्य नित्यं तद्रचितं व्याधिबलं निहन्ति ॥ २ ॥

तैलं पिबेत् सर्पिरथो द्वयं वा दत्त्वा वसां वा त्रिवृतं विदध्यात् ।
अपेहिवातादशमूलसिद्धं वैद्यश्चतुःस्नेहमथो द्वयं वा ॥ ३ ॥

सम्प्रति क्रमागतं ग्रन्थ्यादिचिकित्सितमधिकरोति अथात इत्यादिना ॥ १ ॥

ग्रन्थिष्वित्यादि । शोफक्रियायां; द्विव्रणीयोक्तामशोफचिकित्सायामित्यर्थः । अस्यामामावस्थायां प्रतिकृताश्चेन्न विलीयन्ते तर्हि का गतिरित्याह तैलमिति । अथो इति निपातः पक्षान्तरमाशंसति, सर्पिर्वेत्यर्थः । वृतेः क्विप् वृत् त्रिभिरवयवैर्वर्त्तते इति त्रिवृच्छब्दो ह्यायुर्वेदे मिलितस्नेहत्रयमभिधत्ते यथा "तासां त्रिवृतमेकैकां करोति" इति श्रुतौ मिलितं तेजोजलान्नं तदिदं प्राग्नुतमुक्तं दत्त्वेति । नन्वसौ पुनः स्नेहः प्रभवति परिकरबन्धेन बलवन्तं व्याधिमुपशमयितुमित्यौषधसिद्धं स्नेहमुपयुङ्क्ते अपेहीति । अपेहि वात ! इत्येवं यामवाप्य भिषजो भाषन्ते सा प्रसारण्यपरपर्य्याया अपेहिवाता नाम, अपेहिद्वितीयेत्यादिवत् मयूरव्यंसकादिषु द्रष्टव्या । तया दशमूलेन च सिद्धमपेहिवातादशमूलसिद्धम् । अत्र वा शब्देनौपयोगिकतया त्रिवृतं स्नेहपदमारोपयति ॥ २—३ ॥

हिंस्राथ रोहिण्यमृताथ भार्गी श्योनाककिल्वागुरुकृष्णगन्धाः ।
गोजी च पिष्टा सह तालपत्र्या ग्रन्थौ विधेयोऽनिलजे प्रलेपः ॥
स्वेदोपनाहान् विविधांश्च कुर्य्यात् तथा प्रसिद्धानपरांश्च लेपान् ।
विदार्य्य वा पक्वमपोह्य पूयं प्रक्षाल्य बिल्वार्कनरेन्द्रतोयैः ॥
तिलैः सपञ्चाङ्गुलपत्रमिश्रैः संशोधयेत् सैन्धवसम्प्रयुक्तैः ।
शुद्धं व्रणं वाप्युपरोपयेयुस्तैलेन रास्नासरलान्वितेन ॥
विडङ्गयष्टीमधुकामृताभिः सिद्धेन वा क्षीरसमन्वितेन ॥ ४ ॥
जलौकसः पित्तकृते हितास्तु क्षीरोदकाभ्यां परिषेचनञ्च ।
काकोलिवर्गस्य च शीतलानि पिबेत् कषायाणि सशर्कराणि ॥
द्राक्षारसेनेक्षुरसेन वापि चूर्णं पिबेच्चापि हरीतकीनाम् ।
मधूकजम्ब्वर्ज्जुनवेतसानां त्वग्भिः प्रदेहानवचारयेत ॥
सशर्करैर्वा तृणशून्यकान्दैर्हिंस्रादभीक्ष्णं मुचुकुन्दजैर्वा ॥ ५ ॥
विदार्य्य वा पक्वमपोह्य पूयं धावेत् कषायेण वनस्पतीनाम् ।
तिलैः सयष्टीमधुकैर्विशोध्य सर्पिः प्रयोज्यं मधुरैर्विपक्वम् ॥६॥

हिंस्रेत्यादि । हिंस्रानामौषधिः "काँटागर" इत्यभिधीयते । कृष्णगन्धा शोभाञ्जनः । गोजीह्वा शाखोटकः, तालपत्री तालमूली । स्वेदेत्यादि । कुर्य्याद्द्विव्रणीयमभिसमीक्ष्य तिलोमाप्रभृतिभिरित्याकूतम् । प्रसिद्धानिति । मिश्रकोक्तेनैव । नरेन्द्रः सम्याकस्तस्य पत्रमत्र ग्राह्यम् । पञ्चाङ्गुल एरण्डः । पित्तजानधिकरोति जलौकस इति । क्षीरोदकाभ्यां समघृताभ्यामेव । कृष्णपूर्व्वं मञ्जिष्ठा वनस्पतयोऽत्र प्राधान्यात्तु क्षीरिद्रुमा एव प्रत्येतव्याः । मधुरैः

हृतेषु दोषेषु यथानुपूर्व्या ग्रन्थौ भिषक् श्लेष्मसमुत्थिते तु ।
स्विन्नस्य विम्लापनमेव कुर्य्यादङ्गुष्ठ-लोहोपल-वेणुदण्डैः ॥
विकङ्कतारग्वधकाकनन्तीकाकादनीतापसवृक्षमूलैः ।
आलेपयेत् पिण्डफलार्कभार्गीकरञ्जकालामदनैश्च विद्वान् ॥७॥
अमर्म्मजातं सममप्रयातमपक्वमेवापहरेद्विदार्य्य ।
दहेत् स्थिते वासृजि सिद्धकर्म्मा सद्यःक्षतोक्तञ्च विधिं विदध्यात् ॥
या मांसकन्द्यः कठिना वृहत्यस्ताश्चैव योज्यश्च विधिर्विधिज्ञैः ।
शस्त्रेण वापाट्य सुपक्वमाशु प्रक्षालयेत् पथ्यतमैः कषायैः ॥८॥
संशोधनैस्तञ्च विशोधयेयुः क्षारोत्तरैः क्षौद्रघृतप्रगाढैः ।
शुद्धे च तैलञ्च विचारणीयं विडङ्गपाठारजनीविपक्वम् ॥ ९ ॥
मेदःसमुत्थे तिलकल्कदिग्धं दत्त्वोपरिष्टाद्‌द्विगुणं पटान्तम् ।
कृताश्मतप्तेन मुहुः प्रमृज्याल्लोहेन धीमान् दहनं विताप ॥

सू० ४२ अ० उक्तैर्मधुरवर्गैरित्यर्थः । हृतेष्वित्यादि । विकङ्कतो नाम 'बैचि' इति 'बाँफल' इति चाख्यायते । काकनन्ती गुञ्जा, काकादनी तु श्वेत-गुञ्जा तापसवृक्षस्त्विङ्गुदी, पिण्डफला कटुतुम्बी, काला कृष्णत्रिवृत् ॥४-७॥

अमर्म्मेत्यादि । वल्प्याः कन्दाः कन्द्यः वृहत्यो महत्यश्चेत्यर्थः । पथ्य-तमैर्व्रणोपगत्वेन तैः न्यग्रोधारग्वधादिगणजातजातैरित्यभिसन्धिः । क्षारोत्तरैः सू० ११ अ० उपदिष्टक्षारानुविद्धैः, संशोधनैर्मिश्रकोक्तैः संशोधनौषधैरित्यर्थः । विडङ्गादितैलमिदं कल्कमात्रसाध्यमित्याहुः । मेदोजं पुनः प्रतीकारम्

प्रलिप्य दाह्यमथ लाक्षया वा प्रतप्तया स्वेदनमत्र कार्य्यम् ।
निपात्य वा शस्त्रमपोह्य मेदो दहेत् सुपक्वान्यथवा विदार्य्य ॥
प्रक्षाल्य मूत्रेण तिलैः सुपिष्टैः सुवर्च्चिकाद्यैर्हरितालमिश्रैः ।
ससैन्धवैः क्षौद्रघृतप्रगाढैः क्षारोत्तरैरेनमभिप्रशोध्य ॥ १० ॥
तैलं विदध्याद्धिकरञ्जगुञ्जावंशावलेखेङ्गुदमूलसिद्धम् ॥ ११ ॥
जीमूतकैः कोषवतीफलैश्च दन्तीद्रवन्तीत्रिवृतासु चैव ।
सर्पिः कृतं हन्त्यपचीं प्रवृद्धां द्विधाप्रवृत्तं तदुदारवीर्य्यम् ॥१२॥
निर्गुण्डिजातीबर्हिष्ठयुक्तं जीमूतकं माक्षिकसैन्धवाढ्यम् ।
अभिप्रतप्तं वमनं प्रगाढं दुष्टापचीषूत्तममादिशन्ति ॥ १३ ॥

चिकित्सिते । भेद इत्यादि । दिग्धं लिप्तं द्विगुणं द्वाभ्यां गुणितं तिलकल्कशो-पर्य्युपर्य्यात विन्यस्तं द्विकमित्येतत् । पटान्तं वस्त्रखण्डं अन्तोऽवयवश्चेति पर्य्यायौ । दहनं हितायेति वाक्यभेदाच्चकारोऽध्याहार्य्यः, न तावदध्याहारोऽयमदृष्टपरत्वेन न्यूनतामावंसतीत्याशङ्कितव्यम् । शस्त्रदेव पार्श्वाभिघातादौ चिकित्सितान्तः परं तथा दर्शनात् । तत्राच हिताय दहनञ्च कुर्य्यादिति योजना । अचाविशेषेऽपि क्षुद्रे यन्त्रायुक्तेन विधिना प्रयुञ्ज्यात् महति च ततह्रीतुपकालेनैव दहनं कुर्य्यादित्यवधेयम् । सुवर्चिकाद्यैः सू० ४६ अ० उक्तैः कर्णिकाक्षारादिभिः । अभि सर्व्वतोभावेनेत्यर्थः । वंशावलेखो वंशत्वक् । अत्र मूलं चतुर्णां शिष्टानि तु कल्क एव । जीमूतकोघोषकभेदः 'धूमा' इति परिचीयते । कोषवती घोषकः । द्विधाप्रवृत्तं बाह्याभ्यन्तरतः प्रयुक्तम् । निर्गुण्डीत्यादि । बर्हिष्ठो बर्हिः ह्रीवेरमित्यनर्थान्तरम् ॥ ८—१३ ॥

कैटर्यनिम्बीकरवीरसिद्धं तैलं हितं मूर्द्धविरेचनञ्च ।
आस्फोटकस्य स्वरसेन सिद्धं तैलं हितं नस्यविरेचनेषु ॥ १४ ॥
मधूकसारश्च हितोऽवपीड़े फलानि शिग्रोः खरमञ्जरेर्वा ॥१५॥
ग्रन्थीनमर्म्मप्रभवानपक्वानुद्धृत्य चाग्निं विदधीत पश्चात् ।
क्षारेण वापि प्रतिसारयेत् तु संलिख्य शस्त्रेण यथोपदेशम् ॥१६
पार्ष्णिं प्रति द्वादश चाङ्गुलानि मित्वेन्द्रवस्तिं परिवर्ज्य धीमान् ।
विदार्य्य मत्स्याण्डनिभानि वैद्यो निष्कृष्य जालान्यनलं विदध्यात् १७
आगुल्फकर्णात् सुमितस्य जन्तोस्तस्याष्टभागं खुड़काद्विभज्य ।
घोणार्द्धवेऽधः सुरराजवस्तेर्हित्वाक्षिमात्रन्त्वपरे वदन्ति ॥ १८ ॥

कैटर्येत्यादि। कैटर्यो निम्ब। आस्फोटकः ‘शेफोड़ा’ इत्युपदिश्यते। खरमञ्जरिरपामार्गः। पार्ष्णिमित्यादि। पार्ष्णिं गुल्फस्याधोभागं प्रति लक्षीकृत्य पार्ष्णित इति यावत्। द्वादश चाङ्गुलानीति। अत्र विभक्त्यर्थः परिमाणं तत्राभेदसम्बन्धेन प्रकृत्यर्थस्यान्वयः, तच्च परिच्छेद्यपरिच्छेदक-भावसम्बन्धेन विशेष्ये अन्वेति। तथाच स्वस्वद्वादशाङ्गुलरूपं यत्परिमाणं तत्परिच्छिन्नं देशमिति शाब्दबोधः। मित्वा परिच्छिद्य परिमाय, धीमान् मर्म्मपरिरक्षणकुशलः कथञ्चिच्छिन्नेषु मर्म्मसु बन्धने समुत्पन्नो वेध इन्द्रवस्ति-मांसपिण्डिकाभ्यन्तरस्थं गम्भीरानुगतं मर्म्मसमाख्यं देशविशेषं परिवर्ज्य शस्त्रेणास्पृष्ट्वा पृथक्त्वात् संरक्ष्येति यावत्, विदार्य्य भिषगौषधात् तस्मा-द्वादशाङ्गुलादूर्ध्वं प्रायस्त्र्यङ्गुलमितं मांसपिण्डिकावकाशं विपाट्येत्यर्थः। अनलं विदध्यात् पुनर्वृद्धिभयादित्यभिसन्धिः। वाग्भटस्तु [illegible] सम्पादयितुम् “गुल्फेन्द्रवस्तेश्च गदान्यपार्ष्णौ” इत्याह तत्तु पुनर्निपुणं चिन्त्य-

मणिबन्धोपरिष्टाद्वा कुर्य्याद्रेखात्रयं भिषक् ।
अङ्गुल्यन्तरितं सम्यगपचीनां निवृत्तये ॥ १९ ॥

सूर्य्यस्य काले प्रचलाककाकगोधाहिकूर्म्मप्रभवां मसीन्तु ।
दद्याच्च तैलेन सहेङ्गुदीनां यद्वक्ष्यते श्लीपदिनाञ्च तैलम् ॥
विरेचनं धूममुपाददीत भवेच्च नित्यं यवमुद्गभोजी । २० ॥

मेव । अत्राविशेषेऽपि विधिरयं वङ्क्षणगतास्वेवापचीषूपयोगमेतीत्यध्यवसितव्यम् । पक्षान्तरमुपन्यसति आ गुल्फेति । तुकारेण विदारणस्थानं विशिनष्टि । तथाच गुल्फं कर्णञ्चाभिव्याप्येत्या गुल्फकर्णात् सुमितस्य सम्यङ्मापितस्य तस्य जङ्घोरातुरस्याष्टभागमष्टमभागं खुड़कादुगुल्फात् न चार्थोऽयमप्रसिद्ध: "वातकण्टक इत्येष विज्ञेय:खुड़काश्रित:" इति तदर्थे प्रयोगदर्शनात् । विभज्य परित्यज्य तु पुन: परिमाय नासाया आर्ज्जवमिवार्ज्जवमस्येति घोणार्ज्जवं मांसपिण्डिका जानुसन्धेरध:पृष्ठगतोन्नतप्रदेश इति यावत् । तस्मिन् घोणार्ज्जवे सुरराजवस्तेरिन्द्रवस्तेरधोऽस्थिमात्रं "द्व्यङ्गुलं सर्व्वत: सार्द्धं भित्त्वाङ्गयवबुद्बुदम्" इत्यनागताविक्षणात् सार्द्धं द्व्यङ्गुलमात्रं छित्वा अपरे वदन्ति प्रकृतत्वात् विदार्य्य मत्स्याण्डनिभानि जालानि निष्कृष्यानन्तं विदध्यादित्येवेति ज्ञेयम् । घोणर्ज्जुवेध इति पाठेतु सुरराजवस्तितोऽस्थिमात्रं छित्वा घोणासाम्यात् घोणा मांसपिण्डिका तत्र ऋजुवेध: कार्य्य: इत्येवं व्याख्येयम् । मणीत्यादि । कुर्य्यादग्नितप्तया शलाकयेति शेष: । अपचीनां नीवादिगतानामित्येव । सूर्य्यस्येत्यादि । सूर्य्यस्य काले चि० १ अ० अस्मानां स्थिरमांसानामित्यादिग्रीष्मायां सूर्य्योपयोगावस्थायामित्यर्थ: । प्रचलाक: शिखण्डकोमयूरपिच्छमित्यनर्थान्तरम् । काकस्त्वत्र अयं मृत एवा-

कर्कारुकैर्व्वारुकनारिकेलप्रियालपञ्चाङ्गुलबीजचूर्णैः ॥ २१ ॥
वातार्ब्बुदं क्षीरघृताम्बुसिद्धैरुष्णैः सतैलैरुपनाहयेत् तु ।
कुर्य्याच्च मुख्यान्युपनाहनानि सिद्धैश्च मांसैरथ वेशवारैः ॥२२॥
स्वेदं विदध्यात् कुशलस्तु नाड्या शृङ्गेण रक्तं बहुशो हरेच्च ।
वातघ्ननिर्य्यूहपयोऽम्लभागैः सिद्धं शताह्वं त्रिवृतं पिबेद्वा ॥२३
स्वेदोपनाहा मृदवस्तु पथ्याः पित्तार्ब्बुदे कायविरेचनञ्च ।
विघृष्य चोडुम्बरशाकगोजीपत्रैर्भृशं क्षौद्रयुतैः प्रलिम्पेत् ॥
श्लक्ष्णीकृतैः सर्ज्जरसप्रियङ्गुपत्तङ्गरोध्राञ्जनयष्टिकाह्वैः ॥ २४ ॥
विस्राव्य चारग्वधगोजिसोमाः
श्यामा च योज्याः कुशलेन लेपे ॥ २५ ॥

देयौ वाग्भट संवादमनुनिशम्य । यत्तैलं वक्ष्यते तेनापि सहेत्यर्थः विरेचनं धूमं वैरेचनिकं धूमं तदुपयोगविधिस्तु चि० ४० अ० निवेदयिष्यते ॥१४–२०॥

एतावन्तोह्यलमनल्पबुद्धीनामनुग्रहायेतरेषाञ्च व्यवहारायेति भगवान् सम्प्रधार्य्येत एव प्रक्रान्तमर्ब्बुदचिकित्सितमधिकरोति कर्कारुकेत्यादिना । कर्कारुकं कुष्माण्डफलं एर्व्वारुकं कर्कटीफलम् । बीजशब्दः प्रत्येकमभिसम्बध्यते । तथाच नारिकेलबीजपदेन यदङ्कुरे जायमाने "फोँपड़ा" इति समाख्ययाभिव्यज्यते तत्र कर्कारुकादिबीजचूर्णापेक्षयाम्बुक्षीरं चतुर्गुणं घृतन्तु पादार्द्धं दत्त्वोत्कारिकावत् पक्तव्यम् । ततः किञ्चित्तैलेन संमिश्र्योपनाहयेदित्युपदेशः । सिद्धैर्वातहरत्वेन प्रसिद्धैः, मुख्यानि वातहरद्रव्यानुविद्धत्वेन प्रधानानीत्यर्थः । वेशवारैः 'निरस्थि पिशितं पिष्टम्" इत्याद्युक्तैः । नाड़ीस्वेदविधिस्तु चि० ३२ अ० द्रष्टव्यः । अथ शृङ्गेणेति विशेषेण वातहर-

श्यामागिरिह्वाञ्जनकोरसेषु द्राक्षारसे सप्तलिकारसे च ।
घृतं पिबेत् क्षीतकसंप्रसिद्धं
पित्तार्व्वुदी तज्जठरी च जन्तुः ॥ २६ ॥
शुद्धस्य जन्तोः कफजेऽर्व्वुदे तु
रक्तेऽवसिक्ते तु ततोऽर्व्वुदं तत् ।
द्रव्याणि यान्यूर्द्धमधश्च दोषान् हरन्ति तैः कल्कघृतैः प्रदिह्यात्॥
कपोतपारावतविड्विमिश्रैः सकांस्यनीलैः शुकलाङ्गलाख्यैः ।
मूत्रैस्तु काकादनिमूलमिश्रैः क्षारप्रदिग्धैरथवा प्रदिह्यात् ॥२७
निष्पावपिण्याककुलत्थकल्कैर्मांसप्रगाढैर्दधिमस्तुयुक्तैः ।
लेपं विदध्यात् क्रिमयो यथात्र मूर्च्छन्ति मूर्च्छन्त्यथ मक्षिकाश्च॥

स्वादुपदिश्यत इति निश्चीयते "सर्व्वाणि सर्व्वैर्व्वा" इति स्मरणात् तथाच जलौकादिव्यवहारोनानुपपन्नः । वातघ्नेति । वातघ्नः सू० ३८ अ०' उक्तो वातसंशमनोवर्गः । शताख्यैः शतसंख्यकैरित्यर्थः । श्लक्ष्णीकृतैश्चिक्कणैः परमसूक्ष्मैरितियावत् । पत्तङ्गं रक्तचन्दनम् । विस्राव्येति विस्राव्य जलौकसेति शेषम् । सोमो जलं ह्रीवेरमिति यावत् श्यामा श्याममूला त्रिवृत् गिरिह्वा गिरिकर्णिका, अञ्जनकी कटुकी, सप्तलिका सातला व्यवहारस्तु 'कालादाना' इति प्रसिद्धस्यैव । क्षीतकसंप्रसिद्धं यष्टीमधुकल्कसिद्धम् । कांस्यनीलं कांस्यमलः, शुकः शिरीषः, मूत्रैर्यथालाभं गव्यादिभिरष्टाभिरेव । काकादनी गुञ्जा, क्षार प्रदिग्धैः सू० ११ अ०' उक्तक्षारानुविद्धैः प्रदिह्यादूर्ध्व सञ्जननार्थमित्याकूतम् ॥ २२ —२७ ॥

अपि,जाते पुनः किं कार्य्यमित्याह निष्पावेति । निष्पावो राजमाषः

अल्पावशिष्टे क्रिमिभिः क्षते च
लिखेत् ततोऽग्निं विदधीत पश्चात् ॥ २८ ॥
यदल्पमूलं त्रपुताम्रसीसपट्टैः समावेष्ट्य तदायसैर्वा ॥
क्षाराग्निशस्त्राण्यसकृद्विदध्यात्
प्राणानहिंसन् भिषगप्रमत्तः ॥ २९ ॥
आस्फोतजातीकरवीरपत्रैः कषायमिष्टं व्रणशोधनार्थम् ।
शुद्धे च तैलं विदधीत भार्गीविडङ्गपाठात्रिफलाविपक्वम् ॥ ३०
यदृच्छया चोपगतानि पाकं पाकक्रमेणोपचरेद्विधिज्ञः ॥ ३१ ॥
मेदोऽर्ब्बुदं स्विन्नमथो विदार्य्य विशोध्य सीव्येद्गतरक्तमाशु ।

'बरबटी' इत्याख्यायते । पिन्याकस्तिलकल्कः 'खइल' इति प्रथते । मूर्च्छन्ति प्रवृत्ता भवन्ति । लिखेत् शस्त्रेणेति शेषः । ततः पश्चादग्निं विदधीत समूलघातमुपहन्तुमित्यभिसन्धिः । शोणितसम्भूतमर्व्वुदं हि शिराधिष्ठानत्वान्निसर्गत एव प्रायेण सूक्ष्ममूलं भवति तदीदानीं प्रक्रान्तं शोणितार्व्वुदं प्रतिकारक्रमतोनिर्व्वदयन्नाह यदित्यादि । अर्व्वुदेऽस्मिन् क्षारादिकर्म्मणि कर्त्तव्ये प्राक्शोणितगतिनिरोधार्थं त्रप्वादिपट्टैरनावेष्ट्य चेन्मूलबन्धं निबध्यते तर्हि सूत्राकर्षनिकृन्तनात् परिकरबन्धेन शोणितं निर्गच्छत्यातुरमतिपातयितुं न पुनः यथावद्दृष्टाऽपि शोणितस्रुतिमाशङ्कमाना भिषजः क्षारादीनि सकृत् सकृत् पर्य्याप्तमुपयोक्तुमभीप्सन्तीत्युपपन्नं भवति त्रप्वित्यादि । एवञ्च प्राणानित्यादि विशेषणं साम्प्रतमेवेत्यवसेयम् । त्रप्वादिपदमत्र बन्धाशक्तिशिराच्छेदप्रतिबन्धिद्रव्योपलक्षणमिति गम्यते पटखण्डादिभिरप्यावेष्टनव्यवहारदर्शनात् । अनपायित्वेन युक्त्या समुन्नीतान्येतानि । मांसार्व्वुदादीनि कदाचिदकस्मात्

ततो हरिद्रागृहधूमरोध्रपतङ्गचूर्णैः समनःशिलालैः ॥
व्रणं प्रतिपाद्य मधुप्रगाढैः करञ्जतैलं विदधीत शुद्धे ॥ ३२ ॥
सशेषदोषाणि हि योऽर्व्वुदानि करोति तान्याशु पुनर्भवन्ति ।
तस्मादशेषाणि समुद्धरेत् तु
हन्युः सशेषाणि यथा हि वह्निः ॥ ३३ ॥
संस्वेद्य गण्डं पवनोत्थमादौ
नाड्यानिलघ्नौषधपत्रभङ्गैः ।
अम्लैः समूत्रैर्विविधैः पयोभि-
रुष्णैः सतैलैः पिशितैश्च विद्वान् ॥ ३४ ॥
विस्रावयेत् स्विन्नमतन्द्रितश्च शुद्धं व्रणञ्चाप्युपनाहयेत् तु ।

यद्यन्तेऽपीत्याह यद्यच्चयेति । सम्प्रति साध्येषु परिशिष्टं मेदोर्व्वुदमधिकरोति मेद इति । अथो इति निपातो विशेषणार्थः । स्विन्नं मेदोर्व्वुदमिति निष्कर्षः । सशेषेत्यादि यः करोति तस्येति योजना । परिशिष्टमतिरोहितार्थम् ॥ २८—३३ ॥

सम्प्रति शिष्टं गलगण्डप्रतीकारक्रममुपदिदिक्षति संस्वेद्येति । पत्राणां भङ्गाः खण्डानि पत्रभङ्गाः कुट्टितानि पत्राणीति यावत् । नाड्या चि० ३२अ० वक्ष्यमाणनाड्युपयोगेन । पयोऽम्लैरेभिः सतैलैर्वातहरतैलानुविद्धैः उष्णैरग्निसन्तप्तैः पिशितैः स्वेदाभिमतत्वेन वातप्रत्यनीकत्वेन च तत्तुवल्लावणकैरानूपादिमांसैः संस्वेद्य स्विन्नं सम्यक्स्वेदेनोपपन्नं तं गण्डमतन्द्रितो विस्रावणकुशलो विद्वान् बहुशो दृष्टकर्मत्वेन प्राज्ञो विस्रावयेत् स्रावेण विशोधयेत्, रसोनसूर्य्यावर्त्ताभ्यां वृषपुष्पिकाशोभाञ्जनादिभिरेवम्विधैर्व्वान्यैः

शणातसीमूलकशिग्रुकिण्वपियालमज्जानुयुतैस्तिलैस्तु ॥
कालामृताशिग्रुपुनर्नवार्कगजादिनामाकरहाटकुष्ठैः ।
एकैषिकावृश्चकतिल्वकैश्च सुराम्लपिष्टैरसकृद्विदिह्यात् ॥३५॥
तैलं पिबेच्चामृतवल्लिनिम्बहंसाह्वयावृक्षकपिप्पलीभिः ।
सिद्धं बलाभ्याञ्च सदेवदारु हिताय नित्यं गलगण्डरोगे ॥३६॥
स्वेदोपनाहैः कफसम्भवन्तु संस्वेद्य विस्रावणमेव कुर्य्यात् ।
ततोऽजगन्धातिविषाविशल्याविषाणिकाकुष्ठशुकाह्वयाभिः ।
पलाशभस्मोदकपेषिताभिर्दिह्यात् सगुञ्जाभिरशीतलाभिः ॥

स्फोटानुत्पाद्य मनाक् हरिद्राभस्ममिश्रेण शङ्खभस्मना तुत्थकादिभिर्वा प्रतिसार्य्य कशीपनसकदम्बपत्रादिभिराच्छाद्य वस्त्रपट्टेन बद्धेति शेषः । यद्य चेत् सावशेषे व्रणास्ते रोढुं निरास्रावा भवेयुस्तर्हि का गतिरित्याह शुद्धमिति । व्रणं स्फोटोत्पन्नं व्रणजातं शुद्धं 'चि० १ अ०' उक्तनिरास्रावत्वादिशुद्धव्रणलिङ्गेनानुगतं दृष्टोपनाहयेत् शणेत्यादिना वक्ष्यमाणेन भेषजेन पुनर्विस्रावयितुमित्यभिसन्धिः । शणेत्यादि । किण्वं सुराबीजं व्यवहारस्तु सुरासिक्थकस्यैव । काला कृष्णत्रिवृत् । गजादिनामा गजपिप्पली "डाबुभाभ्यामन्यतरस्याम्" इति '४ । १ । १३ पा० सू०' डाप् । करहाटो मदनः, एकैषिका श्वेतमूलात्रिवृत् , वृश्चकः कुटजः, तिल्वको लोध्रः । अत्रोपनाहयोरेतयोरुपदेशे सत्यपि वयन्तु तुल्यकाद्युपयोगेनैव विस्रावयिष्यामः । अमृतवल्ली गुडूची हंसाह्वया हंसपादीनामौषधिः 'गोयालिया' इत्यभिधीयते । तैलमिदं कल्कसाध्यमित्यवधेयम् । कफजगण्डमधिकरोति स्वेदेत्यादिना । स्वेदाद्याः 'चि० ३२ अ०' वक्ष्यमाणा उपनाहाः स्वेदोपनाहाः । विस्रावणप्रकारस्तु प्राग्वदेव द्रष्टव्यः । विशल्या दन्ती, विषाणिका, कर्कटशृङ्गी,

दशार्द्धसंख्यैर्लवणैश्च युक्तं तैलं पिबेन्मागधिकादिसिद्धम् ।
प्रच्छर्द्दनं मूर्द्धविरेचनञ्च धूमश्च वैरेचनिको हितस्तु ॥ ३७ ॥
पाकक्रमो वापि सदा विधेयो वैद्येन पाकं गतयोः कथञ्चित् ।
कटुत्रिकक्षौद्रयुताः समूत्रा भक्ष्या यवान्नानि रसाश्च मौद्गाः॥३८
सशृङ्गवेराः सपटोलनिम्बा हिताय देया गलगण्डरोगे ॥ ३९ ॥
मेदःसमुत्थे तु यथोपदिष्टां विध्येच्छिरां स्निग्धतनोर्नरस्य ।
श्यामासुधालोहपुरीषदन्तीरसाञ्जनैश्चापि हितः प्रदेहः ॥
मूत्रेण वालोड्य हिताय सारं प्रातः पिबेच्छालमहीरुहाणाम् ॥
शस्त्रेण वापाट्य विदार्य्य चैनं मेदः समुद्धृत्य हिताय सीव्येत् ।
मज्जाज्यमेदोमधुभिर्द्दहेद्वा दग्धे च सर्पिर्मधु चावचार्य्यम् ॥
कासीसतुत्थे च ततोऽत्र देये चूर्णीकृते रोचनया समेते ।
तैलेन चाभ्यज्य हिताय दद्यात् साराद्भवं गोमयजञ्च भस्म ॥
हितश्च नित्यं त्रिफलाकषायो गाढश्च बन्धो यवभोजनञ्च ॥४०

इति सुश्रुतसंहितायां चिकित्सितस्थाने
ग्रन्थ्यपच्यर्व्वुदगलगण्डचिकित्सितं
नामाष्टादशोऽध्यायः ॥ १८ ॥

शुकाह्वया शुकनासा श्योनाक इत्यनर्थान्तरम् । मागधिकादिः सू० ३८ अ० उक्तः पिप्पल्यादिः । पाकपरवर्त्तिक्रमः पाकक्रमः पाटनादिरिति यावत् ।

सारोद्भवं 'सु० १८ अ०' उक्त सालसारादि समुत्थम्। परिशिष्टं निगदव्याख्यातम् ॥ ३४—४० ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये चिकित्सितस्थाने ग्रन्थ्यपच्यर्ब्बुदगलगण्डचिकित्सितं नामाष्टादशोऽध्यायः।

एकोनविंशोऽध्यायः।

अथातो वृद्ध्युपदंशश्लीपदानां चिकित्सितं व्याख्यास्यामः ॥१

अन्त्रवृद्ध्या विना षड्या वृद्धयस्तासु वर्ज्जयेत्।
अश्वादियानं व्यायामं मैथुनं वेगनिग्रहम् ॥
अत्यासनं चङ्क्रमणमुपवासं गुरूणि च ॥ २ ॥

क्रमागतं वृद्ध्यादिचिकित्सितमधिकरोति अथात इत्यादिना ॥ १ ॥

अन्त्रेत्यादि वृद्धीनां मध्येऽन्त्रवृद्धिः सर्व्वं प्रतीकारक्रममतिक्रामतीति निरदिक्षत् "तामन्त्रवृद्धिं असाध्यामाचक्षते" इति, निर्द्देक्ष्यते च "अप्राप्त फलकोषायां वातवृद्धिक्रमोहितः" इति तदिह प्राप्तफलकोषां अन्त्रवृद्धिं प्रति न किञ्चित्कर्त्तव्यमस्तीत्यभिसन्धायाह अन्त्रवृद्ध्या विनेत्यवधेयम्, तथाचान्त्रवृद्धिशब्दोऽयमविशेषेणोपदिष्टोऽप्यप्राप्तफलकोषत्वेनावश्यं विशेषणीयः साधारणशब्दविशेषात् "यदुपक्रमे सन्दिग्धं तच्छेषान्निर्णीयते" इति हि न्यायः। न तावदेतावता नाप्राप्तफलकोषावस्थायां अन्त्रवृद्धावप्यश्वादियानादीनां प्रतिषिद्ध-

तमादितो वातहरैः स्नेहैः स्निग्धमातुरम् ।
स्विन्नञ्चैनं यथान्यायं पाययेत विरेचनम् ।
कोशाम्रतिल्वकैरण्ड-फलतैलानि वा नरम् ॥
सक्षीरं वा पिबेन्मासं तैलमेरण्डसम्भवम् ॥
ततः कालेऽनिलघ्नानां क्वाथैः कल्कैश्च बुद्धिमान् ।
निरूहयेन्निरूढञ्च भुक्तवन्तं रसौदनम् ॥
यष्टीमधुकसिद्धेन ततस्तैलेन योजयेत् ।
स्वेदोपनाहौ कुर्य्याच्च प्रदेहांश्चानिलापहान् ॥
विदग्धां पाचयित्वा वा सेवनीं परिवर्ज्जयेत् ।
भिन्द्यात् ततः प्रभिन्नायां यथोक्तं क्रममाचरेत् ॥ ३ ॥

त्वेनोपलम्भात् च इत्यनुपपन्नम्, अवामरूपावस्थोपात्तं प्राधान्यमाश्रित्योपदेशात् तथा च न कश्चिद्दोषः। आसनमतिक्रम्य वर्त्तनमत्यासनं दण्डायमानत्वादिकमित्येतत्। त्रिभिरवयवैर्हृतमेवत्रैहृतं त्रिच्छिन्नत्रैहृतमिति स्वतन्त्रसिद्धान्तः। विरेचनप्रकारं विवृणोति कोशेति। विदग्धामित्यादि। वाशब्दादविदग्धाञ्चेत्यर्थः। तत्र विदग्धां सू० ३६ चि० १अ० अभिसमीक्ष्यैत् क्षारिकादिभिः पाचयेदविदग्धाञ्च क्षारैरित्युपदेशः। तत्र क्षारपातनक्रमस्त्वत्र सुचिरं गुदं प्रविष्टश्चेति विशदं निवेदयिष्यामः। तद्यथा प्रथमन्तःप्रदेशतो ह्यवैकस्मिन् पार्श्वे, उभयत उभयोः पार्श्वयोः कनिष्ठापमितं गुदप्रदेशं काकोडुम्बरादिजैः कर्कशैः पत्रैर्विघृष्य शस्त्रेण वा विलिख्य द्वित्राणि दिनानि क्षारं पातयेत् ततः क्षारभक्षितत्वेन प्रसुप्तेऽस्मिन् देशे हंसपक्षनाडीपरिणाहां पृथुमुखीं लौहशलाकां शनैः शनैर्भ्रामयन् प्रवेशयेत्

पित्तजायामपक्वायां पित्तग्रन्थिक्रमो हितः।
पक्वां वा भेदयेच्छिन्नां शोधयेत् क्षौद्रसर्पिषा।
शुद्धायाञ्च भिषग्दद्यात् तैलं कल्कञ्च रोपणम्॥ ४॥
रक्तजायां जलौकोभिः शोणितं निर्हरेद्भिषक्।
पिबेद्विरेचनं वापि शर्कराक्षौद्रसंयुतम्।
पित्तग्रन्थिक्रमं कुर्य्यादामे पक्वे च सर्व्वदा॥ ५॥

यावन्नातुरो वेदनामनुभवेत् शोणितं वा नागच्छेत् अनुभूतायां वेदनायां शोणिते वागते पुनः क्षारं निपात्य यथावसरं कञ्चीनालं प्रवेश्य कञ्चीपत्रेणैवाच्छाद्य वस्त्रपट्टेनावेष्ट्य बध्नीयात् सर्व्वमेवं दैनन्दिनं कुर्य्यात् यावद् भिन्नान्तरावरणत्वेनान्त्रदकं सवेगं नागच्छेद्, आगते चोदके प्राग्वत् कञ्चीनालं प्रवेश्य अश्मन्तीपत्राण्यग्निसन्तप्ते पिठरे सममङ्गुलोत्सेधं विन्यस्य वस्त्रावच्छन्नेन पाणिना प्रपीड्य 'रुटी' इति प्रसिद्धं पिष्टकमिव कृत्वा कदलीपत्रोपरि विन्यस्तेन तेन सर्व्वतो वृषणमावेष्ट्य वस्त्रपट्टेन बध्नीयात् मुञ्चेच्च द्व्यहाद्व्यहाद्वा यावदारोग्यदर्शनात्। उपद्रवांश्च यथास्वं प्रतिकुर्व्वीत। आम्नायते हि "सेवनीच्छेदाद्रुजाप्रादुर्भावः" इति अ० ८ अ० तदिदमुक्तं सेवनीं परिवर्ज्जयेदित्यनुसन्धेयम्। परिवर्ज्जयेच्छस्त्रेण न स्पृशेदित्यर्थः। छिन्नणीयान्तमनतिक्रम्येति यथोक्तम्। विधिरयं मध्यबलमातुरमेव लक्षयतीति मन्यते "अन्नजां मूत्रजां हित्वा सर्व्वा वृद्धीर्भिषग्वरः। छिन्द्यात् समूलं बलिनः फले संरक्ष्य यत्नतः" इति तन्त्रान्तरीयस्मरणात् बलिन इति भुक्ति मत्वर्थीयः। प्रचुरबलस्येत्यर्थः॥ २—३॥

पित्तेत्यादि। इहापि भेदनप्रकारः प्राग्वदेव द्रष्टव्यः। रोपणं तैलं कल्कञ्च मिश्रकमभिसमीक्ष्य कल्पनीयम्। एतेन शेषं व्याख्यातप्रायम्।

वृद्धिं कफात्मिकामुष्णैर्मूत्रपिष्टैः प्रलेपयेत् ।
पीतदारुकषायञ्च पिबेन्मूत्रेण संयुतम् ॥
विम्लापनादृते वापि श्लेष्मग्रन्थिक्रमो हितः ॥
पक्वायाञ्च विभिन्नायां तैलं शोधनमिष्यते ।
सुमनारुष्कराङ्कोठसप्तपर्णेषु साधितम् ॥ ६ ॥
मेदःसमुत्थां संस्वेद्य लेपयेत् सुरसादिना ।
शिरोविरेकद्रव्यैर्वा सुखोष्णैर्मूत्रसंयुतैः ॥
स्विन्नाञ्चाविध्य पट्टेन समाश्वास्य तु मानवम् ।
रक्षेत् फलं सेवनीञ्च वृद्धिपत्रेण दारयेत् ॥
मेदस्ततः समुद्धृत्य दद्यात् कासीससैन्धवे ।
बध्नीयाच्च यथोद्दिष्टं शुद्धे तैलञ्च दापयेत् ।
मनःशिलाललवणैः सिद्धमरुष्करेषु च ॥ ७ ॥
मूत्रजां स्वेदयित्वा तु वस्त्रपट्टेन वेष्टयेत् ।
सेवन्याः पार्श्वतोऽधस्ताद्विध्येद्व्रीहिमुखेन च ।
अथात्र द्विमुखां नाड़ीं दत्त्वा विस्रावयेद् भिषक् ।

मेद इत्यादि । आविध्य शैथिल्यमपनेतुं मूले दृढ़तरमाबध्य बद्धेत्यर्थः । मूत्रेत्यादि । वेष्टयेन्मेदोजमिवेति नेयम् । अत्र सेवन्या इत्यादिना वेधानन्तरं नाड़ीप्रणिधानमुपदिष्टे सत्यपि नाड़ीसंसक्तेन शस्त्रेण विद्धा नाड़ीं छित्वा शस्त्रमपनीय मूत्रं विस्रावयेदिति भिषजः सौकर्यमभिसमीक्ष्य । कच्छु-

मूत्रं नाड़ीमथोद्धृत्य स्थगिकाबन्धमाचरेत् ॥
शुद्धायां रोपणं दद्याद्वर्ज्जयेदन्त्रहेतुकीम् ॥ ८ ॥
अप्राप्तफलकोषायां वातवृद्धिक्रमो हितः ॥ ९ ॥
तत्र या वङ्क्षणस्था तां दहेदर्द्धेन्दुवक्रया ।
सम्यङ्मार्गावरोधार्थं कोषप्राप्तान्तु वर्ज्जयेत् ।
त्वचं भित्त्वाङ्गुष्ठमध्ये दहेच्चाङ्गविपर्य्ययात् ॥ १० ॥
अनेनैव विधानेन वृद्धी वातकफात्मिके ।
प्रदहेत् प्रयतः किन्तु स्नायुच्छेदोऽधिकस्तयोः ॥ ११ ॥
शङ्खोपरि च कर्णान्ते त्यक्त्वा यत्नेन सेवनीम् ।
व्यत्यासाद्वा शिरां विध्येदन्त्रवृद्धिनिवृत्तये ॥ १२ ॥

माचरेदत्रौयस्वेनाप्रवृत्तं मूत्रं वन्धनेन प्रपीड्य निःशेषं विस्रावयितुमित्यवगन्तव्यम् । शुद्धायां निर्मूलत्वेन दोषविरहितायामिति तात्पर्य्यम् । रोपणमत्र फलतदावरणयोः संश्लेषणमितिनिश्चीयते असंश्लिष्टत्वे हि तयोरन्तरवकाशमुपलभ्यान्यायेन मूत्रमुपेत्य वृद्धिमेतामभिनिर्व्वर्त्तयतीति । स्यादेतत् रोपणञ्च तत् कतरत् कतरत् कथं वा तत् प्रयोज्यमेवं पृष्टे ब्रूमः, शस्त्रक्षतच्छिद्रानुसारिणा पुष्पनेत्रेण मनाक्तुत्थकाशीसमिश्रं मद्यं प्रणीय जयन्तीपत्रपिष्टकेनाच्छाद्य बन्धनमेवं जातीयकं वा यत्किञ्चनेत्युपदिशन्त्याचार्य्याः । सम्प्रति सुदूरमविशेषेणोपदिष्टमन्त्रवृद्धेरसाध्यत्वं स्मृतिपथमानीय विशिनष्टि वर्ज्जयेदिति । सम्यङ्मार्गावरोधार्थं दहेदित्यन्वयः । अर्द्धेन्दुवक्रया शौहशलाकयेति तात्पर्य्यम् । अप्राप्तेत्यादिनार्थाच्चिन्तमर्थं स्फुटीकृत्यावगमयति कोषेति । सेवनीं 'शा० ५ अ०' उपदिष्टाम् ॥ ४—१२ ॥

उपदंशेषु साध्येषु स्निग्धस्विन्नस्य देहिनः ।
शिरां विध्येन्मेढ्रमध्ये पातयेद्वा जलौकसः ॥ १३ ॥
हरेदुभयतश्चापि दोषानत्यर्थमुच्छ्रितान् ।
सद्योऽपहृतदोषस्य रुक्शोफावुपशाम्यतः ॥
यदि वा दुर्ब्बलो जन्तुर्न वा प्राप्तं विरेचनम् ।
निरूहेण हरेत् तस्य दोषानत्यर्थमुच्छ्रितान् ॥ १४ ॥
प्रपौण्डरीकयष्ट्याह्व-वर्षाभूकुष्ठदारुभिः ।
सरलागुरुरास्नाभिर्वातजं संप्रलेपयेत् ॥
निचुलैरण्डबीजानि यवगोधूमशक्तवः ।
एतैश्च वातजं स्निग्धैः सुखोष्णैः सम्प्रलेपयेत् ।
प्रपौण्डरीकपूर्व्वैश्च द्रव्यैः सेकः प्रशस्यते ॥ १५ ॥
गैरिकाञ्जनयष्ट्याह्वसारिवोशीरपद्मकैः ।
सचन्दनोत्पलैः स्निग्धैः पैत्तिकं सम्प्रलेपयेत् ।
पद्मोत्पलमृणालैश्च ससर्ज्जार्ज्जुनवेतसैः ।
सर्पिःस्निग्धैः समधुकैः पैत्तिकं सम्प्रलेपयेत् ॥
सेचयेच्च घृतक्षीरशर्करेक्षुमधूदकैः ।
अथवापि सुशीतेन कषायेण वटादिना ॥ १६ ॥
शालाश्वकर्णाजकर्ण-धवत्वग्भिः कफोत्थितम् ।

उपदंशेष्वित्यादि । प्रपुण्डरीकपूर्व्वैरिति प्रपुण्डरीकादिभिः सप्तभिः ।

सुरापिष्टाभिरुष्णाभिः सतैलाभिः प्रलेपयेत् ॥
रजन्यतिविषामुस्तासरलासुरदारुभिः ।
सपत्रपाठापत्तूरैरथवा सम्प्रलेपयेत् ॥
सुरसारग्वधाद्योश्च क्वाथाभ्यां परिषिञ्चयेत् ॥ १७ ॥
एवं संशोधनालेपसेकशोणितमोक्षणैः ।
प्रतिकुर्य्यात् क्रियायोगैः प्राक्स्थानोक्तैर्हितैरपि ॥
नायाति च यथा पाकं प्रयतेत तथा भिषक् ।
विदग्धैस्तु शिरास्नायुत्वङ्मांसैः क्षीयते ध्वजः ॥
शस्त्रेणोपचरेच्चापि पाकमागतमाशु वै ।
तदापोह्य तिलैः सर्पिः क्षौद्रयुक्तैः प्रलेपयेत् ॥
करवीरस्य पत्राणि जात्यारग्वधयोस्तथा ।
प्रक्षालने प्रयोज्यानि वैजयन्त्यर्कयोरपि ॥ १८ ॥
सौराष्ट्रीं गैरिकं तुत्थं पुष्पकासीससैन्धवम् ।
रोध्रं रसाञ्जनं दार्व्वीं हरितालं मनःशिलाम् ॥
हरेणुकैले च तथा सूक्ष्मचूर्णानि कारयेत् ।

वटादिना 'सू० ३८ अ०' उक्तन्यग्रोधादिकतैनेत्यर्थः । अश्वकर्णाजकर्णौ द्वावेव शालभेदौ । धवस्तु स्वनामप्रसिद्धोराढीयो वृक्षः ॥ १३—१७ ॥

एवमित्यादि प्राक्स्थानोक्तैः सू० ३८ । ३७ । ३८ । १३ अ०" उक्तैः । ध्वजो मेढ्रश्चेति पर्य्यायौ । शस्त्रेणेत्यादि । तदा शस्त्रावचारणकाले अपोह्य कुथितांशं त्यक्त्वेत्यर्थः । जाती मालती, वैजयन्ती जयन्ती, सौराष्ट्री नाम

तच्चूर्णं क्षौद्रसंयुक्तमुपदंशेषु पूजितम् ॥ १८ ॥

जम्ब्वाम्रसुमनानिम्बश्वेतकाम्बोजिपल्लवाः ।
शल्लकीबदरीबिल्व-पलाशतिनिशत्वचः ॥
क्षीरिणाञ्च त्वचो योज्याः क्वाथे त्रिफलया सह ।
तेन क्वाथेन नियतं व्रणं प्रक्षालयेद्भिषक् ॥
अस्मिन्नेव कषाये तु तैलं धीरो विपाचयेत् ।
गोजीविड़ङ्गयष्टीभिः सर्व्वगन्धैश्च संयुतम् ।
एतत् सर्व्वोपदंशेषु श्रेष्ठं रोपणमिष्यते ॥
सर्ज्जिका तुत्थकासीसं शैलेयञ्च रसाञ्जनम् ।
मनःशिला समैश्चूर्णं व्रणवीसर्पनाशनम् ॥
गुन्द्रां दग्ध्वा कृतं भस्म हरितालं मनःशिला ।
उपदंशविसर्पाणामेतच्छान्तिकरं परम् ॥
मार्कवस्त्रिफला दन्ती ताम्रचूर्णमयोरजः ।
उपदंशं निहन्त्येष वृक्षमिन्द्राशनिर्यथा ॥ २० ॥

"फटकारी" इति प्रथते । पूजितं प्रायेणाव्यर्थत्वादित्यनुसन्धेयम् । काम्बोजी श्वेतखदिरः । अत्र "व्याःपाः ६ । ३ । ६३ पा० सू०" ह्रस्वः । सर्व्वगन्धं नाम "चातुर्ज्जातक कर्पूर कक्कोलागुरुकुङ्कुमम् । लवङ्गसहितञ्चैव सर्व्वगन्धं प्रकीर्त्तितम्" इत्युक्तगन्धद्रव्यसमूहः । बहुवचनन्तु विशेषोपयोगितया श्रेयस्त्वमाख्यापयति । गुन्द्रा एड़का 'होगला' इत्याख्यायते ॥ १८—२० ॥

उपदंशद्वयेऽप्येतां प्रत्याख्यायाचरेत् क्रियाम् ।
तयोरेव च या योग्या वीक्ष्य दोषबलाबलम् ॥ २१ ॥
उपदंशे विशेषेण शृणु भूयस्त्रिदोषजे ।
दुष्टव्रणविधिं कुर्य्यात् कुथितं मेढ्रनं त्यजेत् ॥
जम्ब्वोष्ठेनाग्निवर्णेन पश्चाच्छेषं दहेद्भिषक् ।
सम्यग्दग्धस्य विज्ञाय मधुसर्पिः प्रयोजयेत् ॥
शुद्धे च रोपणं दद्यात् कल्कं तैलं हितञ्च यत् ॥ २२ ॥
स्नेहस्वेदोपपन्ने तु श्लीपदेऽनिलजे भिषक् ।
कृत्वा गुल्फोपरि शिरां विध्येत् तु चतुरङ्गुले ॥
समाप्यायितदेहस्य वस्तिभिः समुपाचरेत् ।
मासमेरण्डजं तैलं पिबेन्मूत्रेण संयुतम् ॥
पयसौदनमश्नीयाच्छागरक्कथितेन च ।
चैवृतञ्चोपयुञ्जीत शस्तो दाहस्तथाग्निना ॥ २३ ॥
गुल्फस्याधःशिरां विध्येत् श्लीपदे पित्तसम्भवे ॥

सम्यत्युपदंशेष्वसाध्यत्वेनोपदिष्टौ रक्तजसान्निपातिकावपि प्रत्याख्याय प्रतिकर्त्तुमुपदिदिक्षति उपेति। अत्र द्वयद्वयनेन द्वावन्त्यौ रक्तजत्रिदोषजावेव लभ्येते पारिशेष्यात्, प्रत्याख्यायेति विशेषणाच्च। त्रिदोषे पुनर्विशिनष्टि उपदंशे इति। जम्बुजाम्बवमिति पर्य्यायौ। जम्ब्वोष्ठेन जाम्बवोष्ठेन। परिशिष्टमतिरोहितार्थम् ॥ १८—२२ ॥

स्नेहेत्यादि सम्यगाप्यायितदेहं सञ्जातबलम् तैहतं स्नेहनितयम्। सुचि-

पित्तघ्नीञ्च क्रियां कुर्य्यात् पित्तार्व्वुदविसर्पवत् ॥ २४ ॥
शिरां सुविदितां विध्येदङ्गुष्ठे श्लैष्मिके भिषक् ।
मधुयुक्तानि चाभीक्ष्णं कषायाणि पिबेन्नरः ॥
पिबेद्वाप्यभयाकल्कं मूत्रेणान्यतमेन च ॥
कटुकामभृतां शुण्ठीं विडङ्गं दारुचित्रकम् ।
हितं वा लेपने नित्यं भद्रदारु सचित्रकम् ।
विडङ्गमरिचार्केषु नागरे चित्रकेऽथवा ।
भद्रदार्व्वेलकाख्ये च सर्व्वेषु लवणेषु च ॥
तैलं पक्वं पिबेद्वापि यवान्नञ्च हितं सदा ॥ २५ ॥
पिबेत् सर्षपतैलं वा श्लीपदानां निवृत्तये ।
पूतिकरञ्जपत्राणां रसं वापि यथाबलम् ॥
दग्ध्वा मूत्रेण तद्भस्म स्रावयेत् क्षारकल्पवित् ।
तत्र दद्यात् प्रतीवापं काकोडुम्बरिकारसम् ॥
अनेनैव विधानेन पुत्रञ्जीवकजं रसम् ।
प्रयुञ्जीत भिषक् प्राज्ञः कालसात्म्यविभागवित् ॥
कैचुकाकन्दनिर्यासंलवणान्वथ पाकिमम् ।
रसं दत्त्वाथ पूर्व्वोक्तं पेयमेतद् भिषग्जितम् ॥ २६ ॥

दितां स्फूटतया सम्यगुत्थितत्वेन परिज्ञाताम् । पूतिकरञ्जः "नाटा करञ्ज" इत्यभिधीयते पुत्रञ्जीवकोनाम 'जीयापूता' इत्याख्यायते । कैचुका कचौ कचुरिति पर्य्यायाः । पाकिमं विड़ाख्यम् । पूर्व्वोक्तं पुत्रञ्जीवकोत्थम् ॥२३-२६

काकादनीं काकजङ्घां बृहतीं कण्टकारिकाम्।
कदम्बपुष्पीं मन्दारीं लम्बां शुकनसां तथा॥
मदनाच्च फलात् क्वाथं शुकाख्यास्वरसं तथा।
एष क्षारस्तु पानीयः श्लीपदं हन्ति सेवितम्॥
अपचीं गलगण्डञ्च ग्रहणीदोषमेव च।
भक्तस्यानशनञ्चैव हन्यात् सर्व्वविषाणि च॥
एवमेव तैलं संसिद्धं नस्याभ्यङ्गेषु पूजितम्।
एतानेवामयान् हन्ति ये च दुष्टव्रणा नृणाम्॥ २७॥
द्रवन्तीं त्रिवृतां दन्तीं नीलीं श्यामां तथैव च
सप्तलां शङ्खिनीञ्चैव दग्ध्वा मूत्रेण गालयेत्॥
दद्याच्च त्रिफलाक्वाथमेष क्षारस्तु साधितः।
अधो गच्छति पीतस्तु पूर्व्वैश्चाप्याशिषः समाः॥ २८॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने-
वृद्ध्युपदंशश्लीपदचिकित्सितं
नामैकोनविंशोऽध्यायः॥ १९॥

काकादनीमित्यादि। कदम्बपुष्पी 'मुण्डेरी' इत्यभिधीयते। लम्बा कटुतुम्बी, एषां क्षारा एव ग्राह्याः। एष क्षार इत्यनन्तरोक्तः। एतानपचीप्रभृतीन्। परिशिष्टं निगदव्याख्यातम्॥ २७—२८॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये चिकित्सितस्थाने वृद्ध्युपदंशश्लीपदचिकित्सितं नामैकोनविंशोऽध्यायः।

विंशोऽध्यायः ।

अथातः क्षुद्ररोगचिकित्सितं व्याख्यास्यामः ॥ १ ॥

अथाजगल्लिकामामां जलौकोभिरुपाचरेत् ।
शुक्तिसुष्ठीयवक्षारकल्कैश्चालेपयेद्भिषक् ॥
श्यामालाङ्गलकीपाठाकल्कैर्वापि विचक्षणः ।
पक्वां व्रणविधानेन यथोक्तेन प्रसाधयेत् ॥ २ ॥

अन्धालजीं यवप्रख्यां पनसीं कच्छपीं तथा ।
पाषाणगर्दभञ्चैव पूर्वं स्वेदेन योजयेत् ॥ ३ ॥

मनःशिलातालकुष्ठ-दारुकल्कैः प्रलेपयेत् ।
परिपाकगतान् भित्त्वा व्रणवत् समुपाचरेत् ॥ ४ ॥

विवृतामिन्द्रवृद्धाञ्च गर्दभीं जालगर्दभम् ।
इरिविल्लीं गन्धनाम्नीं कक्षां विस्फोटकांस्तथा ॥
पित्तजस्य विसर्पस्य क्रियया साधयेद्भिषक् ।
रोपयेत् सर्पिषा पक्वान् सिक्तेन मधुरौषधैः ॥ ५ ॥

क्रमागतक्षुद्ररोगचिकित्सितमधिकरोति अथात इत्यादिना । व्युत्पादितोऽयं क्षुद्ररोगशब्दः प्रागेव ॥ १ ॥

अथेत्यादि अत्र क्षुद्ररोगेषु मध्ये इत्यर्थः । सुष्ठीयक्षिंकाक्षारः । श्यामा श्यामामूलत्रिवृत् । विवृतामित्यादि अत्र तन्त्रान्तरोक्तानां गर्दभीरिविल्ला-गन्धनाम्नीनामादौ हे॰ विवृतायामन्त्राच यथा कथञ्चित् कक्षायामनायावेने-

चिप्पमुष्णाम्बुना सिक्तमुत्कृत्य स्रावयेद्भिषक्।
चक्रतैलेन चाभ्यज्य सर्ज्जचूर्णेन चूर्णयेत्॥
बन्धेनोपचरेच्चैनमशक्यञ्चाग्निना दहेत्।
मधुरौषधसिद्धेन ततस्तैलेन रोपयेत्॥ ६ ॥
कुनखे विधिरप्येष कार्य्यो हि भिषजा भवेत्॥ ७ ॥
विदारिकां समभ्यज्य स्विन्नां विम्लाप्य लेपयेत्
मधुशिग्रुवर्षाभू-विल्वमूलैः सुपेषितैः॥
व्रणभावगतायां वा कृत्वा संशोधनीं क्रियाम्।
रोपणार्थं हितं तैलं कषायमधुरैः शृतम्॥ ८ ॥
प्रच्छानैर्वा जलौकोभिः स्राव्याऽपक्वा विदारिका।
अजकर्णैः सपालाशमूलकल्कैः प्रलेपयेत्॥
पक्वां विदार्य्य शस्त्रेण पटोलपिचुमर्द्दयोः।
कल्केन तिलयुक्तेन सर्पिर्मिश्रेण लेपयेत्॥

चान्तर्भविष्यतीति सम्प्रधार्य्य प्रागनुपदिष्टानामप्यासां सिद्धीनां चिकित्सिते विचिकित्सापरिहारार्थं नाममात्रेणोपदेशः साम्प्रतमेव। अत्र गर्द्दभीरिविक्षे नाम "मण्डलं वृत्तमुत्सन्नं सरक्तं पिडकाचितम्। रुजाकरीं गर्द्दभिकां तां विद्याद्वातपित्तजाम्।" तथा "पिडकामुत्तमाङ्गस्थां वृत्तामुग्ररुजां ज्वराम्। पित्तप्रकोपसम्भूतां जानीयादिरिविल्लिकाम्।" इत्युक्तलक्षणे, गन्धनाम्नी च "एकामेतादृशीं दृष्ट्वा पिडकां स्फोटसन्निभाम्। त्वग्गतां पित्तकोपेन गन्धनामां प्रचक्षते।" इत्युक्तलक्षणा। एतादृशीं कक्षासदृशीम्। चिप्पमित्यादि। उत्कृत्य शस्त्रेणावलिख्य, चक्रतैलं 'चि० २४ अ०' वक्ष्यमाणम्, मधुरौषधानि

बद्धा च क्षीरवृक्षस्य कषायैः खदिरस्य च ।
व्रणं प्रक्षालयेन्मुक्त्वा ततस्ता रोपयेत् पुनः ॥ ९ ॥
मेदोऽर्ब्बुदविधानेन साधयेच्छर्कराऽर्ब्बुदम् ॥ १० ॥
कच्छूं विचर्च्चिकां पामां कुष्ठवत् समुपाचरेत् ।
लेपश्च शस्यते सिक्थशताह्वगौरसर्षपैः ॥
वचा दार्व्वीसर्षपैर्वा तैलं वा नक्तमालजम् ।
सारतैलमथाभ्यङ्गे कुर्व्वीत कटुकैः शृतम् ॥ ११ ॥
पादस्यानुशयीं श्लेष्मविद्रधिवदुपक्रमेत् ।
पाददार्य्यां शिरां विद्धा स्वेदाभ्यङ्गौ प्रयोजयेत् ।
मधूच्छिष्ट-वसा-मज्ज-सर्ज्जचूर्णघृतैः कृतः ।
यवाक्षगैरिकोन्मिश्रैः पादलेपः प्रशस्यते ॥ १२ ॥
पादौ सिक्तारनालेन लेपनं ह्यलसे हितम् ।
कल्कीकृतैर्निम्बतिलकासीसालैः ससैन्धवैः ॥
लाक्षारसोऽभया वापि कार्य्यं स्याद्रक्तमोक्षणम् ॥

'सु० ४२ अ०' उक्तानि । अथानुक्तमपि सिन्दूरावचूर्णनं कार्य्यमेव । विदारिकामित्यादि । नगवृत्तिकं शैलजम् अन्ये तु पार्व्वतीयां पुनर्नवां पाठयितुं नगवृत्तिकेत्युपात्तमित्याहुः । संशोधनीं मिश्रकोक्तामित्यवगन्तव्यम् । अजकर्णः शालभेदः "पियाशाल" इत्याख्यायते । बद्धा परिपालयेदिति शेषः । प्रक्षालयेद्दोषबलमभिसमीक्ष्य यथाकालं मुक्त्वेति हृदयम् ॥२—१०॥

कच्छूमित्यादि । पूर्व्वं हि कच्छूर्नोपदिष्टोपदिष्टा च रकसेति भूमौ मोघोऽयं कच्छूशब्दो रकसामभिधत्ते तथा च कच्छूमितत्वेन कच्छूसाध्यात् कच्छूरिति निष्कर्षः । आजेन्नसा क्षुद्ररोगेषु पाठफलं दर्शयन् किञ्चित्

सिद्धं रसे काण्टकार्य्यास्तैलं वा सार्षपं हितम् ।
कासीसरोचनशिला चूर्णैर्वा प्रतिसारणम् ॥ १३ ॥
उद्धृत्य दग्ध्वा स्नेहेन जयेत् कदरसंज्ञकम् ॥ १४ ॥
इन्द्रलुप्ते शिरां मूर्ध्नि स्निग्धस्विन्नस्य मोक्षयेत् ।
कल्कैः समरिचैर्दिह्याच्छिलाकासीसतुल्यकैः ।
कुटन्नटादारुकल्कैर्लेपनं वा प्रशस्यते ॥
प्रच्छयित्वावगाढं वा गुञ्जाकल्कैर्मुहुर्मुहुः ।
लेपयेदुपशान्त्यर्थं कुर्य्याद्वापि रसायनम् ॥
हस्तिदन्तमसीं कृत्वा मुख्यञ्चैव रसाञ्जनम्
रोमाण्यनेन जायन्ते नृणां पाणितलेष्वपि ॥
मालतीकरवीराग्नि-नक्तमालविपाचितम् ।
तैलमभ्यञ्जने शस्तमिन्द्रलुप्तापहं परम् ॥ १५ ॥
अरूंषिकां हृते रक्ते सेचयेन्निम्बवारिणा ।
दिह्यात् सैन्धवयुक्तेन वाजिविष्ठारसेन तु ॥
हरितालनिशानिम्बकल्कैर्वा सपटोलजैः ।
यष्टीनीलोत्पलैरण्डमार्कवैर्वा प्रलेपयेत् ॥ १६ ॥
शिरां दारुणके विद्ध्वा स्निग्धस्विन्नस्य मूर्द्धनि ।
अवपीडं शिरोवस्तिमभ्यङ्गञ्च प्रयोजयेत् ॥
क्षालने कोद्रवतृणक्षारतोयं प्रशस्यते ॥ १७ ॥

प्रतीकारं विभिनष्टि लेपयेति । शिरा 'भा० ८ प०' उक्तेन विधिनेति ज्ञेयम् । षाडाविंशादि । अन्नातुलोऽप्युक्तो हरिद्राखदिरदलनवीपः

उपरिष्टात् प्रवक्ष्यामि विधिं पलितनाशनम् ॥ १८ ॥
मसूरिकायां कुष्ठघ्नलेपनादिक्रिया हिता ।
पित्तश्लेष्मविसर्पोक्ता क्रिया वा संप्रशस्यते ॥ १९ ॥
चर्मकीलं जतुमणिं मशकं तिलकालकम् ।
उत्कृत्य शस्त्रेण दहेत् क्षाराग्निभ्यामशेषतः ॥ २० ॥
न्यच्छे व्यङ्गे शिरामोक्षो नीलिकायाञ्च शस्यते ।
यथान्यायं यथाभ्यासं ललाटाद्रिशिराव्यधः ॥
वृक्षा दिह्यात् त्वचं पिष्ट्वा क्षीरिणां क्षीरसंयुताम् ।
बलातिबलयष्ट्याह्व-रजनीर्वा प्रलेपनम ॥
पयस्यागुरुकालीयलेपनं वा सगैरिकम् ।
क्षौद्राज्ययुक्तया लिम्पेद्दंष्ट्रया शूकरस्य च ॥
कपित्थराजादनयोः कल्को वा हितमुच्यते ॥ २१ ॥
यौवने पिड़कास्त्रेष विशेषाच्छर्द्दनं हितम् ।
लेपनञ्च वचारोध्रसैन्धवैः सर्षपान्वितैः ॥
कुस्तुम्बुरुवचालोध्रकुष्ठैर्वा लेपनं हितम् ॥ २२ ॥

साधितः । उत्कृत्य शस्त्रेणेतिशेषः । इन्द्रलुप्त इत्यादि । अत्र इत्यादि-मोक्षो लेपोऽपि प्रच्छान पुरःसरमेव देयः । बहुकल्पो दृष्टफलोऽयं लेपः ॥ ११—१७॥

उपरिष्टादित्यादि । उपरिष्टात् 'चि० २५ अ०' मिश्रकचिकित्सिते इति यावत् । कुष्ठघ्नेति कुष्ठशब्दः पित्तश्लेष्मत्वेनावश्यं विशेषणीयोऽनन्तरोक्त-वाक्यपर्य्यात् । न्यच्छइत्यादि । नीलिका व्यङ्गभेदः व्यङ्गं प्रकृत्य चरकेणाहि

पद्मिनीकण्टके रोगे च्छर्दयेन्निम्बवारिणा ।
तेनैव सिद्धं सक्षौद्रं सर्पिःपानं प्रदापयेत् ॥
निम्बारग्वधयोः क्वाथो हित उत्सादने भवेत् ॥ २३ ॥
परिवर्त्तिं घृताभ्यक्तां सुस्विन्नामुपनाहयेत् ।
त्रिरात्रं पञ्चरात्रं वा वातघ्नैः शाल्वणादिभिः ॥
ततोऽभ्यज्य शनैश्चर्म्म चानयेत् पीड़येन्मणिम् ।
प्रविष्टे च मणौ चर्म्म स्वेदयेदुपनाहनैः ॥
दद्यादातहरान् बस्तीन् स्निग्धान्यन्नानि भोजयेत् ॥२४॥
वपाटिकां जयदेवं यथादोषं चिकित्सकः ॥ २५ ॥
निरुद्ध-प्रकशे नाड़ीं लौहीमुभयतोमुखीम् ।
दारवीं वा जतुकृतां घृताभ्यक्तां प्रवेशयेत् ॥
परिषिक्ते वसामज्ज शिशुमारवराहयोः ।
चक्रतैलं तथा योज्यं वातघ्नद्रव्यसंयुतम् ॥
त्र्यहात् त्र्यहात् स्थूलतरां सम्यङ्नाड़ीं प्रवेशयेत् ।
स्रोतो विवर्द्धयेदेवं स्निग्धमन्नञ्च भोजयेत् ।
भित्त्वा वा सेवनीं मुक्त्वा सद्यःक्षतवदाचरेत् ॥ २६ ॥

"कक्षा मेवं गुणं गात्रे मुखे वा मौक्तिकां विदुः" इति । शिरामोक्ष इत्य-त्रिशिखिणं समयं पुन स्त्वं मिनष्टि यथेति । 'शा० ८ अ०' उक्तं विधिमनति-क्रम्येति यथान्यायम्, यथाभ्यासम् उक्तानामनुष्ठितत्वे यथा सविकष्ट-मित्यर्थः । कपित्थेति । हितमुच्यते प्रकृतत्वात् प्रलेपनमिति शेषः । यावन इति । एष इत्यनन्तरोक्तधान्यपञ्चकात् घृष्टेत्यादिना प्रागुक्तं लेप-

सन्निरुद्धगुदं रोगं वल्मीकं वह्निरोहिणीम् ।
प्रत्याख्याय यथायोगं चिकित्सितमथाचरेत् ॥
विसर्पोक्तेन विधिना साधयेदग्निरोहिणीम् ।
सन्निरुद्धगुदे योज्या निरुद्ध-प्रकाशक्रिया ॥ २१ ॥
शस्त्रेणोत्कृत्य वल्मीकं क्षाराग्निभ्यां प्रसाधयेत् ।
विधानेनार्बुदोक्तेन शोधयित्वा च रोपयेत् ॥
वल्मीकन्तु भवेद्यस्य नातिवृद्धममर्मजम् ।
तत्र संशोधनं कृत्वा शोणितं मोक्षयेद्भिषक् ॥
कुलत्थिकाया मूलैश्च गुडूच्या लवणेन च ।
आरेवतस्य मूलैश्च दन्तीमूलैस्तथैव च ॥
श्यामामूलैः सफलैः शक्तुमिश्रैः प्रलेपयेत् ।
सुस्निग्धैश्च सुखोष्णैश्च भिषक् तमुपनाहयेत् ॥
पक्वं यदा विजानीयाद्गतीः सर्व्वा यथाक्रमम् ।
अभिज्ञाय ततश्छित्त्वा प्रदहेन्मतिमान् भिषक् ॥
संशोध्य दुष्टमांसानि क्षारेण प्रतिसारयेत् ।
व्रणं विशुद्धं विज्ञाय रोपयेन्मतिमान् भिषक् ॥

समूलमेव लवयतीति प्रत्येतव्यम् । पक्षिनीति । उत्पादनमत्र मात्स-मादनन्यत् । चपाटिकामिति "वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः" इत्यवादिलोपः । निरुद्धेति अत्रानुक्तमपि त्वक्छेदमभिनन्दन्ति कुशलाः । निरुद्धप्रकाशक्रिया नाडीप्रवेशनस्नेहावसेचनरूपेति प्रतिपत्तव्यम् ॥१८—२०॥

शस्त्रेणेत्यादि । आरेवतः आरग्वधः । ततः इति समभ्यन्तात् सार्व्वविभक्तिकस्तसिल् तदेत्यर्थः । अत्र पक्वं वा तद्विजानीयादिति तु वैयाकरण-

सुमना ग्रन्थिकश्चैव भल्लातक-मनःशिलाः ।
कालानुसारी सूक्ष्मैला चन्दनागुरुणी तथा ॥
एतैः सिद्धं निम्बतैलं वल्मीके रोपणं हितम् ।
पाणिपादोपरिष्टात् तु च्छिद्रैर्बहुभिराहृतम् ।
वल्मीकं यत् सशोफं स्याद् वर्ज्यं तत् तु विजानता ॥२८॥
धात्र्याः स्तन्यं शोधयित्वा बाले साध्याहिपूतना ।
पटोलपत्रत्रिफला-रसाञ्जनविपाचितम् ॥
पीतं घृतं नाशयति कृच्छ्रामप्यहिपूतनाम् ॥
त्रिफलाकोलखदिरकषायं व्रणरोपणम् ।
कासीसरोचनातुत्थ-हरितालरसाञ्जनैः ॥
लेपोऽम्लपिष्टो बदरीत्वग्वा सैन्धवसंयुता ।
कपालतुत्थजं चूर्णं चूर्णकाले प्रयोजयेत् ॥ २९ ॥
चिकित्सेन् मुष्ककच्छूश्चाप्यहिपूतनपामवत् ॥ ३० ॥
गुदभ्रंशे गुदं स्विन्नं स्नेहाभ्यक्तं प्रवेशयेत् ।
कारयेद्गोफणाबन्धं मध्यच्छिद्रेण चर्मणा ।
विनिर्गमार्थं वायोश्च स्वेदयेच्च मुहुर्मुहुः ॥ ३१ ॥

पाणिपरिष्ठितः पाठः पुंस्त्वेव क्लीवभ्रमात् । ग्रन्थयो ग्रन्थिपर्वाणि बहुवचनन्तु विशेषेणोपयोगिकत्वमाख्यापयति । धात्र्या इत्यादि । शोधयित्वा 'चि० १७ प०' उक्तेनेति शेषः । कपालं घटादेरवयवः, तुत्थं तुत्थकम् । चूर्ण-काले बहुमांसच्छेदनेन दाहपीडरणार्थं चूर्णोपयोगकाले इत्यर्थः । चरि–

क्षीरे महत्पञ्चमूलं मूषिकाञ्चान्त्रवर्ज्जिताम् ।
पक्त्वा तस्मिन् पचेत् तैलं वातघ्नौषधसंयुतम् ।
गुदभ्रंशमिदं कृच्छ्रं पानाभ्यङ्गात् प्रसाधयेत् ॥ ३२ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
क्षुद्ररोगचिकित्सितं नाम
विंशोऽध्यायः ॥ २० ॥

पूतनपामवदिति पामापरपर्य्यायोऽयं नान्तः पामशब्दः । "पाम पामा" इत्यमरः । गोफणाबन्धो नाम 'सू० १८अ०' कौपीनबन्ध इत्यवोचाम । अत्र "क्षीरे महापञ्चमूलम्" इत्यादि पाठस्तु नाकर इति गम्यते चक्रपाणिप्रभृतिधृतपाठविरोधात् । परिशिष्टं निगदव्याख्यातम् ॥ २९—३२ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
चिकित्सितस्थाने क्षुद्ररोगचिकित्सितं नाम विंशोऽध्यायः ।

एकविंशोऽध्यायः ।

अथातः शूकरोगचिकित्सितं व्याख्यास्यामः ॥ १ ॥

संलिख्य सर्षपीं सम्यक् कषायैरवचूर्णयेत् ।
कषायैरेव तैलञ्च कुर्व्वीत व्रणरोपणम् ॥ २ ॥

अष्ठीलिकां जलौकोभिर्ग्राहयेत् कुशलो भिषक्।
तथा चानुपशाम्यन्तीं कफग्रन्थिवदुद्धरेत् ॥ ३ ॥
[illegible]दितं शस्त्रनाड़ीस्वेदेन बुद्धिमान्।
[illegible]नाहेन सुस्निग्धैरुपनाहयेत् ॥ ४ ॥
कुम्भीकां पाकमापन्नां भिन्द्याच्छुद्धान्तु रोपयेत्।
तैलेन त्रिफला-लोध्र-तिन्दुकाम्रातकेन तु ॥ ५ ॥
ग्राहयित्वा जलौकोभिरलजीं सेचयेत् ततः।
कषायैस्तैस्तु सिद्धञ्च तैलं रोपणमिष्यते ॥ ६ ॥
बलातैलेन कोष्णेन मृदितं परिषेचयेत्।
मधुरैः सर्पिषा स्निग्धैः सुखोष्णैरुपनाहयेत् ॥ ७ ॥
संमूढपिड़कां क्षिप्रं जलौकोभिरुपाचरेत्।
भित्त्वा पथ्यागताञ्चापि लेपयेत् क्षौद्रसर्पिषा ॥ ८ ॥
अवमन्थे गते पाकं भिन्ने तैलं विधीयते।
धवाश्वकर्णपत्तङ्ग-शल्लकीतिन्दुकीकृतम् ॥ ९ ॥
क्रियां पुष्करिकायान्तु शीतां सर्व्वां प्रयोजयेत्।
जलौकोभिर्हरेच्चासृक् सर्पिषा चावसेचयेत् ॥ १० ॥
स्पर्शहान्यां हरेद्रक्तं प्रदिह्यान्मधुरैरपि।
क्षीरेक्षुरससर्पिर्भिः सेचयेच्च सुशीतलैः ॥ ११ ॥

क्रमागतं शुक्रदोषचिकित्सितमधिकरोति अथात इत्यादिना ॥१—५॥

पिड़कामुत्तमाख्याञ्च वर्ज्जयेनोद्धरेद्भिषक्।
उद्धृत्य मधुसंयुक्तैः कषायैरवचूर्णयेत्॥ १२॥
रसक्रिया कारकम विधातव्या लिखिते शतपोनके
पृथक्पर्ण्यादिसिद्धञ्च देयं तैलमनन्तरम्॥ १३॥
क्रियां कुर्य्याद् भिषक् प्राज्ञस्त्वक्पाके च विसर्पवत्॥१४॥
रक्तविद्रधिवच्चापि क्रिया शोणितजेऽर्ब्बुदे।
कषाय कल्कसर्पींषि तैलं चूर्णं रसक्रियाम्॥
शोधनं रोपणञ्चैव वीक्ष्य वीक्ष्यावचारयेत्॥
यथास्वं सर्पिषः पानं पथ्यञ्चापि विरेचनम्।
हितः शोणितमोक्षश्च यच्चापि लघुभोजनम्॥ १५॥
अर्ब्बुदं मांसपाकञ्च विद्रधिं तिलकालकम्।
प्रत्याख्याय प्रकुर्व्वीत भिषक सम्यक प्रतिक्रियाम्॥१६॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
शूकरोगचिकित्सितं
नामैकविंशोऽध्यायः॥ २१॥

अर्ब्बुदमित्यादि। सम्यक् सकृतामित्यर्थः। एतेनैतदुक्तं भवति मांस-पाके तिलकालके च दुष्टव्रणवत् शेषदोषु विद्रध्यर्ब्बुदवत् प्रतिक्रियेति। परिशिष्टं निगदव्याख्यातम्॥

इति श्रीहाराणचन्द्रचक्रवर्त्ति विरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये चिकित्सितस्थाने शूकदोषचिकित्सितं नामैकविंशोऽध्यायः ॥

द्वाविंशोऽध्यायः ।

अथातो मुखरोगचिकित्सितं व्याख्यास्यामः ॥ १ ॥

चतुर्विधेन स्नेहेन मधूच्छिष्टयुतेन च ।
वातजेऽभ्यञ्जनं कुर्य्यान्नाडीस्वेदञ्च बुद्धिमान् ॥ २ ॥
मतिमानोष्ठकोपे तु शाल्वणञ्चोपनाहने ।
मस्तिष्के चैव नस्ये च तैलं वातहरं हितम् ॥ ३ ॥
श्रीवेष्टकं सर्ज्जरसं सुरदारु सगुग्गुलु ।
यष्टीमधुकचूर्णन्तु विदध्यात् प्रतिसारणम् ॥ ४ ॥
पित्तरक्ताभिघातोत्थं जलौकोभिरुपाचरेत् ।
पित्तविद्रधिवच्चापि क्रियां कुर्य्यादशेषतः ॥ ५ ॥

सम्प्रति स्वल्पाक्षराभिधानसाधर्म्यादुद्दिष्टं मुखरोगचिकित्सितमधिकरोति अथात इत्यादि ॥ १ ॥

चतुरित्यादि । मस्तिष्कं नाम मस्तिष्ककृतं शिरस्तर्पणम्, आयुर्व्वैघृत-मितिवत् । पित्तेत्यादि । अथ चेत् पित्ताच्च रक्ताभिघाताच्चेत्येवं त्रयोऽपि तर्हि

शिरोविरेचनं धूमः स्वेदः कवल एव च ।
हृते रक्ते प्रयोक्तव्यमोष्ठकोपे कफात्मके ॥
चूर्णकं सर्जिकाक्षारो यवक्षारो विडं तथा ।
क्षौद्रयुक्तं विधातव्यमेतच्च प्रतिसारणम् ॥ ६ ॥
मेदोजे स्वेदिते भिन्ने शोधिते ज्वलनो हितः ।
प्रियङ्गुत्रिफलालोध्रं सक्षौद्रं प्रतिसारणम् ।
एतद्दोषप्रकोपाणां साध्यानां कर्म कीर्त्तितम् ॥ ७ ॥
दन्तमूलगतानान्तु रोगाणां कर्म वक्ष्यते ।
शीतादे हृतरक्ते तु तोये नागरसर्षपान् ।
निःक्वाथ्य त्रिफलामुस्तं गण्डूषः सरसाञ्जनः ॥ ८ ॥
प्रियङ्गवश्च मुस्तञ्च त्रिफला च प्रलेपनम् ।
नस्यञ्च त्रिफलासिद्धं मधुकोत्पलपद्मकैः ॥ ९ ॥
दन्तपुप्पुटके कार्य्यं तरुणे रक्तमोक्षणम् ।
सपञ्चलवणः क्षारः सक्षौद्रः प्रतिसारणम् ॥
हितः शिरोविरेकश्च नस्यं स्निग्धञ्च भोजनम् ॥ १० ॥

"चक्षोमचिरविध्वस्तमनङ्गुलिरवापयत् । यथोक्तः प्रत्यगृहरमजिह्वयत्र पूजयत्" इति वत् "साध्यानां कर्मकीर्त्तितमित्यनन्तरोक्तं" व्याहतं स्यात् रक्तप्रकोष्ठकोपकाणाञ्चत्वेन विवक्षितत्वात् । तस्मात् पित्तं रक्तवद्भवा ज्ञातव्येति ब्रूमः ॥ २—७ ॥

दन्तेत्यादि । प्रथानुक्रमपि शीतादे सू० ११ अ० उक्तेन क्षारेणाग्निना

विस्राविते दन्तवेष्टे व्रणांस्तु प्रतिसारयेत् ।
रोध्रपत्तङ्गयष्ट्याह्व-लाक्षाचूर्णैर्मधूत्तरैः ॥
गण्डूषे क्षीरिणो योज्याः सक्षौद्रघृतशर्कराः ।
काकोल्यादौ दशक्षीरसिद्धं सर्पिश्च नस्यतः ॥ ११ ॥
शौषिरे हृतरक्ते तु रोध्रमुस्तरसाञ्जनैः ।
सक्षौद्रैः शस्यते लेपो गण्डूषे क्षीरिणो हिताः ॥
सारिवोत्पलयष्ट्याह्व-सायरागुरुचन्दनैः ।
क्षीरे दशगुणे सिद्धं सर्पिर्नस्ये च पूजितम् ॥ १२ ॥
क्रियां परिदरे कुर्य्याच्छीतादोक्तां विचक्षणः ॥ १३ ॥
संशोध्योभयतः कार्य्यं शिरश्चोपकुशे तथा ।
काकोडुम्बरिकागोजीपत्रैर्विस्रावयेदसृक् ॥
क्षौद्रयुक्तैश्च लवणैः सव्योषैः प्रतिसारयेत् ॥
पिप्पलीः सर्षपांश्चैव नागरं नैचुलं फलम् ।
सुखोदकेन संसृष्टं कवलञ्चापि धारयेत् ॥
घृतं मधुरकैः सिद्धं हितं कवल-नस्ययोः ॥ १४ ॥
शस्त्रेण दन्तवैदर्भे दन्तमूलानि शोधयेत् ।
ततः क्षारं प्रयुञ्जीत क्रियाः सर्व्वाश्च शीतलाः ॥ १५ ॥
उद्धृत्याधिकदन्तन्तु ततोऽग्निमवचारयेत् ।
कृमिदन्तकवच्चापि विधिः कार्य्यो विजानता ॥ १६ ॥

चा दाहं दन्तपुप्पुटकदन्तवेष्टशौषिरेषु मनागुष्णेन चूर्णितेन 'श्यामाक' इति प्रसिद्धस्य पत्रेण दैनन्दिनं हिक्किर्व्वा मार्ज्जनम् परिदरोपकुशयोश्चाधि-

छित्त्वाधिमांसं सक्षौद्रैरेभिश्चूर्णैरुपाचरेत् ।
वचा-तेजोवती-पाठा-सर्ज्जिका यावशूकजैः ॥
क्षौद्रद्वितीयाः पिप्पल्यः कवलश्चात्र कीर्त्तितः ॥
पटोल-त्रिफला-निम्बकषायश्चात्र धावने ।
हितः शिरोविरेकश्च धूमो वैरेचनश्च यः ॥ १७ ॥
सामान्यं कर्म्म नाड़ीनां विशेषश्चात्र मे शृणु ।
नाड़ीव्रणहरं कर्म्म दन्तनाड़ीषु कारयेत् ।
यं दन्तमधिजायेत नाड़ी तं दन्तमुद्धरेत् ।
छित्त्वा मांसानि शस्त्रेण यदि नोपरिजो भवेत् ॥
शोधयित्वा दहेद्वापि क्षारेण ज्वलनेन वा ॥
भिनत्त्युपेक्षिते दन्ते हनुकास्थि गतिर्ध्रुवम् ।
समूलं दशनं तस्मादुद्धरेद्भग्नमस्थि च ॥ १८ ॥

मांसेषु नोक्तेन क्षारेण प्रतिसारणं साधिष्ठं मन्यन्ते । वर्द्धनं नाम प्रतिचिकी-र्षीति चक्रत्येति ॥ ८—१७ ॥

सामान्यमित्यादि । सामान्यं कर्म्म तावत् नाड़ीव्रणहरमेव तच्च 'चि० १७ अ०' अभिसमीक्ष्य यथायोगमेव कार्य्यम् । अत्र यदीति व्यव-च्छेदोऽयं रक्तातियोगमाशङ्क्य क्रियत इति गम्यते तथा चोपरिजोऽयं स्थिर-एव प्रत्येतव्यः, दृश्यते हि तस्मिन्नेनोद्धृते प्रवर्त्तमानं रक्तं कदाचित् प्रमाण-मतिक्रामतीति, तथाच स्वतन्त्रकल्पस्य क्षारेण वा चाग्निना कोऽपि तारो नानुपपन्नः । एतदेव परमतस्तात्त्विकत्वेन प्रतिपत्स्यते च "चलमप्युत्तरं दन्तं" इत्या-दिना ग्रन्थसन्दर्भेण, अन्यथा अद्विगुण्य रक्तमभिसमीक्ष्य पलायमानस्याभी-षिकवृत्ते- सम्पतन इव दुर्गतिस्ते दुरपनेया स्यात्, वक्ष्यति हि "भिनत्त्यु-

उद्धृते तूत्तरे दन्ते समूले स्थिरबन्धने।
रक्तातियोगात् पूर्व्वोक्ता रोगा घोरा भवन्ति हि॥
काणः सञ्जायते जन्तुरर्द्दितञ्चास्य जायते।
चलमप्युत्तरं दन्तमतो नोपहरेद्भिषक्॥ १९॥
धावनं जाति-मदन-स्वादुकण्टक-खादिरम्।
कषायं जाति-मदन-कटुक-स्वादुकण्टकैः॥
यष्ट्याह्व-रोध्र-मञ्जिष्ठा-खदिरैश्चापि यत् कृतम्।
तैलं संशोधनं तद्धि हन्याद्दन्तगतां गतिम्॥ २०॥
कीर्त्तिता दन्तमूले तु क्रिया दन्तेषु वक्ष्यते॥ २१॥
स्नेहानां कवलाः कोष्णाः सर्पिषस्त्रिवृतस्य वा।
निर्य्यूहाश्चानिलघ्नानां दन्तहर्षप्रमर्द्दनाः॥

वेष्टिते दन्ते हनुकास्थि गतिर्ध्रुवम्" इति। उद्धृत इत्यादि। तुकारेणोद्धृते अत्यन्तमत्वेनातितरां व्यापत्तिं दर्शयन्नुपरिजातिभिन्नस्योत्तरं दन्तम्। वायु-रत्र हि रक्तोपद्रुतत्वेन प्रकोपविशेषाच्छोणितातिप्रवृत्तौ हेतुर्भवतीति वात-प्रयुक्तं दन्तम् "नर्त्तेऽनिलाद्रुक्" इत्यनुशासनादिदमुक्तं समूल इति। पूर्व्वोक्ताः 'सू० १४ अ०' अभिहिताः। चलमीषत्कम्प्युक्तमप्युत्तरं दन्तं नापहरेत् सर्व्वथा स्थिरबन्धनत्वानपायात्, अपहरेच्च चलमित्याकूतम्। अतोऽपरं दन्तं प्रति चलमपीति प्रतिषेधात्तथाविधस्योपरिजस्योद्धारोऽभ्यनु-ज्ञात इत्येव तत्त्वं दृष्टचरम्। स्वादुकण्टको विकङ्कतः 'वैंची' इति प्रथते। खादिरं खदिरसारः। तैलस्य मिलितानेकविलयस्य अनिल-घ्नानां 'सू० ३९ अ०' उक्तभद्रदार्व्वादीनाम्, तद्गर्विधानात्सा...।

स्नैहिकश्च हितो धूमो नस्यं स्निग्धश्च भोजनम् ।
रसो रसयवाग्वश्च क्षीरं सन्तानिका घृतम् ॥
शिरोवस्तिर्हितश्चापि क्रमो यश्चानिलापहः ॥ २२ ॥
अहिंसन् दन्तमूलानि शर्करामुद्धरेद्भिषक् ।
लाक्षाचूर्णैर्मधुयुतैस्ततस्ताः प्रतिसारयेत् ।
दन्तहर्षक्रिया चापि कुर्य्यान्निरवशेषतः ॥ २३ ॥
कपालिका कृच्छ्रतमा तत्राप्येषा क्रिया हिता ॥ २४ ॥
अथेद्विस्रावणैः स्विन्नमचलं क्रिमिदन्तकम् ।
तथावपीडैर्वातिघ्नैः स्नेहगण्डूषधारणैः ॥
भद्रदार्व्वादिवर्षाभूलेपैः स्निग्धैश्च भोजनैः ॥ २५ ॥
चलमुद्धृत्य च स्थानं विदहेच्छुषिरस्य च ।
ततो विदारीयष्ट्याह्व-शृङ्गाटककशेरुकैः ।
तैलं दशगुणे क्षीरे सिद्धं नस्ये हितं भवेत् ॥ २६ ॥
हनुमोक्षे समुद्दिष्टां कुर्य्याच्चार्दितवत् क्रियाम् ॥ २७ ॥
फलान्यम्लानि शीताम्बु रूक्षान्नं दन्तधावनम् ।
तथातिकठिनान् भक्ष्यान् दन्तरोगी विवर्ज्जयेत् ॥ २८ ॥

निर्व्यूढाः क्वाथाः । विस्रावणैर्लङ्घनैः शिग्रुतुत्थकादिलेपैश्चेत्यर्थः । चलं क्रिमिदन्तकमित्युत्तेयम् । शुषिरस्य स्थानं शुषिरम् । हनुमोक्ष इति । अर्दितवच्चिकित्सितत्वेन निर्द्दिष्टस्यास्य पृथगिह पाठोऽस्यफलप्रतिषेधार्थमित्यवगन्तव्यम् ॥ १८—२८ ॥

साध्यानां दन्तरोगाणां चिकित्सितमुदीरितम् ॥ २९ ॥
जिह्वागतानां साध्यानां कर्म्म वक्ष्यामि सिद्धये ।
ओष्ठप्रकोपेऽनिलजे यदुक्तं प्राक् चिकित्सितम् ।
कण्टकेष्वनिलोत्थेषु तत् कार्य्यं भिषजा भवेत् ॥
पित्तजेषु विघृष्टेषु निःसृते दुष्टशोणिते ।
प्रतिसारणगण्डूषं नस्यञ्च मधुरं हितम् ॥
कण्टकेषु कफोत्थेषु लिखितेष्वसृजः क्षये ।
पिप्पल्यादिर्मधुयुतः कार्य्यस्तु प्रतिसारणे ॥
गृह्णीयात् कवलांश्चापि गौरसर्षपसैन्धवैः ।
पटोलनिम्बवार्त्ताकु-क्षारयूषैश्च भोजयेत् ॥ ३० ॥
उपजिह्वान्तु संलिख्य क्षारेण प्रतिसारयेत् ।
शिरोविरेकगण्डूष धूमैश्चैनमुपाचरेत् ॥ ३१ ॥
जिह्वागतानां कर्म्मोक्तं तालव्यानां प्रवक्ष्यते ॥ ३२ ॥
अङ्गुष्ठाङ्गुलिसन्दंशेनाकृष्य गलशुण्डिकाम् ।
छेदयेन्मण्डलाग्रेण जिह्वोपरि तु संस्थिताम् ॥
नोत्कृष्टञ्चैव हीनञ्च त्रिभागं छेदयेद्भिषक् ।
अत्यादानात् स्रवेद्रक्तं तन्निमित्तं म्रियेत च ।
हीनच्छेदाद्भवेच्छोफो लाला निद्रा भ्रमस्तमः ।
तस्माद्वैद्यः प्रयत्नेन दृष्टकर्म्मा विशारदः ।

शिवेत्यादि पाठम् ॥ ३०—३१ ॥

गलशुण्डीन्तु संछिद्य कुर्य्यात् प्राप्तमिमं क्रमम्॥
मरिचातिविषा-पाठा-वचा-कुष्ठ-कुटन्नटैः।
क्षौद्रयुक्तैः सलवणैस्ततस्तां प्रतिसारयेत्॥
वचामतिविषां पाठां रास्नां कटुकरोहिणीम्।
निःक्वाथ्य पिचुमर्द्दञ्च कवलं तत्र योजयेत्॥
इङ्गुदी-किणिही-दन्ती-सरला-सुरदारुभिः।
पञ्चाङ्गीं कारयेत् पिष्टैर्वर्त्तिं गन्धोत्तरां शुभाम्॥
ततो धूमं पिबेज्जन्तुर्द्विरह्नः कफनाशनम्॥
क्षारसिद्धेषु मुद्गेषु यूषश्चाप्यशने हितः॥ ३३॥
तुण्डिकेर्य्यध्रुषे कूर्म्मे संघाते तालुपुप्पुटे।
एष एव विधिः कार्य्यो विशेषः शस्त्रकर्म्मणि॥ ३४॥
तालुपाके तु कर्त्तव्यं विधानं पित्तनाशनम्॥ ३५॥
स्नेहस्वेदौ तालुशोषे विधिश्चानिलनाशनः।
कीर्त्तितं तालुजानान्तु कण्ठानां कर्म्म वक्ष्यते॥ ३६॥
साध्यानां रोहिणीनान्तु हितं शोणितमोक्षणम्।
छर्द्दनं धूमपानञ्च गण्डूषो नस्यकर्म्म च॥

पञ्चाङ्गेति, अङ्गं प्रकरणागतम्, इमं वक्ष्यमाणम्। कुटन्नटः श्योनाकः। गन्धोत्तरां सुरभिगन्धाम्। तुण्डिकेरीत्यादि। पूर्व्वमष्टविध[illegible]ऽपि तुण्डिकेरीतालुपुप्पुटौ भेदौ, अध्रुषमांससंघातकूर्म्मौ मांसकच्छपाले- [illegible] मांस[illegible]चेति निरदिक्षत्तदिहमुक्तं [illegible] इति॥ ३२—३६॥

वातिकीन्तु हृते रक्ते लवणैः प्रतिसारयेत् ।
सुखोष्णान् स्नेहगण्डूषान् धारयेच्चाप्यभीक्ष्णशः ॥
पतङ्गशर्कराक्षौद्रैः पैत्तिकीं प्रतिसारयेत् ।
द्राक्षापरूषकक्वाथौ हितौ च कवलग्रहे ॥
आगारधूमकटुकैः श्लैष्मिकीं प्रतिसारयेत् ।
श्वेताविडङ्गदन्तीषु तैलं सिद्धं ससैन्धवम् ॥
नस्यकर्म्मणि योक्तव्यं तथा कवलधारणे ।
पित्तवत् साधयेद्वैद्यो रोहिणीं रक्तसम्भवाम् ॥ ३७ ॥
विस्राव्य कण्ठशालूकं साधयेत् तुण्डिकेरिवत् ।
एककालं यवान्नञ्च भुञ्जीत स्निग्धमल्पशः ॥ ३८ ॥
उपजिह्विकवच्चापि साधयेदधिजिह्विकाम् ॥ ३९ ॥
एकवृन्दन्तु विस्राव्य विधिं शोधनमाचरेत् ॥ ४० ॥
गिलायुश्चापि यो व्याधिस्तञ्च शस्त्रेण साधयेत् ॥ ४१ ॥
अमर्म्मस्थं सुपक्वञ्च भेदयेद्गलविद्रधिम् ॥ ४२ ॥
वातात् सर्व्वसरं चूर्णैर्लवणैः प्रतिसारयेत् ।
तैलं वातहरैः सिद्धं हितं कवलनस्ययोः ॥
ततोऽस्मै स्नैहिकं धूममिमं दद्याद्विचक्षणः ।
शालराजादनैरण्ड-सारेङ्गुदिमधूकजाः ॥

साध्यानामित्यादि । साध्यानां सन्निपातव्यतिरिक्तानाम् । हृतेरक्त-स्रुत्सरणाच्छादनादयुत्वाद्यथाक्रमती । गिलायुरिति 'शस्त्रेण साधयेत् ॥ सू० ३१ अ०' अभिधीयते ज्ञेयम् । शालेत्यादि । सारेङ्गुदी श्रेष्ठेङ्गुदी इङ्गुदकाष्ठेङ्गुदीति

मञ्जानो गुग्गुलुध्याम-मांसीकालानुसारिवाः ।
श्रीसर्ज्जरसशैलेय-मधूच्छिष्टानि चाहरेत्
तत्सर्व्वं सुकृतं चूर्णं स्नेहेनालोड्य युक्तितः ।
टुण्टुकत्वक् सक्षौद्रं मतिमांस्तेन लेपयेत् ॥
एष सर्व्वसरे धूमः प्रशस्तः स्नैहिको मतः ।
कफघ्नो मारुतघ्नश्च मुखरोगविनाशनः ॥
पित्तात्मके सर्व्वसरे शुद्धकायस्य देहिनः ।
सर्व्वः पित्तहरः कार्य्यो विधिर्मधुरशीतलः ।
प्रतिसारणगण्डूष-धूमसंशोधनानि च ॥
कफात्मके सर्व्वसरे विधिं कुर्य्यात् कफापहम् ।
पचेदतिविषां पाठां मुस्तञ्च सुरदारु च ॥
रोहिणीं कटुकाख्याञ्च कुटजस्य फलानि च ।
गवां मूत्रेण मनुजो भागैर्धरणसम्मितैः ॥
एष सर्व्वान् कफकृतान् रोगान् योगोऽपकर्षति ॥ ४३ ॥
क्षीरेक्षुरसगोमूत्र-दधिमस्त्वम्लकाञ्जिकैः ।
विदध्यात् कवलान् वीक्ष्य दोषं तैलघृतैरपि ॥ ४४ ॥
रोगाणां मुखजातानां साध्यानां कर्म्म कीर्त्तितम् ।

यावत् । 'क्षारः × × × वरे' इति मेदिनी । ये मञ्जानस्तानित्येवं भक्षणीयम् । श्रीसंवङ्गम् । चार्य्यमाचक्षाणोऽयं वाग्भटः सर्व्वाण्येव चाहयेतीति तदिदमुक्तं तत्सर्व्वमिति टुण्टुकः श्योनाकः ॥ ३९—४३ ॥

क्षीरेत्यादि । अत्र वीक्ष्येति विशेषणात् क्षीरदधिमस्त्वम्लकाञ्जिकैः कृतैर्व्वातात्मके पित्तात्मके क्षीरेक्षुरसघृतैः कफात्मके च मूत्रैस्तैलैर्धेयम् ॥ ४४ ॥

असाध्या अपि वक्ष्यन्ते रोगा ये यत्र कीर्त्तिताः ॥ ४५ ॥
ओष्ठप्रकोपा वर्ज्याः स्युर्मांस-रक्त-त्रिदोषजाः ।
दन्तमूलेषु वर्ज्यौ तु त्रिलिङ्गगतिशौषिरौ ॥ ४६ ॥
दन्तेषु च न सिध्यन्ति श्यावदालनभञ्जनाः ॥ ४७ ॥
जिह्वागतेष्वलासस्तु तालव्येष्वर्व्वुदं तथा ।
स्वरघ्नो वलयो वृन्दो वलासश्च विदारिका ।
गलौघो मांसतानश्च शतघ्नी रोहिणी गले ॥ ४८ ॥
असाध्याः कीर्त्तिता ह्येते रोगा नव दशैव च ।
तेषाञ्चापि क्रियां वैद्यः प्रत्याख्याय समाचरेत् ॥ ४९ ॥
इति सुश्रुतसंहितायां चिकित्सितस्थाने मुखरोगचिकित्सितं
नाम द्वाविंशोऽध्यायः ॥ २२ ॥

रोगाणामित्यादि । अत्र तेषामिति बाहुल्यापेक्षयादुपदिश्यत इति गम्यते अञ्जनादीनां केषाञ्चित् सर्व्वथैव निष्प्रत्यनीकत्वेनोपलम्भात् । तच्च-त्वसा क्रियां समाचरेदित्यपरिष्फुटमर्थं सर्व्वभिषजो विज्ञास्यन्तीति ब्रूमः । एष्वोष्ठप्रकोपाणां शोणितावसेचनं यथायोगं संशोधनञ्च, त्रिलिङ्गगतेरग्निना दाहः, शौषिरोऽत्र महाशौषिरस्तस्य च 'सू० ११ अ०' उक्तेन क्षारेण प्रतिसारणम्, दालनस्य स्नेहावलेपनम्, अलासस्य शस्त्रक्षारान्यवचारणं जीवनीयोपयोगश्च, अर्व्वुदस्य शस्त्रक्षारोपयोगो विस्रावणञ्च शेषाणान्तु मरिचक्षारादीनान्दाद्युपयोगेन विस्रावणं कार्य्यमित्युपदेष्टव्यमिति । परिशिष्ट-मतिरोहितार्थम् ॥ ४५—४८ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
चिकित्सितस्थाने मुखरोगचिकित्सितं नाम द्वाविंशोऽध्यायः ।

त्रयोविंशोऽध्यायः ।

अथातः शोफानां चिकित्सितं व्याख्यास्यामः ॥ १ ॥

षड्विधोऽवयवसमुत्थः शोफोऽभिहितो लक्षणतः, प्रतीकारतश्च । सर्व्वसरस्तु पञ्चविधः । तद्यथा-वात-पित्त-श्लेष्म-सन्निपात-विषनिमित्तः ॥ २ ॥

तत्रापि तर्पितस्याध्वगमनादतिमात्रमभ्यवहरतो वा पिष्टान्न-हरितक-शाक-लवणानि, क्षीणस्य वातिमात्रमम्लमुपसेवमानस्य मृत्पङ्कलोष्टकाष्ठशर्करानूपौदकमांससेवनादजीर्णिनो वा ग्राम्यधर्मसेवनाद्विरुद्धाहारसेवनाद्धस्त्यश्वोष्ट्ररथपदातिसंक्षोभणाद्दोषा धातून् प्रदूष्य श्वयथुमापादयन्त्यखिले शरीरे ॥ ३ ॥

तत्र वातश्वयथुररुणः कृष्णो वा मृदुरनवस्थितः, तोदादयश्चात्र वेदनाविशेषाः ॥ ४ ॥

पित्तश्वयथुः पीतो रक्तो वा शीघ्रानुसारी, ओषचोषादयश्चात्र वेदनाविशेषाः ॥ ५ ॥

श्लेष्मश्वयथुः पाण्डुः शुक्लो वा स्निग्धः कठिनः शीतो मन्दानुसारी, कण्ड्वादयश्चात्र वेदनाविशेषाः ॥ ६ ॥

प्रायेण हि मुखरोगाः शोफसमुत्थाना भवन्तीति तत्प्रसङ्गेनोद्दिष्ट तदा प्रसङ्गाच्छोफानां चिकित्सितमधिकरोति अथात इत्यादिना ॥ १ ॥

सन्निपातश्वयथुः सर्व्ववर्णवेदनः ॥ ७ ॥

विषनिमित्तस्तु गरोपयोगाद्दुष्टतोयसेवनात् प्रक्लोथोद-कावगाहनात् सविषसत्त्वदिग्धचूर्णनावचूर्णनाद्वा सविष-मूत्रपुरीषशुक्रस्पृष्टानां तृणकाष्ठादीनां संस्पर्शनात्। स तु मृदुः क्षिप्रोत्थानोऽवलम्बी चलो वा दाहपाकप्रायश्च भवति ॥८

भवन्ति चात्र ।

दोषाः श्वयथुमूर्द्धं हि कुर्व्वन्त्यामाशयस्थिताः ।
पक्काशयस्था मध्ये च वर्च्चःस्थानगतास्त्वधः ॥
कृत्स्नं देहमनुप्राप्ताः कुर्य्युः सर्व्वसरं तथा ॥ ९ ॥
श्वयथुर्मध्यदेशे यः स कष्टः सर्व्वगश्च यः ॥ १० ॥
अर्द्धाङ्गेऽरिष्टभूतश्च यश्चोर्द्ध्वं परिसर्पति ।
श्वासः पिपासा दौर्व्वल्यं ज्वरश्छर्द्दिररोचकः ॥
हिक्कातीसारकासाश्च शूनं सङ्क्षपयन्ति हि ।
सामान्यतो विशेषाच्च तेषां वक्ष्यामि भेषजम् ॥ ११ ॥

शोफिनः सर्व्व एव परिहरेयुरम्ललवणदधिगुड़वसापय-स्तैलघृतपिष्टमयगुरूणि ॥ १२ ॥

तत्र वातश्वयथौ चैहृतमेरण्डतैलं वा मासमर्द्धमासं वा पाययेत् । न्यग्रोधादिकषायसिद्धं सर्पिः पित्तश्वयथौ । आर-

---

नर्व्वास्मिन् शरीरे नानाजातीयानेव शोफानवलोकयामो तेषु पुन-र्द्धा भिद्यन्ते शरीरैकदेशोत्थितत्वेन सर्व्वसरत्वेनचेत्यतो भगवदनमनुमोय

स्वधादिसिद्धं श्लेष्मश्वयथौ। सन्निपातश्वयथौ स्नुहीक्षीरपाणं द्वादशभिरम्लपालैः प्रतिसंसृष्टं दन्तीप्रतिवापं सर्पिः पाचयित्वा पाययेत्। विषनिमित्ते कल्पेषु प्रतीकारः॥ १३ ॥

अथातः सामान्यचिकित्सितं व्याख्यास्यामः ॥ १४ ॥

तिल्वकघृतचतुर्थानि यान्युक्तान्युदरेषु तु ततोऽन्यतममुपयुज्यमानं श्वयथुमपहन्ति। मूत्रवर्त्तिक्रियां वा सेवयेत्। नवायसं वाऽहरहर्मधुना। विड़ङ्गातिविषाकुटजफलभद्रदारुनागरमरिचचूर्णं वा धरणमुष्णाम्बुना। त्रिकटुक्षारायश्चूर्णानि वा त्रिफलाकषायेण मूत्रं वा तुल्यक्षीरं हरीतकीं वा तुल्यगुड़ामुपयुञ्जीत। देवदारुशुण्ठीं वा गुग्गुलुं वा मूत्रेण वर्षाभूकषायानुपानं वा; तुल्यगुड़ं शृङ्गवेरं वा वर्षाभूकषायं; मूलकल्कं वा सशृङ्गवेरं पयोऽनुपानमहरहर्मासम्। व्योषवर्षाभूकषायसिद्धेन वा सर्पिषा मुद्गाल्लम्बान् भक्षयेत्। पिप्पलीपिप्पलीमूलचव्यचित्रकमयूरवर्षाभूसिद्धं वा क्षीरं पिबेत्। महौषधसुरङ्गीमूलसिद्धं वा त्रिकटुकैरण्डमूलश्यामामूलसिद्धं वा, वर्षाभूशृङ्गवेरसहादेवदारुसिद्धं वा तथालाबूविभीतकफलकल्कं वा तण्डुलाम्बुना॥ १५ ॥

त्रिभागावशिष्टे तयोः .... व्याधिकीर्षसौक्षात यत्रिति। सजगतोऽभिहितः 'सू० १७ अ०' प्रतीकाराश्च 'सू० १८ अ०' 'चि० १ अ०' इति

क्षारपिप्पलीमरिचशृङ्गवेरानुसिद्धेन च मुद्गयूषेणालवणेनाल्पस्नेहेन भोजयेद् यवान्नं गोधूमान्नं वा, हस्तिकार्कनक्तमालनिम्बवर्षाभूक्वाथैश्च परिषेकः, सर्षपसौवर्चलसैन्धवशार्ङ्गेष्टाभिश्च प्रदेहः कार्य्यः। यथादोषञ्च विरेचनास्थापनानि तीक्ष्णान्यजस्रमुपसेवेत स्नेहस्वेदोपनाहांश्च, शिराभिश्चाभीक्ष्णं शोणितमवसेचयेदन्यत्रोपद्रवशोफादिति ॥ १६ ॥

भवति चात्र।

पिष्टान्नमम्लं लवणानि मद्यं मृदं दिवास्वप्नमजाङ्गलञ्च।
स्त्रियो घृतं तैलपयोगुरूणि शोफं जिघांसुः परिवर्ज्जयेत् तु ॥१७

इति सुश्रुतसंहितायां चिकित्सितस्थाने
शोफचिकित्सितं नाम
त्रयोविंशोऽध्यायः ॥ २३ ॥

शेषः। अतः शिष्टमेव व्याकरिष्याम इत्याशयेनोपदिश्यते सर्व्वेति। मूत्रेत्यादि। मूत्रसंसृष्टो वस्तिः मूत्रवस्तिः। देवदारु सहिता यष्टी देवदारुयष्टी। वर्षाभूकषायं वर्षाभूकषाययुक्तं शृङ्गवेरविशेषणं चैतत्। मूलकक्वाथमिति सन्निहितत्वादौपयोगिकत्वाच्च वर्षाभ्वाएवेति ज्ञेयम्। मुद्गाद्यम्बान् मुद्गोपजीव्यान् यूषादीनित्यर्थः। मुद्गोलुम्बानितिचेत्पाठस्तर्हि लुम्बो विजिज्ञासितव्यः। परिशिष्टं निगदव्याख्यातम् ॥ २—१७ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये चिकित्सितस्थाने शोफचिकित्सितं नाम त्रयोविंशोऽध्यायः।

चतुर्विंशोऽध्यायः ।

अथातोऽनागताबाधप्रतिषेधनीयं चिकित्सितं व्याख्यास्यामः ॥ १ ॥

उत्थायोत्थाय सततं स्वस्थेनारोग्यमिच्छता ।
धीमता यदनुष्ठेयं तत् सर्व्वं सम्प्रवक्ष्यते ॥ २ ॥

तत्रादौ दन्तपवनं द्वादशाङ्गुलमायतम् ।
कनिष्ठिकापरीणाहमृज्वग्रथितमव्रणम् ॥

अयुग्मग्रन्थि यच्चापि प्रत्यग्रं शस्तभूमिजम् ।
अवेक्ष्यर्त्तुञ्च दोषञ्च रसं वीर्य्यञ्च योजयेत् ॥

कषायं मधुरं तिक्तं कटुकं प्रातरुत्थितः ।

भगवन् शास्त्रमिदं व्याध्युपसृष्टानां व्याधिपरिमोक्षार्थं स्वस्थस्य रक्षार्थञ्चोपदिश्यत इति निरदिक्षत् तत्र च स्वस्थस्य रक्षणमेव वरिष्ठमवगच्छामस्तेन हि क्लेशबहुलप्रतीकारा व्याधयः सुदूरमवतिष्ठन्ते, वदन्ति च "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" इति तदिदानीं तदेव श्रोतुमिच्छाम स्त्वत्तो भवतः पादावुपसङ्गृह्येति कौतुकान्निजशिष्याणामुपजायमानां विरोधिजिज्ञासां निराकृत्य शिष्यान् पुनः कृतार्थीकुर्व्वन्ननागताबाधप्रतिषेधनीयं नामाधिकरोति अथात इत्यादिना । अनुत्पन्नानां व्याधीनां प्रतिषेधो ऽनुत्पादप्रयोजकव्यापारस्तमधिकृत्य कृतोऽध्यायोऽनागताबाधप्रतिषेधनीयः ॥ १ ॥

निम्बश्च तिक्तके श्रेष्ठः कषाये खदिरस्तथा।
मधुको मधुरे श्रेष्ठः करञ्जः कटुके तथा॥ ३॥
क्षौद्रव्योषत्रिवर्गाक्तं सतैलं सैन्धवेन च।
चूर्णेन तेजोवत्याश्च दन्तान् नित्यं विशोधयेत्॥
एकैकं घर्षयेद्दन्तं मृदुना कूर्च्चकेन च।
दन्तशोधनचूर्णेन दन्तमांसान्यबाधयन्॥
तद्दौर्गन्ध्योपदेहौ तु श्लेष्माणञ्चापकर्षति।
वैशद्यमन्नाभिरुचिं सौमनस्यं करोति च॥ ४॥
न खादेद्गलताल्वोष्ठ-जिह्वारोगसमुद्भवे।
अथास्यपाके श्वासे च कासहिक्कावमीषु च॥
दुर्ब्बलोऽजीर्णभक्तश्च मूर्च्छार्त्तो मदपीड़ितः।
शिरोरुगार्त्तस्तृषितः श्रान्तः पानक्लमान्वितः॥
अर्द्दिती कर्णशूली च दन्तरोगी च मानवः॥ ५॥
जिह्वानिर्लेखनं रौप्यं सौवर्णं वार्क्षमेव च।
तन्मलापहरं शस्तं मृदु श्लक्ष्णं दशाङ्गुलम्।
मुखवैरस्यदौर्गन्ध्य-शोफजाड्यहरं सुखम्॥ ६॥

तन्मयेति। अथदोषर्त्तुविपर्य्यासेनोपयोक्तुमिदमुच्यते अथैवेति। क्षौद्रेत्यादौ द्वितीयान्तं क्रियाविशेषणं सैन्धवेनेत्यादिना विशोधयेदित्यन्तेनान्वेति। त्रिवर्गस्त्रिफला कूर्च्चको नाम अग्रभागे रचनाविशेषेण त्रिवक्त्रा शूकरादि रोमराजी 'ब्रुश' इति 'कुँचि' इति चाभिधीयते। दन्तशोधनचूर्णेन व्योषादिनैवान्येन वा तथाविधेनेति ज्ञेयम्। उपदेहोमलो-

दन्तदार्ढ्यकरं रुच्यं स्नेहगण्डूषधारणम् ॥ ७ ॥
क्षीरवृक्षकषायैर्वा क्षीरेण च विमिश्रितैः ।
भिल्लोदककषायेण तथैवामलकस्य वा ॥
प्रक्षालयेन्मुखं नेत्रे स्वस्थः शीतोदकेन वा ।
नीलिकां मुखशोषञ्च पिड़कां व्यङ्गमेव च ॥
रक्तपित्तकृतान् रोगान् सद्य एव विनाशयेत् ।
मुखं लघु निरीक्षेत दृढं पश्यति चक्षुषा ॥ ८ ॥
मतं स्रोतोऽञ्जनं श्रेष्ठं विशुद्धं सिन्धुसम्भवम् ।
दाहकण्डूमलघ्नञ्च दृष्क्लेदरुजापहम् ।
चक्षोरूपावहञ्चैव सहते मारुतातपौ ॥ ९ ॥
न नेत्ररोगा जायन्ते तस्मादञ्जनमाचरेत् ॥ १० ॥
भुक्तवान् शिरसा स्नातः श्रान्तश्छर्दनवाहनैः ।
रात्रौ जागरितश्चापि नाञ्ज्यादज्वरित एव च ॥ ११ ॥
कर्पूरजातीकक्कोल-लवङ्गकटुकाह्वयैः ।
सचूर्णपूगैः सहितं पत्रं ताम्बूलजं शुभम् ॥
मुखवैशद्यसौगन्ध्य-कान्तिसौष्ठवकारकम् ।
हनुदन्तस्वरमल-जिह्वेन्द्रियविशोधनम् ॥
प्रसेकशमनं हृद्यं गलामयविनाशनम् ।
पथ्यं सुप्तोत्थिते भुक्ते स्नाते वान्ते च मानवे ॥

रक्तपित्त-क्षतक्षीण-तृष्णा-मूर्च्छापरीतिनाम् ।
कण्ठदुर्व्वलमर्त्यानां न हितस्त्वास्यशोषिणाम् ॥ ११ ॥
शिरोगतांस्तथा रोगान् शिरोऽभ्यङ्गोऽपकर्षति ।
केशानां मार्द्दवं दैर्घ्यं बहुत्वं स्निग्धकृष्णताम् ॥
करोति शिरसस्तृप्तिं सुत्वक्कमपि चाननम् ।
सन्तर्पणञ्चेन्द्रियाणां शिरसः प्रतिपूरणम् ॥ १२ ॥
मधुकं क्षीरशुक्ला च सरलं देवदारु च ।
क्षुद्रकं पद्मनामानं समभागानि संहरेत् ॥
तेषां कल्ककषायाभ्यां चक्रतैलं विपाचयेत् ।
सदैव शीतलं जन्तोर्मूर्द्ध्नि तैलं प्रदापयेत् ॥ १४ ॥
केशप्रसाधनी केश्या रजोजन्तुमलापहा ॥ १५ ॥
हनुमन्याशिरःकर्णशूलघ्नं कर्णपूरणम् ॥ १६ ॥
अभ्यङ्गो मार्द्दवकरः कफवातनिरोधनः ।
धातूनां पुष्टिजननो मृजावर्णबलप्रदः ॥ १७ ॥
सेकः श्रमघ्नोऽनिलहृद्भग्नसन्धिप्रसाधकः ।
क्षताग्निदग्धाभिहत-विघृष्टानां रुजापहः ॥ १८ ॥

प्रलेपः । न खादेद् दन्तशोधनार्थं किमपि न मुखमध्ये प्रवेशयेत् । शिरो-ऽभ्यः ॥ २—१३ ॥

मधुकमित्यादि । क्षीरशुक्ला शृङ्गाटकः पयस्या फलमत्र ग्राह्यम् । क्षुद्रकः पद्मनामा काष्ठीयः पद्ममूलसमाख्योऽयम् । चक्र तैलमिति पूर्वा-

जलसिक्तस्य वर्द्धन्ते यथा मूलेऽङ्कुरास्तरोः ।
तथा धातुविवृद्धिर्हि स्नेहसिक्तस्य जायते ॥ १९ ॥
शिरामुखै रोमकूपैर्धमनीभिश्च तर्पयन् ।
शरीरबलमाधत्ते युक्तः स्नेहोऽवगाहने ॥ २० ॥
तत्र प्रकृतिसात्म्यर्त्तु-देशदोषविकारवित् ।
तैलं घृतं वा मतिमान् युञ्ज्यादभ्यङ्गसेकयोः ॥ २१ ॥
केवलं सामदोषेषु न कथञ्चन योजयेत् ।
तरुणज्वर्य्यजीर्णी च नाभ्यक्तव्यौ कथञ्चन ।
तथा विरिक्तो वान्तश्च निरूढो यश्च मानवः ॥ २२ ॥
पूर्व्वयोः कृच्छ्रता व्याधेरसाध्यत्वमथापि वा ।
शेषाणां तदहः प्रोक्ता अग्निमान्द्यादयो गदाः ॥ २३ ॥
सन्तर्पणसमुत्थानां रोगाणां नैव कारयेत् ॥ २४ ॥
शरीरायासजननं कर्म्म व्यायामसंज्ञितम् ।
तत् कृत्वा तु सुखं देहं विमृद्नीयात् समन्ततः ॥
शरीरोपचयः कान्तिर्गात्राणां सुविभक्तता ।

वार्य्यप्रसिद्धा संज्ञा । केशप्रसाधनी कङ्कतिका । जन्तुरत्र यूकालिक्षाद्य । कर्ण-पूरणं तैलेनेति बोध्यम् । धातूनामित्यादौ मृजा निर्म्मलत्वम् । सेकोऽत्र केशे-मार्द्रीकरणमित्येव शेषं विवरणम् । अवगाहने अवगाहनकाले युक्तः प्रयुक्तः । शेषाणामित्यादौ तदहरिति सद्य एवाग्निमान्द्यादीनामवश्यम्भावित्वं निवे-दयति ॥ १४—२४ ॥

दीप्ताग्नित्वमनालस्यं स्थिरत्वं लाघवं मृजा ॥
श्रमक्लमपिपासोष्ण-शीतादीनां सहिष्णुता ।
आरोग्यञ्चापि परमं व्यायामादुपजायते ॥
न चास्ति सदृशं तेन किञ्चित् स्थौल्यापकर्षणम् ।
न च व्यायामिनं मर्त्त्यमर्दयन्त्यरयो भयात् ॥
न चैनं सहसाक्रम्य जरा समधिरोहति ।
स्थिरीभवति मांसञ्च व्यायामाभिरतस्य च ॥
व्यायामस्विन्नगात्रस्य पद्भ्यामुद्वर्त्तितस्य च ।
व्याधयो नोपसर्पन्ति सिंहं क्षुद्रमृगा इव ॥
वयोरूपगुणैर्हीनमपि कुर्य्यात् सुदर्शनम् ॥
व्यायामं कुर्व्वतो नित्यं विरुद्धमपि भोजनम् ।
विदग्धमविदग्धं वा निर्द्दोषं परिपच्यते ॥
व्यायामो हि सदा पथ्यो बलिनां स्निग्धभोजिनाम् ।
स च शीते वसन्ते च तेषां पथ्यतमः स्मृतः ॥
सर्व्वेष्वृतुष्वहरहः पुम्भिरात्महितैषिभिः ।
बलस्यार्द्धेन कर्त्तव्यो व्यायामो हन्त्यतोऽन्यथा ॥
हृदि स्थानस्थितो वायुर्यदा वक्त्रं प्रपद्यते ।
व्यायामं कुर्व्वतो जन्तोस्तद्बलार्द्धस्य लक्षणम् ॥

शरीरेत्यादि । मृजाऽत्र स्वेदेन संवृत्तिः । नचेत्यादि । अयं अहर्न्निशि

वयोबलशरीराणि देशकालाशनानि च ।
समीक्ष्य कुर्य्याद् व्यायाममन्यथा रोगमाप्नुयात् ॥ २५ ॥
क्षयतृष्णारुचिच्छर्द्दि-रक्तपित्तभ्रमक्लमाः ।
कासशोषज्वरश्वासा अतिव्यायामसम्भवाः ॥ २६ ॥
रक्तपित्ती कृशः शोषी श्वासकासक्षतातुरः ।
भुक्तवान् स्त्रीषु च क्षीणो भ्रमार्त्तश्च विवर्ज्जयेत् ॥ २७ ॥
उद्वर्त्तनं वातहरं कफमेदोविलापनम् ।
स्थिरीकरणमङ्गानां त्वक्प्रसादकरं परम् ॥ २८ ॥
शिरामुखविविक्तत्वं त्वक्स्थस्याग्नेश्च तेजनम् ।
उद्धर्षणोत्सादनाभ्यां जायेयातामसंशयम् ॥ २९ ॥
उत्सादनाद्भवेत् स्त्रीणां विशेषात् कान्तिमद्वपुः ।
प्रहर्षसौभाग्यमृजा-लाघवादिगुणान्वितम् ।
उद्धर्षणन्तु विज्ञेयं कण्डूकोठानिलापहम् ॥ ३० ॥
ऊर्व्वोः सञ्जनयत्याशु फेनकः स्थैर्य्यलाघवे ।
कण्डूकोठानिलस्तम्भ-मलरोगापहश्च सः ॥ ३१ ॥
तेजनं त्वग्गतस्याग्नेः शिरामुखविरेचनम् ।
उद्धर्षणन्त्विष्टिकया कण्डूकोठविनाशनम् ॥
निद्रादाहश्रमहरं क्लेदकण्डूतृषापहम् ॥ ३२ ॥

भवेत् । पञ्चरात्रवृत्तिं तथ्य पादावमर्द्दितश्च ॥ २५—३० ॥

हृद्यं मलहरं श्रेष्ठं सर्व्वेन्द्रियविशोधनम् ॥
तन्द्रापापोपशमनं तुष्टिदं पुंस्त्ववर्द्धनम् ।
रक्तप्रसादनञ्चापि स्नानमग्नेश्च दीपनम् ॥ ३३ ॥
उष्णेन शिरसः स्नानमहितं चक्षुषः सदा ।
शीतेन शिरसः स्नानं चक्षुष्यमिति निर्द्दिशेत् ॥ ३४ ॥
श्लेष्ममारुतकोपे तु ज्ञात्वा व्याधिबलाबलम् ।
काममुष्णं शिरःस्नानं भैषज्यार्थं समाचरेत् ॥ ३५ ॥
अतिशीताम्बु शीते च श्लेष्ममारुतकोपनम् ॥ ३६ ॥
अत्युष्णमुष्णकाले च पित्तशोणितवर्द्धनम् ॥ ३७ ॥
तच्चातिसारज्वरित-कर्णशूलानिलार्त्तिषु ।
आध्मानारोचकाजीर्ण-भुक्तवत्सु च गर्हितम् ॥ ३८ ॥
सौभाग्यदं वर्णकरं प्रीत्योजोबलवर्द्धनम् ।
स्वेददौर्गन्ध्यवैवर्ण्य-श्रमघ्नमनुलेपनम् ॥
स्नानं येषां निषिद्धन्तु तेषामप्यनुलेपनम् ॥ ३९ ॥
रक्षोघ्नमथ चौजस्यं सौभाग्यकरमुत्तमम् ।
सुमनोऽम्बररत्नानां धारणं प्रीतिवर्द्धनम् ॥ ४० ॥
मुखालेपाद्दृढं चक्षुः पीनगण्डं तथाननम् ।
अव्यङ्गपिडकं कान्तं भवत्यम्बुजसन्निभम् ॥ ४१ ॥

उर्व्वीरित्यादि । फेनकः समुद्रफेनः । सञ्जनयति प्रजातमाहुर्व्वी-

पक्ष्मलं विशदं कान्तममलोज्ज्वलमण्डलम् ।
नेत्रमञ्जनसंयोगाद्भवेच्चामलतारकम् ॥ ४२ ॥
यशस्यं स्वर्ग्यमायुष्यं धनधान्यविवर्द्धनम् ।
देवतातिथिविप्राणां पूजनं गोप्रवर्द्धनम् ॥ ४३ ॥
आहारः प्रीणनः सद्योबलकृद्देहधारकः ।
आयुस्तेजःसमुत्साह-स्मृत्योजोऽग्निविवर्द्धनः ॥ ४४ ॥
पादप्रक्षालनं पादमलरोगश्रमापहम् ॥
चक्षुःप्रसादनं वृष्यं रक्षोघ्नं प्रीतिवर्द्धनम् ॥ ४५ ॥
निद्राकरो देहसुखश्चक्षुष्यः श्रमसुप्तिनुत् ।
पादत्वङ्मृदुकारी च पादाभ्यङ्गः सदा हितः ॥ ४६ ॥
पादरोगहरं वृष्यं रक्षोघ्नं प्रीतिवर्द्धनम् ।
सुखप्रचारमोजस्यं सदा पादत्रधारणम् ॥ ४७ ॥
अनारोग्यमनायुष्यं चक्षुषोरुपघातकृत् ।
पादाभ्यामनुपानद्भ्यां सदा चंक्रमणं नृणाम् ॥ ४८ ॥
पापोपशमनं केश-नखरोमापमार्ज्जनम् ।
हर्षलाघव-सौभाग्यकरमुत्साहवर्द्धनम् ॥ ४९ ॥
वासधारं मृजा-वर्ण-तेजो-बलविवर्द्धनम् ॥ ५० ॥
पवित्रं केश्यमुष्णीषं वातातपरजोऽपहम् ॥ ५१ ॥

नेति नेत्रम् । सुमनः पुष्पम् ॥ ४१—४८ ॥
पापेत्यादि । पापोपशमनं निर्मलीकरणम् "केशश्मश्रुनखादीनां

वर्षानिलरजोघर्म्म हिमादीनां निवारणम् ।
वर्ण्यं चक्षुष्यमौजस्यं शङ्करं छत्रधारणम् ॥ ५२ ॥
शुनः सरीसृपव्याल-विषाणिभ्यो भयापहम् ।
श्रमस्खलनदोषघ्नं स्थविरे च प्रशस्यते ॥
सत्त्वोत्साहबलस्थैर्य्य-धैर्य्यवीर्य्यविवर्द्धनम् ।
अवष्टम्भकरश्चापि भयघ्नं दण्डधारणम् ॥ ५३ ॥
आस्या वर्णकफस्थौल्य-सौकुमार्य्यकरी सुखा ॥ ५४ ॥
अध्वा वर्णकफस्थौल्य-सौकुमार्य्यविनाशनः ॥ ५५ ॥
अत्यध्वा विपरीतोऽस्माज्जरादौर्ब्बल्यकृच्च सः ॥ ५६ ॥
यत्तु चंक्रमणं नातिदेहपीड़ाकरं भवेत् ।
तदायुर्बलमेधाग्निप्रदमिन्द्रियबोधनम् ॥ ५७ ॥
श्रमानिलहरं वृष्यं पुष्टिनिद्राधृतिप्रदम् ।
सुखं शय्यासनं दुःखं विपरीतगुणं मतम् ॥ ५८ ॥
बालव्यजनमौजस्यं मक्षिकादीनपोहति ।
शोषदाहश्रमस्वेद-मूर्च्छाघ्नो व्यजनानिलः ॥ ५९ ॥
प्रीतिनिद्राकरं वृष्यं कफवातश्रमापहम् ।
संवाहनं मांसरक्तत्वक्प्रसादकरं सुखम् ॥ ६० ॥

कत्वनं धर्म्मसादनम्" इति तन्त्रान्तरम् । वारवार: कवच: । शङ्करं मान्नत्वम् । अवष्टम्भ:प्रतिष्ठानं स्खलनप्रतिबन्धीति यावत् । अध्वेति अध्वशब्देन पतिवत्रमपि तात्पर्य्यमिति गम्यते "यत्तु चंक्रमणं नाति"

प्रवातं रौक्ष्यवैवर्ण्य-स्तम्भकृद्दाहपित्तनुत्।
स्वेदमूर्च्छापिपासाघ्नमप्रवातमतोऽन्यथा ॥ ६१ ॥
सुखं वातं प्रसेवेत ग्रीष्मे शरदि मानवः।
निवातं त्वायुषे सेव्यमारोग्याय च सर्व्वदा ॥ ६२ ॥
आतपः पित्ततृष्णाग्नि स्वेदमूर्च्छाभ्रमास्रकृत्।
दाहवैवर्ण्यकारी च छाया चैतानपोहति ॥ ६३ ॥
अग्निर्वातकफस्तम्भ-शीतवेपथुनाशनः।
आमाभिष्यन्दजरणो रक्तपित्तप्रदूषणः ॥ ६४ ॥
पुष्टिवर्णबलोत्साहमग्निदीप्तिमतन्द्रिताम्।
करोति धातुसाम्यञ्च निद्रा काले निषेविता ॥ ६५ ॥

तत्रादित एव लोचनचरणौ शुचिना शुक्लवाससा लघूष्णीषच्छत्रोपानत्केन दण्डपाणिना काले हितमितमधुरपूर्व्वाभिभाषिणा बन्धुभूतेन भूतानां गुरुवृद्धानुमतेन सुसहाये-

---

इत्यमन्तरोक्तेः। अध्वानमतिक्रान्तो अत्यध्वा परित्यक्ताध्वगतिरित्यर्थः। भावप्रधानोऽयं निर्देशः 'अविवेक्यादेः सिद्धिः" इतिवत्। अत्र "अविवेकित्वमविवेकि" इति तत्त्वकौमुद्यां वाचस्पतिमिश्राः। तथा चैकान्तेनाध्वगमनाभाव इति निष्कर्षः। अत्यध्वाऽविपरीतोऽक्षादिति पाठेतु अध्वाचंक्रमणमत्यध्वा च तद्वाक्यमित्युन्नेयम्। स्वमित्यादि। सुखं वहुक्षादिसुखयोगात् सुखावहम्, दुःखन्तु तद्विपर्य्यासात्। वालव्यजनं चामरव्यजनम्, व्यजनन्तु प्राधान्यात् तालपत्रकृतमित्येव प्रत्येतव्यम्। संवाहनमङ्गमर्द्दनम्। आमीयादिति शेषः ॥ ४८—६५ ॥

नानन्यमनसा खलूपचरितव्यम्। तद्दि न रात्रौ, न केशा-स्थि-कण्टकाश्म-तुष-भस्मोत्कर-कपालाङ्गारामेध्यस्नान-बलिभूमिषु, न विषमेन्द्रकीलचतुष्पथश्वभ्राणामुपरिष्टात् ॥ ६६ ॥

न राजद्विष्टपरुषपैशुन्यानृतानि वदेत्, न देवब्राह्मण-पितृपरिवादांश्च। न नरेन्द्रद्विष्टोन्मत्तपतितक्षुद्रनीचाचारा-नुपासीत ॥ ६७ ॥

वृक्षपर्वतप्रपातविषमवल्मीकदुष्टवाजिकुञ्जराद्यधिरोह-णानि परिहरेत्, पूर्णनदीसमुद्राविदितपल्वलश्वभ्रकूपावत-रणानि, भिन्नशून्यागारश्मशानविजनारण्यवासाग्निसंभ्रमव्या-लभुजङ्गकीटसेवाग्रामाघातकलहशस्त्रसन्निपातव्यालसरीसृपशृ-ङ्गिसन्निकर्षांश्च ॥ ६८ ॥

नाग्निगोगुरुब्राह्मणप्रेङ्खादम्पत्यन्तरेणाभियायात्। न शव-मनुयायात्। देवगोब्राह्मणचैत्यध्वजरोगिपतितपापकारिणाञ्च च्छायां नाक्रमेत। नास्तं गच्छन्तमुद्यन्तं वादित्यं वीक्षेत। गां धयन्तीं परशस्यं वा चरन्तीं परस्मै न कस्मैचिदाचक्षीत,

---

नचेत्यादि। उत्करस्तृणाद्यपसारणावकाशोराशिर्वा। इन्द्रकील-शब्दस्येह पर्व्वतसामान्ये तात्पर्य्यम्। पैशुन्यानुविद्धं वचनं पैशुन्यम्। परिवादोऽपवादः। अविदितं नक्रादिरक्षितत्वेनापरिज्ञातम्। पल्वलं स्वल्पसरः श्वभ्रं गर्त्तः, अग्निसंभ्रमोऽग्निपक्वलोद्वेगः। व्याल-दीनां सेवा परिपालनं नाम। ग्रामाघातो मरकः। प्रेङ्खा दोला त्रिविधेति यावत्।

नचोल्कापातेन्द्रधनूंषि । नाग्निं मुखेनोपधमेत् । नापो भूमिं वा पाणिपादेनाभिहन्यात् ॥ ६९ ॥

न वेगान् धारयेत् । न बहिर्व्वेगान् ग्रामनगरदेवतायतनश्मशानचतुष्पथसलिलाशयपथिसन्निकृष्टानुत्सृजेत् , न प्रकाशं , न वाय्वग्निसलिलसोमार्कगोगुरुप्रतिमुखम् ॥ ७० ॥

न भूमिं विलिखेत् । नासंवृतमुखः सदसि जृम्भोद्गारकासश्वयथूनुत्सृजेत् । न पर्य्यङ्किकावष्टम्भपादप्रसारणानि गुरुसन्निधौ कुर्य्यात् ॥ ७१ ॥

न बालकर्णनासास्रोतोदन्तविवराण्यभिकुष्णीयात् । न वेजयेत् केशमुखनखवस्त्रगात्राणि । न गात्रनखवक्त्रवादित्रं कुर्य्यात् । न काष्ठलोष्टतृणादीनभिहन्याच्छिन्द्याद्वा ॥ ७२ ॥

न प्रतिवातातपं सेवेत । न भुक्तमात्रोऽग्निमुपासीत । नोत्कटकस्तिष्ठेत् । नाल्पकाष्ठासनमध्यासीत । न ग्रीवां विषमं धारयेत् । न विषमकायः क्रियां भजेद्भुञ्जीत वा । न प्रततमीक्षेत विशेषाज्ज्योतिर्भास्करसूक्ष्मचलभ्रान्तानि । न भारं शिरसा वहेत् । न स्वप्नजागरशयनासनचंक्रमण-

---

धयन्तीं पिबन्तीम् । नेत्यादि । सन्निकृष्टानुपनाम्नानाम् बहिर्वेगान् ग्रामादिषु नोत्सृजेदिति योजना । गुरोः पर्य्यङ्कः पर्य्यङ्किका 'कुर्सि' इति प्रसिद्धमासनमितियावत् । अवष्टम्भस्तु पृष्ठोपधानं 'ताकिया' इति प्रथी । पर्य्यङ्किकावष्टम्भः पर्य्यङ्कावष्टम्भं वा नेत्यादि । बालः केशः । विवरं पुनःपुंसमेव प्रत्येतव्यम् । नवेजयेदिति "ओविजी भयचलनयोः" इत्यस्मा-

यानवाहन-प्रधावन-लङ्घन-प्लवन-प्रतरण-हास्यभाष्यव्यवायव्यायामादीनुचितानप्यतिसेवेत ॥ ७३ ॥

उचितादप्यहितात् क्रमशो विरमेत् हितमनुचितमप्यासेवेत क्रमशो न चैकान्ततः, पादहीनात् ॥ ७४ ॥

नावाक्‌शिराः शयीत । न भिन्नपात्रे नाञ्जलिपुटेनापः पिबेत् । काले हितमितस्निग्धमधुरप्रायमाहारं वैद्यप्रत्यवेक्षितमश्नीयात् । ग्रामगणगणिकापणिकश्रमणशठपतितभोजनानि परिहरेत् ; शेषाण्यपि च अनिष्टरूपरसगन्धस्पर्शशब्दमानसानि, अनेवंगुणान्यपि वा सम्भूय दत्तानि, तान्यपि मक्षिकाव्यालोपहतानि । नाप्रक्षालितपाणिपादो भुञ्जीत; न

रूपम् । नक्तं दिनञ्चेति पर्यायौ । लङ्घनमतिक्रम्य गमनमित्यनर्थान्तरम् । प्लवनमुत्प्लुत्य गमनम् ॥ ६६—७३ ॥

अभ्यस्तस्याप्यहितस्य त्यागक्रममाह सात्म्यस्य हितस्य चाभ्यासक्रममुपदिदिक्षुरुचितादित्यादिना । उक्तमर्थं पुनः स्फोरयति न चेति । न चैकान्ततो न सहसा ईदृशमिदं वेत्यर्थः । स्यादेतत् किंस्वरूपः पादाभिहतो प्रति क्रमस्तु मन्तव्याचार्याः ? आह पादहीनादिति । क्रमेण पादं पादं विहायैव विरमेदहितमभ्यस्तेऽपि हाने ऽत्ययः सम्भवतीत्यभिसन्धिः । एतेनैव सुखिताभ्यासितमपि सात्म्यापेक्षया पादाभिहतमेवासेवेतेति बुद्धिमानीहत्यनायासेनेति भगवानित एव विरराम । अत्र उचितादित्युपक्रम्य 'प्रक्षेपापचये ताभ्यां क्रमः पादांशिको भवेत् । एकान्तरं ततश्चोर्ध्वं द्व्यन्तरं त्र्यन्तरं तथा'' इति 'चरक सू० ७ अ०' विषयदृष्टमालोचेन । ग्रामेति । ग्रामभोजनं ग्रामाय'

मूत्रोच्चारपीड़ितः, न सन्ध्ययोः, नापाश्रितः, नातीतकालं हीनमतिमात्रञ्चेति ॥ ७५ ॥

न भुञ्जीतोद्धृतस्नेहं नष्टं पर्य्युषितं पयः ।
नात्मानमुदके पश्येन्नग्नः प्रविशेज्जलम् ॥ ७६ ॥
न नक्तं दधि भुञ्जीत न चाप्यघृतशर्करम् ।
नामुद्गयूषं नाक्षौद्रं नोष्णं नामलकैर्विना ॥
अन्यथा कुष्ठवीसर्पादीन् जनयेत् ॥ ७७ ॥

द्यूतमद्यादिसेवाप्रतिभूसाक्षित्वसमाह्वानगोष्ठीवादित्राणि न सेवेत । स्रजं छत्रोपानहौ व्यसनमतीतवासांसि न चान्यैर्धृतानि धारयेत् । ब्राह्मणमग्निं गाश्च नोच्छिष्टः स्पृशेत् ॥ ७८ ॥

बहुव्यापिकं नातीमसंघातासमिश्लेनत् गणभोजनं गणानां मठब्राह्मणसंघाना-मन्नमिति यावत् तथच "मनु अ० ४ श्लो० २१३। २१८। अनुसन्धायाश्ववैयम् शैवानि उत्तेजकानि भोजनानि । अनिष्टमानमानि च यत्र मनो न प्रसीदति । अनेवंगुणानि दृष्टरूपादीन्यपि वा भोजनानि सम्भूय दत्तानि बहुभिर्मिलित्वा यथेष्टं परिवेषितानि, तान्यनेवंगुणान्यपीत्यर्थः । उपहतानि दूषितानि परिच्छेदिनि पूर्ववान्वयः नापाश्रितः आसनानधिष्ठित । द्यूतेत्यादि । प्रतिभूर्लग्नको नाम 'जामिन' इत्याख्यायते । गोष्ठीचैव "एकासनस्थिता गोष्ठी केचिद्वीक्षन्ति संवृता" इत्यादि यद्वीन दामोदरोक्तलक्षणो गोष्ठिलक्षितः कथाविशेषः प्रस्तोतव्यः । वादित्रं मृदङ्गादि वाद्यम् । तथाच द्यूतादिविषयकं प्रतिभूलग्नादित्वात्मर्थप्राप्तं गोष्ठी वादित्रादिविषेत्यर्थः । अतीत वासांसि परित्यक्त वासांसि ॥ ७५—७८ ॥

भवन्ति चात्र ।

मुखमात्रं समासेन सद्गुणान्येतदीरितम् ।
आरोग्यमायुरर्थो वा नासंविद्भिः प्राप्यते नृभिः ॥ ७९ ॥
यस्मिन् यस्मिन्नृतौ ये ये दोषाः कुप्यन्ति देहिनाम् ।
तेषु तेषु प्रदातव्या रसास्ते ते विजानता ॥ ८० ॥
वर्षासु न पिबेत् तोयं पिबेच्छरदि मात्रया ।
वर्षासु चतुरो मासान् मात्रावदुदकं पिबेत् ॥
उष्णं हेमे वसन्ते च कामं ग्रीष्मे तु शीतलम् ।
हेमन्ते च वसन्ते च सोष्णमिष्टं पिबेन्नरः ॥
शृतशीतं पिबेद् ग्रीष्मे प्रावृट्काले रसं पिबेत् ।
यद्य वर्षति मध्यान्ते प्रपिबेच्छीतलं जलम् ॥ ८१ ॥
स्वस्थ एवमतोऽन्यस्तु दोषाहारमतानुगः ॥ ८२ ॥
क्षौद्रं सैन्धवचूर्णेन पिप्पलीभिश्च संयुतम् ।
पिबेदग्निविवृद्ध्यर्थं न च वेगान् विधारयेत् ॥ ८३ ॥
अग्निदीप्तिकरं नृणां रोगाणां शमनं प्रति ।
प्रावृट्शरद्वसन्तेषु सम्यक् स्नेहादिमाचरेत् ॥ ८४ ॥

सुखेत्यादि । सुखं पथ्यमित्यनर्थान्तरम् पश्येत् पिपासा वर्षास्वेकान्ततो प्रावृषि नहि तृप्तिरित्याह वर्षास्विति । मासान् श्रावणभाद्रमासाख्यान् । हेमे हेमन्ते । शीतलमिति शृतशीतलमिति बोध्यम् 'शृतशीतं पिबेद्-ग्रीष्मे' इत्यनन्तरोक्तेः । रसो मांसरसः । मध्यान्ते वर्षणान्ते शृतशीतं पाठः ।

आमे प्रच्छर्दनं पित्ते विरेको बस्तिरिष्यते ।
शस्यते त्रिष्वपि सदा व्यायामो दोषनाशनः ॥ ८५ ॥
भुक्तं विरुद्धमप्यन्नं व्यायामान्न प्रकुप्यति ॥ ८६ ॥
उत्सर्गमैथुनाहार-शोधने स्यात् तु तन्मनाः ॥ ८७ ॥
नेच्छेद्रोगभयात् प्राज्ञः पीड़ां वा कायमानसीम् ॥ ८८ ॥
अतिस्त्रीसंप्रयोगाच्च रक्षेदात्मानमात्मवान् ।
शूलकासज्वरश्वास-कार्श्यपाण्ड्वामयक्षयाः ॥
अतिव्यवायाज्जायन्ते रोगाश्चाक्षेपकादयः ॥
आयुष्मन्तो मन्दजरा वपुर्वर्णबलान्विताः ।
स्थिरोपचितमांसाश्च भवन्ति स्त्रीषु संयताः ॥
त्रिभिस्त्रिभिरहोभिर्हि समीयात् प्रमदां नरः ।
सर्व्वेष्वृतुषु घर्म्मेषु पक्षात् पक्षाद्व्रजेद्बुधः ॥
रजस्वलामकामाञ्च मलिनामप्रियां तथा ।
वर्णवृद्धां वयोवृद्धां तथा व्याधिप्रपीड़िताम् ॥

आमे इत्यादि । अतः प्रकाशादिरर्थः । दोषानुरूपाहारो दोषाहारः । बस्तिरिष्यते वायुविकारवताम् । उत्सर्गो मलमूत्रविसर्गः । शोधनं शरीरपरिमार्ज्जनं वमनादिकञ्च । पीड़ामपि बाधा दुःखं शोकादिका च रोगं नेच्छेत् नोत्पादयेत् ॥७८—८८ ॥

अतीत्यादि । पर्व्वाणि चतुर्द्दश्यादीनि आहुर्हि "चतुर्द्दश्यष्टमी चैव अमावस्या च पूर्णिमा । पर्व्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेव च" इति । स्त्रिया गमनं परिवर्ज्य इति तात्पर्य्यम् । अत्र अतिदुर्ब्बल

हीनाङ्गीं गर्भिणीं द्वेष्यां योनि-दोषसमन्विताम्।
सगोत्रां गुरुपत्नीञ्च तथा प्रव्रजितामपि।
सन्ध्यापर्व्वस्वगम्यासु नोपेयात् प्रमदां नरः॥
ग्रामर्गं चार्द्धरात्रे च तथा मध्यन्दिनेषु च।
लज्जासमावहे देशे विवृते,शुक्र एव च॥
क्षुधितो व्याधितश्चैव क्षुब्धचित्तश्च मानवः।
वातविण्मूत्रवेगी च पिपासुरतिदुर्ब्बलः॥
तिर्य्यग्योनावयोनौ च ग्राम्यशुक्रविधारणम्।
दुष्टयोनौ विसर्गन्तु बलवानपि वर्ज्जयेत्॥
रेतसश्चातिमात्रन्तु मूर्च्छावस्थामेव च।
स्थितावुत्तानशयने विशेषेणैव गर्हितम्।
क्रीड़ायामपि मेधावी हितार्थी परिवर्ज्जयेत्॥ ८८॥

इत्यन्तं नोपेयादित्यनेनान्वीयते। तिर्य्यग्योनौ पशुयोनौ अयोनावप्राप्तयोना-वप्रयोनौ वा विसर्गं वर्ज्जयेदित्यन्वयः। एतेन कन्याकामर्दनेः औदर्य्यं कर्णनासापरन्ध्रा क्वचिद्योनौ वा शुक्रस्य विसर्गं वर्ज्जयेदित्यायातम्। ग्रामे-ऽपि वर्ज्जयेदित्यन्वेति। ग्राम्यं निर्गन्तु कुत्सितम्। रेतस्त्यागे मात्रं विसर्गे हेतुभिन्नं पौनः पुनिकञ्च मैथुनम्। मूर्च्छावस्थ सुप्तावस्थ स्त्रियं विहाय-मित्यन्वयः स्थितावुपविष्टावस्थायाम् उत्तानशयने च विशेषेण गर्हितं पुरुषारोहेणैव विपरीतरतिमिति निन्दितं विसर्गम्, यदि अन्यत्र क्रीड़ायां "पद्मं यस्येति पातालमार्गो स्तनार्वेष्टो अर्धसंपुटम्" इत्यादि बन्धानां क्रीड़नविधौ अत्यन्तकष्टप्रदत्वात् रतिमर्द्दनोत्तरे रतिबन्धे च विसर्गं परिवर्ज्जये-दिति योजना॥ ८८॥

रजस्वलां प्रसुवतो नरस्यानियतात्मनः ।
दृष्ट्यायुस्तेजसां हानिरधर्म्मश्च ततो भवेत् ॥
लिङ्गिनीं गुरुपत्नीञ्च सगोत्रामथ पर्व्वसु ।
वृद्धाञ्च सन्ध्ययोश्चापि गच्छतो जीवितक्षयः ॥
गर्भिण्यां गर्भपीड़ा स्याद्व्याधितायां बलक्षयः ॥
हीनाङ्गीं मलिनां द्वेष्यां वामवन्ध्यामसंवृते ।
देशेऽशुचौ च शुक्रस्य मनसश्च क्षयो भवेत् ॥
क्षुधितः क्षुब्धचित्तश्च मध्याह्ने तृषितोऽबलः ।
स्थितश्च हानिं शुक्रस्य वायोः कोपञ्च विन्दति ॥
अतिप्रसङ्गाद्भवति शोषः शुक्रक्षयावहः ।
व्याधितस्य रुजा प्लीहा मृत्युर्मूर्च्छा च जायते ॥
प्रत्यूषस्यर्द्धरात्रे च वातपित्ते प्रकुप्यतः ॥
तिर्य्यग्योनावयोनौ च दुष्टयोनौ तथैव च ।
उपदंशस्तथा वायोः कोपः शुक्रस्य च क्षयः ॥
उच्चारिते मूत्रिते च रेतसश्च विधारणे ।
उत्ताने च भवेत्क्षिप्रं शुक्राश्मर्य्यास्तु सम्भवः ॥
सर्व्वं परिहरेत् तस्मादेतल्लोकद्वये हितम् ।

अन्यतन्त्रेषु निगूढार्थं क्वचिदेवं स्फुटीकृत्यावगमयन्ननुक्तमपि विशिष्टविधिं किञ्चिदभिधत्ते रज इत्यादिना । प्रसवतो गच्छतः लिङ्गिनीं "ब्रह्मचारिलिङ्गवेषेण या लिङ्गमुपजीवति" इत्यादिश्लोकैकदेशात् जीविकार्थं ब्रह्मचारिलिङ्गधारिणीं गर्भिण्यां गर्भपीड़ा स्याद् गमन इति

शुक्रञ्चोपचितं मोहान्न सम्भाव्य कथञ्चन ॥
वयोरूपगुणोपेतां तुल्यशीलां गुणान्विताम् ।
अभिकामोऽभिकामान्तु हृष्टो हृष्टामलङ्कृताम् ।
सेवेत प्रमदां युक्त्या वाजीकरणबृंहितः ॥
भक्ष्याः सशर्कराः क्षीरं ससितं रस एव च ।
स्नानं सव्यजनं स्वप्नो व्यवायान्ते हितानि तु ॥ ९० ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
ऽनागताबाधप्रतिषेधनीयचिकित्सितं
नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

शेषः । व्याधितायां गमने बलक्षयस्तु नाम्ना एव । हीनं क्लीबमित्यादि । कामवश्यामपि मामित्यर्थः । अत नाम्ना इत्युक्तम् । क्षुधित इत्यादि । क्षितस्य निवस्थापि शुक्रक्षयेऽर्थः । विन्दति लभते गच्छेति शेषः । परिशिष्टमति स्पष्टार्थम् ॥ ९० ॥

इति श्रीहाराणचन्द्रचक्रवर्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये चिकित्सितस्थाने ऽनागताबाधप्रतिषेधनीयचिकित्सितं नामचतुर्विंशोऽध्यायः ॥

पञ्चविंशोऽध्यायः ।

अथातो मिश्रकचिकित्सितं व्याख्यास्यामः ॥ १ ॥

पाल्यामयास्तु विंशा या सूत्रोक्ताः प्राङ्निबोध तान् ॥२॥

परिपोटस्तथोत्पात उन्मन्थो दुःखवर्द्धनः ।

पञ्चमः परिलेही च कर्णपाल्या गदाः स्मृताः ॥ ३ ॥

सौकुमार्य्याच्चिरोत्सृष्टे सहसाभिप्रवर्द्धिते ।

कर्णशोफो भवेत् पाल्यां सरुजः परिपोटवान् ॥

कृष्णारुणनिभः स्तब्धः स वातात् परिपोटकः ॥ ४ ॥

गुर्व्वाभरणसंयोगात् ताड़नाद्धर्षणादपि ।

शोफः पाल्यां भवेच्छ्यावो दाहपाकरुगन्वितः ॥

रक्तो वा रक्तपित्ताभ्यामुत्पातः स गदो मतः ॥ ५ ॥

बलाद्वर्द्धयतः कर्णं पाल्यां वायुः प्रकुप्यति ।

गृहीत्वा सकफं कुर्य्याच्छोफं तद्वर्णवेदनम् ॥

उन्मन्थकः सकण्डूको विकारः कफवातजः ॥ ६ ॥

पञ्चमिनन्तावच्छिद्याभिलषितं स्वस्थवृत्तं नाम इदानीं पुनः प्रकृतत्वात् शोफाद्यनुविद्धमेवार्थं प्रवर्त्तयिष्याम इत्यभिसन्धाय मिश्रकचिकित्सित-मधिकरोति अथात इत्यादिना । विलक्षणजातीयविविधरोगचिकित्सित-मधिकृत्याध्यायोऽयं मिश्रकचिकित्सितमिति परिभाष्यते ॥ १ ॥

पाल्यामया इति । प्रागिति सू० २५ अ० ख्यापयति । तत्त्वो व्याधि-

वर्द्धमाने यदा कर्णे कण्डूदाहरुगन्वितः ।
शोफो भवति पाकश्च त्वक्स्थोऽसौ दुःखवर्द्धनः ॥ ७ ॥
कफासृक्कृमयः कुर्य्युः सर्षपाभा विकारिणीः ।
स्राविणीः पिड़काः पाल्यां कण्डूदाहरुगन्विताः ॥
कफासृक्कृमिसम्भूतः स विसर्पन्नितस्ततः ।
लिह्यात् सशष्कुलीं पालीं परिलेहीति स स्मृतः ॥ ८ ॥
पाल्यामया ह्यमी घोरा नरस्याप्रतिकारिणः ।
मिथ्याहारविहारस्य पालीं हिंस्युरुपेक्षिताः ॥
तस्मादाशु भिषक् तेषु स्नेहादिक्रममाचरेत् ।
तथाभ्यङ्ग-परीषेक-प्रदेहासृग्विमोक्षणम् ॥ ९ ॥
सामान्यतो विशेषाच्च वक्ष्याम्यभ्यञ्जनं प्रति ॥ १० ॥
खरमञ्जरि-यष्ट्याह्व-सैन्धवामरदारुभिः ।
सुपिष्टैः साश्वगन्धैश्च मूलकावल्गुजैः फलैः ॥
सर्पिस्तैल-वसा-मज्ज-मधूच्छिष्टानि पाचयेत् ।
सक्षीराण्यथ तैः पालीं प्रदिह्यात् परिपोटके ॥११॥
मञ्जिष्ठातिलयष्ट्याह्व-सारिवोत्पलपद्मकैः ।

मञ्जिष्ठा जड़ीभूतः वातसंसिक्तासहबिरहितइति निष्कर्षः । कफे-त्यादि । स रोग इतस्ततश्चतुर्दिक्षु लिह्यादितिहेतोः स परिलेही स्मृत इति योजना ॥ २—८ ॥

सामान्यत इति । प्रति प्रत्येकयोर्विशेषाक्षेत्यर्थः । विशेषेणोपयोगि-त्वतयोपश्रुतेष्वपि प्रथमस्तावत् पूर्वक्रमागतमेवार्चनात्तदुपदिदिक्षति खरेत्या-

सरोध्रैः सकदम्बैश्च बलाजम्ब्वाम्रपल्लवैः ।
सिद्धं धान्याम्लसंयुक्तं तैलमुत्पातनाशनम् ॥ १२ ॥
तालपत्र्यश्वगन्धार्क-वाकुचीफलसैन्धवैः ।
तैलं कुलीरगोधाभ्यां वसया सह पाचितम् ॥
सरलालाङ्गलीभ्याञ्च हितमुन्मन्थनाशनम् ।
तथाश्मन्तकजम्ब्वाम्रपत्रक्काथेन सेचनम् ॥ १३ ॥
प्रपौण्डरीकमधुक-मञ्जिष्ठारजनीद्वयैः ।
चूर्णैरुद्वर्त्तनैः पालीं तैलाक्तामवचूर्णयेत् ॥ १४ ॥
लाक्षाविडङ्गकल्केन तैलं पक्वावचारयेत् ।
स्विन्नां गोमयपिण्डेन प्रदिह्यात् परिलेहिके ॥
पिष्टैर्विडङ्गैरथवा त्रिवृच्छ्यामार्कसंयुतैः ।
करञ्जेङ्गुदिबीजैर्वा कुटजारग्वधायुतैः ॥
सर्व्वैर्वा सार्षपं तैलं सिद्धं मरिचसंयुतम् ।
सनिम्बपत्रैरभ्यङ्गे मधूच्छिष्टान्वितं हितम् ॥ १५ ॥
पालीषु व्याधियुक्तासु तन्वीषु कठिनासु च ।
पुष्ट्यर्थं मार्द्दवार्थञ्च कुर्य्यादभ्यञ्जनं हितम् ॥ १६ ॥
लोपाकानूपमज्जानं वसां तैलं नवं घृतम् ।
पचेद्दशगुणं क्षीरमावाप्य मधुरं गणम् ॥

हिना । तालपत्री मूषिकपर्णी, वाकुची सोमराजी । कुलीरः कर्कटः । अत्र प्रसङ्गात् सेचनावचूर्णने अप्युपदिश्येते सरलेत्यादिना । लाक्षेत्यादि । अव-

अपामार्गाश्वगन्धे च तथा लाक्षारसं शुभम् ।
तत्सिद्धं परिपूतञ्च स्वनुगुप्तं निधापयेत् ॥
तेनाभ्यङ्गात् सदा पाली सुस्निग्धामतिमर्द्दिताम् ।
एतेन पाल्यो वर्द्धन्ते नीरुजो निरुपद्रवाः ।
मृद्वाः पुष्टाः समाः स्निग्धा जायन्ते भूषणक्षमाः ॥१७॥

नीलीदलं भृङ्गरजोऽर्ज्जुनत्वक् पिण्डीतकं कृष्णमयोरजश्च ।
बीजोद्भवं साहचरञ्च पुष्पं पथ्याक्षधात्रीसहितं विचूर्ण्य ॥
एकीकृतं सर्व्वमिदं समाय पङ्केन तुल्यं नलिनीभवेन ।
संयोज्य पक्षं कलसे निधाय लौहे घटे सद्मनि सापिधाने ॥
अनेन तैलं विपचेद्विमिश्रं रसेन भृङ्गत्रिफलाभवेन ।
आसन्नपाके च परीक्षणार्थं पत्रं बलाकाभवमाक्षिपेच्च ॥
भवेद्यदा तद्भ्रमराङ्गनीलं तदा विपक्वं विनिधाय पात्रे ।
कृष्णायसे माससमवस्थितं तदभ्यङ्गयोगात् पलितानि हन्यात् ॥१८
शैरीयजम्ब्वर्ज्जुनकाश्मरीजं पुष्पं तिलान् मार्कवचूतबीजे ।
पुनर्नवा कर्द्दमकण्टकार्य्यौ कासीसपिण्डीतकबीजसारम् ॥

धारयेत् पारिशेष्याद् वर्द्धन इत्यवगन्तव्यम् । पिष्टैरित्यादिना हितमित्यन्तेनोक्तं तैलचितयं परिलेहिकविषयम् । सामान्यतोऽभ्यङ्गमुपदिशन्नाह पालीष्विति । लोपाकः शृगालः । मधुरं गणं "सू० ४२ अ०" उक्तं मधुरवर्गम् । लाक्षारसो लाक्षाक्वाथः सच षड्गुण एवदेयः ॥ १०—१७ ॥

पलितचिकित्सितमधिकरोति नीलीत्यादिना । नीलीनामौषधिः 'नील' इत्युच्यते । पिण्डीतकं मदनफलम् , बीजोद्भवम् उभादि वीजसम्भूतम् , साहचरं नीलझिण्टीजातपुष्पमिति मध्वम्ः । अनेन पादिनेति

फलत्रयं लौहरजोऽञ्जनञ्च यष्ट्याह्वयं नीरजसारिवे च।
पिष्ट्वाथ सर्व्वं सह मोदयन्त्या साराम्भसा बीजकसम्भवेन॥
साराम्भसः सप्तभिरेव पश्चात् प्रस्थैः समालोड्य दशाक्षगुप्तम्।
लौहे सुपात्रे विनिधाय तैलमक्षोद्भवं तच्च पचेत् प्रयत्नात्॥
पक्वञ्च लौहेऽभिनवे निधाय नस्यं विदध्यात् परिशुद्धकायः।
अभ्यङ्गयोगेषु नियुज्यमानं भुञ्जीत माषान् कृशरामथो वा॥
मासोपरिष्टाद्घनकुञ्चिताग्राः केशा भवन्ति भ्रमराञ्जनाभाः।
केशास्तथान्ये खलतौ भवेयुर्जरा नचैनं सहसाभ्युपैति॥
बलं परं सम्भवतीन्द्रियाणां भवेच्च वक्त्रं वलिभिर्विमुक्तम्।
नाकामिनेऽनर्थिनि नाकृताय नैवारये तैलमिदं प्रदेयम्॥१८॥
लाक्षा रोध्रं द्वे हरिद्रे शिलाले कुष्ठं नागं गैरिकावर्णकाश्च।
मञ्जिष्ठोग्रा स्यात् सुराष्ट्रोद्भवा च पत्तङ्गं वै रोचनास्वाञ्जनञ्च॥
हैमाङ्गत्वक् पाण्डुपत्रं वटस्य कालीयं स्यात् पद्मकं पद्ममध्यम्।
रक्तं श्वेतं चन्दनं पारदञ्च काकोल्यादिः क्षीरपिष्टश्च वर्गः॥
मेदोमज्जासिक्थकंगोघृतञ्च दुग्धं क्वाथः क्षीरिणाञ्च द्रुमाणाम्।
एतत् सर्व्वं पक्वमेकाध्यतस्तु वक्त्राभ्यङ्गे सर्पिरुक्तं प्रधानम्॥

मेयम्। बलाका बकः। ग्रैरोयेत्यादि। ग्रैरेयः ग्रैवेयको गोलाभक्तटीति पर्य्यायाः। कर्द्दमोऽत्र पूर्व्वोक्त साहचर्य्यात् नलिनीभव एव ग्रहीतव्यः। फलत्रयं त्रिफला। नीरजशब्देनेह नीलोत्पलतात्पर्य्यम्। मोदयन्ती वनमल्लिका 'काठमल्लिका' इत्याख्यायिनी। बीजको मातुलुङ्गः, साराम्भस इत्यपि सन्निहितत्वात् बीजकस्येत्याहुः। अक्षो विभीतकः। अकामी-

वन्ध्यास्तु या नीलिकाश्चातितुल्यां वक्त्रे जाताः स्फोटिकाश्चापि काश्चित्
पद्माकारं निर्व्यालीकञ्च वक्त्रं कुर्य्यादेतत् पीनगण्डं मनोज्ञम् ॥
याश्चामेतद्योषिताश्चापि नित्यं कुर्य्याद्वैद्यस्तत्समानां नृणाञ्च ।
कुष्ठघ्नं वैसर्पिरेतत् प्रधानं येषां पादे सन्ति वैपादिकाश्च ॥२०
हरीतकीचूर्णमरिष्टपत्रं चूतत्वचं दाड़िमपुष्पवृन्तम् ।
पत्रञ्च दद्यान्मदयन्तिकाया लेपाङ्गरागो नरदेवयोग्यः ॥ २१ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
मिश्रकचिकित्सितं नाम
पञ्चविंशोऽध्यायः ॥ २५ ॥

श्रोतुमनभिलाषी चक्षुरवीर्य्यादिनिन्दितकर्मकारी । लाक्षेत्यादि । शिला मनःशिला, तालं वंशपत्री समाख्यं हरितालम्, नागं नागकेशरम्, वर्णको हरितालम्, "वर्णको मौक्तिकादिवर्णिका" इत्यमरटीका । उषा वचा, सुराष्ट्रोद्भवा नाम 'फटकारी' इति परिचीयते । हेमाङ्गचम्पकः कालीयं च-नाम प्रसिद्धः काष्ठभेदः । पारदन्तु कज्जलीकृतमेव ग्राहयन्त्याचार्य्याः । क्षीरिणां वटादीनां दुग्धं क्षीरं क्वाथञ्चेत्यन्वयः । हरीतकीत्यादि । मदयन्तिका वनमल्लिका । परिशिष्टमतिप्राञ्जलम् ॥ १८ - २१ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
चिकित्सितस्थाने मिश्रकचिकित्सितं नाम पञ्चविंशोऽध्यायः ।

षड्विंशोऽध्यायः ।

अथातः क्षीणबलीयं वाजीकरणचिकित्सितं व्याख्यास्यामः ॥१

कल्यस्योदग्रवयसो वाजीकरणसेविनः ।
सर्व्वेष्वृतुष्वहरहर्व्यवायो न निवारितः ॥
स्थविराणां रिरंसूनां स्त्रीणां वाल्लभ्यमिच्छताम् ।
योषित्प्रसङ्गात् क्षीणानां क्लीबानामल्परेतसाम् ॥
विलासिनामर्थवतां रूपयौवनशालिनाम् ।
नृणाञ्च बहुभार्य्याणां योगा वाजीकरा हिताः ॥
सेवमानो यदौचित्याद्वाजीवात्यर्थवेगवान् ।
नारीस्तर्पयते तेन वाजीकरणमुच्यते ॥
भोजनानि विचित्राणि पानानि विविधानि च ।
वाचः श्रोत्रानुगामिन्यस्त्वचः स्पर्शसुखास्तथा ॥
यामिनी सेन्दुतिलका कामिनी नवयौवना ।

षष्ठे अनागताबाधप्रतिषेधं प्रकृत्योपदिष्टे व्यवायविधावेतस्योपयोगित्वेनैकान्ततो वक्तव्यमर्थं स्थित्वा सुदूरमागमितोऽस्मि कथान्तरप्रसङ्गेन, व्याख्यातावदिदानीं तमेवार्थं प्रवर्त्तयिष्याम इत्यभिसन्धाय क्षीणबलीयं वाजीकरणं नामाऽधिकरोति अथात इत्यादिना ॥ १ ॥

प्रथमन्तावद्वाजीकरणस्योपयोगित्वं प्रदर्शयन्नाह कल्यस्येति । वाजीकरणसेविनः कल्यस्य वीतरोगस्य उदग्रवयसो यूनश्च व्यवायो न निवारितो

गीतं श्रोत्रमनोहारि ताम्बूलं मदिरा: स्रज: ।
मनसश्चाप्रतीघातो वाजीकुर्व्वन्ति मानवम् ॥
तैस्तैर्भावैरहृद्यैस्तु रिरंसोर्मनसि क्षते ।
द्वेष्यस्त्रीसम्प्रयोगाच्च क्लैव्यं तन्मानसं स्मृतम् ॥
कटुकाम्लोष्णलवणैरतिमात्रोपसेवितैः ।
सौम्यधातुक्षयो दृष्टः क्लैव्यं तदपरं स्मृतम् ॥
अतिव्यवायशीलो यो न च वाजीक्रियारतः ।
ध्वजभङ्गमवाप्नोति स शुक्रक्षयहेतुकम् ॥
महता मेढ्ररोगेण मर्म्मच्छेदेन वा पुनः ।
क्लैव्यमेतच्चतुर्थं स्यान्नृणां पुंस्त्वोपघातजम् ॥
जन्मप्रभृति यः क्लीवः क्लैव्यं तत् सहजं स्मृतम् ॥
बलिनः क्षुब्धमनसो निरोधाद् ब्रह्मचर्य्यतः ।
षष्ठं क्लैव्यं मतं तत् तु स्थिरशुक्रनिमित्तजम् ॥
असाध्यं सहजं क्लैव्यं मर्म्मच्छेदाच्च यद्भवेत् ।
साध्यानामितरेषान्तु कार्य्यो हेतुविपर्य्ययः ॥
विधिर्वाजीकरो यस्तु तं प्रवक्ष्यामतः परम् ॥ २ ॥

न प्रतिषिद्ध इत्यर्थः। वाल्लभ्यं प्रियत्वं विलासिनां शृङ्गारचेष्टाविशेषवतामिति तात्पर्य्यम् आमनन्ति हि "तात्कालिको विशेषस्तु विलासोऽङ्गक्रियादिषु" इति। अतएव कर्म्मणोऽस्य वाजीकरणं नामधेयं कृतमित्येव वाजेनावगमयन्ति सेवमान इति। नेह क्लीवानामिति, संज्ञामात्रेणोपदिष्टेऽर्थे सम्यक् प्रत्ययो जात इत्यूच एव लक्षणतः साध्या असाध्यतश्च

तिलमाषविदारीणां शालीनां चूर्णमेव वा।
पौण्ड्रकेक्षुरसेनार्द्रं मर्द्दितं सैन्धवान्वितम्॥
वराहमेदसा युक्तां घृतेनोत्कारिकां पचेत्।
तां भक्षयित्वा पुरुषो गच्छेत्तु प्रमदाशतम्॥ ३॥
वस्ताण्डसिद्धे पयसि भावितानसकृत् तिलान्।
शिशुमारवसापक्वाः शष्कुल्यस्तैस्तिलैः कृताः।
यः खादेत् स पुमान् गच्छेत् स्त्रीणां शतमपूर्ववत्॥ ४॥
पिप्पलीलवणोपेतं वस्ताण्डं क्षीरसर्पिषा।
साधितं भक्षयेद्यस्तु स गच्छेत् प्रमदाशतम्॥ ५॥
पिप्पलीमाषशालीनां यवगोधूमयोस्तथा।
चूर्णभागैः समैस्तैस्तु घृते पूपलिकां पचेत्॥
तां भक्षयित्वा पीत्वा तु शर्करामधुरं पयः।
नरश्चटकवद्गच्छेद्दश वारान् निरन्तरम्॥ ६॥
चूर्णं विदार्य्याः सुकृतं स्वरसेनैव भावितम्।
सर्पिर्मधुयुतं लीढ्वा दश स्त्रीरधिगच्छति॥ ७॥

दर्पेणावगमयतु भगवानित्याह तैरिति। पञ्चभिरमनोज्ञैर्भावैर्मांसिनवस्त्रादिभिर्गन्धमाल्यादिभिश्चेत्यर्थः। ऋते विकृते सम्प्रयोगः सम्बन्धः प्रत्यन्तरम् "सम्प्रयोगस्तथोऽपिस्याद्दम्पती" इति मेदिनी। पौण्ड्रेक्षुरिक्षुभेदः॥ २—३॥

वस्तेत्यादि। सिद्धं क्षीरपाकविधिना पक्वे भावितान् सप्ताहं रात्रौ रात्रौ वासितान् दिवातपे शुष्कान् तिलान् पिष्ट्वेति शेषः। क्षीरोत्थं सर्पिः

एवमामलकं चूर्णं स्वरसेनैव भावितम् ।
शर्करामधुसर्पिर्भिर्युक्तं लीढ्वा पयः पिबेत् ॥
एतेनाशीतिवर्षोऽपि युवेव परिहृष्यति ॥ ८ ॥
पिप्पलीलवणोपेते बस्ताण्डे घृतसाधिते ।
शिशुमारस्य वा खादेत् ते तु वाजीकरे भृशम् ॥
कुलीरकूर्म्मनक्राणामण्डान्येवन्तु भक्षयेत् ।
महिषर्षभबस्तानां पिबेच्छुक्राणि वा नरः ॥ ९ ॥
अश्वत्थफलमूलत्वक्-शुङ्गासिद्धं पयो नरः ।
पीत्वा सशर्कराक्षौद्रं कुलिङ्ग इव हृष्यति ॥ १० ॥
विदारिमूलकल्कन्तु घृतेन पयसा नरः ।
उडुम्बरसमं पीत्वा वृद्धोऽपि तरुणायते ॥ ११ ॥
माषाणां पलमेकन्तु संयुक्तं क्षौद्रसर्पिषा ।
अवलिह्य पयः पीत्वा तेन वाजीभवेन्नरः ॥ १२ ॥
क्षीरपक्वांस्तु गोधूमानात्मगुप्ताफलैः सह ।
शीतान् घृतयुतान् खादेत् ततः पश्चात् पयः पिबेत् ॥१३
नक्रमूषिकमण्डूक-चटकाण्डकृतं घृतम् ।
पादाभ्यङ्गेन कुरुते बलं भूमिन्तु न स्पृशेत् ॥

क्षीरसर्पिः । विदारी भूमिकुष्माण्डम्, शिशुमारस्येवेति वा शब्दादण्डे अन्तर्व्वर्त्तिफले इत्येवं भक्षणीयम् तदण्डस्य तथात्वात् । नक्रेत्यादि । पक्वानि डिम्बा पक्वानि च वृषणफलानीत्येकशेषेऽण्डानि यथासम्भवं तैः कृतमण्ड-

यावत् स्पृशति नो भूमिं तावद्गच्छेन्निरन्तरम् ॥ १४ ॥

स्वयंगुप्तेक्षुरकयोः फलचूर्णं सशर्करम् ।

धारोष्णेन नरः पीत्वा पयसा न क्षयं व्रजेत् ॥ १५ ॥

उच्चटाचूर्णमप्येवं क्षीरेणोत्तममिष्यते ॥ १६ ॥

शतावर्य्युच्चटामूलं पेयमेवं बलार्थिना ।

स्वयंगुप्ताफलैर्युक्तं माषसूपं पिबेन्नरः ॥ १७ ॥

गुप्ताफलं गोक्षुरकाच्च बीजं तथोच्चटां गोपयसा विपाच्य ।

खजाहतं शर्करया च युक्तं पीत्वा नरो हृष्यति सर्व्वरात्रम् ॥ १८ ॥

माषान् विदारीमपि मोच्चटाञ्च क्षीरं गवां क्षौद्रघृतोपपन्नाम् ।

पीत्वा नरः शर्करया सुयुक्तां कुलिङ्गवद्धृष्यति सर्व्वरात्रम् ॥ १९ ॥

गृष्टीनां बद्धवत्सानां माषपर्णभृतां गवाम् ।

यत् क्षीरं तत् प्रशंसन्ति बलकामेषु जन्तुषु ॥

क्षीरमांसगणः सर्व्वः काकोल्यादिश्च पूजितः ।

वाजीकरणहेतोर्हि तस्मात् तत् तु प्रयोजयेत् ॥

एते वाजीकरा योगाः प्रीत्यपत्यबलप्रदाः ।

सेव्या विशुद्धोपचितदेहैः कालाद्यपेक्षया ॥ २० ॥

क्षतमित्येवं व्याख्येयं जरायुजस्यापि सूतिकस्येत्यपादानात् । कुलीरः कर्कटः । उच्चटा नामौषधिः 'बेतुड़ा' इति 'निर्विषी' इति चोद्दुष्यते ॥ ४—१७ ॥

गुप्तेत्यादि । गुप्ताशब्देनेह स्वयंगुप्तैवाभिप्रेयते । खजो दर्व्वी । गृष्टिः सकृत् प्रसूता गौः । • परिशिष्टमूतिप्रापकत्वार्थम् ॥ १८—२० ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
क्षीणबलीयवाजीकरणचिकित्सितं
नाम षड्‌विंशोऽध्यायः ॥ २६ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये चिकित्सितस्थाने क्षीणबलीयवाजीकरणचिकित्सितं नाम षड्‌विंशोऽध्यायः ।

सप्तविंशोऽध्यायः ।

अथातः सर्व्वोपघातशमनीयं रसायनं व्याख्यास्यामः ॥ १ ॥

पूर्व्वे वयसि मध्ये वा मनुष्यस्य रसायनम् ।
प्रयुञ्जीत भिषक् प्राज्ञः स्निग्धशुद्धतनोः सदा ॥

सम्प्रति बलकरत्वादिना वाजीकरणसाधर्म्याद्व्याचिख्यासितत्वेन स्मृतिपदवीमधिष्ठितं रसायनपादं व्याचिख्यासुः प्रथमन्तावत् सुकरत्वेनातीवाऽभिमतं सर्व्वोपघातशमनीयं नाम रसायनमधिकरोति अथात इत्यादिना। सर्व्वेषां शारीरमानसानामुपघातानां जराज्वरोन्मादाद्यात्मकानामातुर्य्याणां शमनाय हितं सर्व्वोपघातशमनीयम् ॥ १ ॥

पूर्व्वे इत्यादि। पूर्व्वे जन्मतः षोडशवर्षपर्य्यन्ते मध्ये षोडश सप्तत्योरन्तरे

नाविशुद्धशरीरस्य युक्तो रासायनो विधिः ।
न भाति वाससि क्लिष्टे रङ्गयोग इवाहितः ॥ २ ॥
शरीरस्योपघाता ये दोषजा मानसास्तथा ।
उपदिष्टाः प्रदेशेषु तेषां वक्ष्यामि वारणम् ॥ ३ ॥
शीतोदकं पयः क्षौद्रं सर्पिरित्येकशो द्विशः ।
त्रिशः समस्तमथवा प्राक् पीतं स्थापयेद्वयः ॥ ४ ॥

तत्र विडङ्गतण्डुलचूर्णमाहृत्य यष्टीमधुयुक्तं यथाबलं शीततोयेनोपयुञ्जीत, शीततोयञ्चानु पिबेत्, एवमहरहर्मासम्; तदेव मधुयुक्तं भल्लातकक्वाथेन वा, मधुद्राक्षाक्वाथयुक्तं वा, मध्वामलकरसाभ्यां वा, गुडूचीक्वाथेन वा। एवमेते पञ्च प्रयोगा भवन्ति। जीर्णमुद्गामलकयूषेणालवणेनाल्पस्नेहेन घृतवन्तमोदनमश्नीयात्। एते खल्वर्शांसि घ्नन्ति, क्रमीनुपघ्नन्ति, ग्रहणधारणशक्तिं जनयन्ति, मासे मासे प्रयोगे वर्षशतमायुषोऽभिवृद्धिर्भवति ॥ ५ ॥

इत्येतस्मात्तु दोषप्रक्रमणीयमनुसन्धानाध्यवसेयम् । अत्र पूर्वं मध्ये इति मात्रान्येनान्तेऽपि योग्यमित्यवश्यं विशेषणीयम अनर्थस्य हि विधिरानर्थक्यायोपपद्यते । प्रदेशेषु सूत्रादिस्थानेषु बहवोऽप्युपघाता यथा कथञ्चिदुपदिष्टाः स्वल्पाश्चोपदेक्ष्यन्ते तदिह "भूम्ना" इति जैमिनिसूत्रप्रकारवादात् उपदिष्टा इति । वारणं शमनमित्यनर्थान्तरम्, तथाच सर्वोपघात शमनीयत्वमस्य साम्प्रतं भवति । प्रकृतमनुसरति शीतेति । अथ पीतं वयः स्थापयेदिति सिद्धे प्रागिति विशेषणं नियमेन अदग्धाः प्राक् पीतमित्या-

विडङ्गतण्डुलानां द्रोणं पिष्टपचने पिष्टवदुत्स्वेद्य विगतकषायं स्विन्नमवतार्य्य दृषदि पिष्टमायसे दृढे कुम्भे मधूदकोत्तरं प्रावृषि भस्मराशावन्तर्भूमेश्चतुरो मासान् निदध्यात्, वर्षाभिगमे चोद्धृत्योपसंस्कृतशरीरः सहस्रसम्पाताभिहुतं कृत्वा प्रातःप्रातर्यथाबलमुपयुञ्जीत। जीर्णे मुद्गामलकयूषेणालवणेनाल्पस्नेहेन घृतवन्तमोदनमश्नीयात्, पांशुशय्यायां शयीत, तस्य मासादूर्द्धं सर्व्वाङ्गेभ्यः कृमयो निष्क्रामन्ति, तानणुतैलेनाभ्यक्तस्य वंशविदलेनापहरेत्। द्वितीये पिपीलिकास्तृतीये यूकास्तथैवापहरेत्। चतुर्थे दन्तनखरोमाण्यवशीर्य्यन्ते। पञ्चमे प्रशस्तगुणलक्षणानि

स्थातुम् तथा च स्थाविर्य्यात् प्रागच्छन्दः पीतमित्यायातं। तद्वेत्यादि तत्र-रसायने कर्त्तव्ये इत्यर्थः ॥ २—५ ॥

विडङ्गेत्यादि। मधूदकोत्तरं मधुमिश्रितोदकेनाप्लुतम् प्रकर्षेणावर्षत्येति प्रावृट् तत्र प्राविषि वर्षाकाल इत्यर्थः। वर्षाऽभिगमे वर्षातीते उपसंस्कृतशरीरः स्निग्धशुद्धशरीरः। सहस्रसम्पाताऽभिहुतमिति "पाश्च चत्वा-ध्रुवन यान भक्ष्याणि सम्पातवन्ति" इति कौशिकसूत्र (७।१) मनुसृत्याच सहस्रेति "सम्पातेन होममाक्षिपति" इति न्यायात् सहस्रमाज्यं हुत्वा सम्पातसहस्रानयनमर्थाभ्यन्ते सम्पातश्च स्रुवचरितहुतशेषाज्यबिन्दवोऽत्र "आज्यं जुहोति" इति कौ० सूत्रात् ७।१ सम्पातानामितजुहोतिचोदनाया आज्यमेवहि द्रव्यं प्रत्येतव्यम् तेनाऽभिहुतं तद्योगेन संस्कृतमित्यर्थः। होमश्च "भव्यो यच्चधाभिर्जामयो पृथ्वीयतां वृषतीसहस्र पयः"

जायन्ते ;—अमानुषस्त्वादित्यप्रकाशं वपुरधिगच्छति, दूराच्छ्रवणानि दर्शनानि चास्य भवन्ति, रजस्तमसी चापोह्य सत्त्वमधितिष्ठति। श्रुतिनिगाद्यपूर्व्वोत्पादी गजबलोऽश्वजवः पुनर्युवाष्टौवर्षशतान्यायुरवाप्नोति । तस्यागुरुतैलमभ्यङ्गार्थे, अजकर्णकषायमुत्सादनार्थे सोशीरं, कूपोदकं स्नानार्थे, चन्दनमुपलेपनार्थे ; भल्लातकविधानवदाहारः परिहारश्च ॥ ६ ॥

इत्यादि ऋक् चतुष्टयात्मकेनाथर्व्वण संहिताप्रथमकाण्डान्तर्गत प्रथमानुवाकीय चतुर्थ सूक्तेन कर्त्तव्यः "अम्बयो यन्ति वायोः पूतः इति च शान्ताः" इति कौशिक सूत्रेण ४ । १ । सर्व्वरोगभैषज्यकर्म्मणि आज्यहोमे सूक्तस्यैतस्य विनियोगविधानात् । इदमत्रावधातव्यं "ये त्रिषप्ताः परियन्ति" इत्यादि अथर्व्वसंहितोक्तप्रथमसूक्तेन आज्यं हुत्वा उदपात्रं सम्पात्य इदमेव सूक्तं उच्चारयन् तदुदकेन व्याधितशरीरं सम्मार्जयेत् । "अथ भैषज्यानि" इति प्रक्रम्य "पूर्व्वस्योदपात्रेण सम्पातवता वलीविमार्ष्टि" इति कौशिक सूत्रेण ४ । १ । सर्व्वव्याधिषु तस्य विधानात् । एवमनेनैव सूक्तेन भक्षणाऽभिमन्त्रणमपि कार्य्यं "सर्व्वाण्यभि मन्त्रयाणि" इति कौशिक सूत्रेण ४ । ७ । तस्य परिभाषणात् । इत्यनुक्तमपि कर्म्मेदमयमनुष्ठातव्यं तत्तत् कल्पोक्तत्वात् । अणुतैलेन "चि० ४ अ०" उक्तेन पिपीलिकाकारा बहुपादाः कृमयः पिपीलिकाः, प्रशस्तगुणलक्षणानि प्रयत्नेनावगमयति अमानुषमिति । अधिगच्छति प्राप्नोति श्रुतिनिगादी श्रुतिधरो वेदतत्त्वार्थवादी वा । अविदितमाश्चर्य्यमुत्पादयितुं शीलमस्येत्यपूर्व्वोत्पादी । अजकर्णः शालभेदः भल्लातकविधानम् "चि० ६ अ०" उपदिष्टम् ॥ ६ ॥

काश्मर्य्याणां निष्कुलीकृतानामेष एव कल्पः पांशु-शय्याभोजनवर्ज्जम्। अत्र हि पयसा शृतेन भोक्तव्यम्। आशिषश्च पूर्व्वेण समानाः। शोणितपित्तनिमित्तेषु विकारेष्वेतेषामुपयोगः ॥ ७ ॥

यथोक्तमागारं प्रविश्य बलामूलार्द्धपलं पलं वा पयसालोड्य पिबेत्। जीर्णे पयः सर्पिरोदन इत्याहारः। एवं द्वादशरात्रमुपयुज्य द्वादश वर्षाणि वयस्तिष्ठति। एवं दिवसशतमुपयुज्य वर्षशतं वयस्तिष्ठति। एवमेवातिबलानागबलाविदारी-शतावरीणामुपयोगः। विशेषतस्त्वतिबलामुदकेन, नागबलाचूर्णं मधुना, विदारीचूर्णं वा क्षीरेण शतावरीमप्येवम्। पूर्व्वेणान्यत् समानमाशिषश्च समाः। एतास्त्वोषधयो बलकामानां शोणितं च्छर्दयतां विरिच्यमानानाञ्चोपदिश्यन्ते ॥ ८ ॥

वाराहीमूलतुलाचूर्णं कृत्वा ततो मात्रां मधुयुक्तां पयसालोड्य पिबेत्। जीर्णे पयः सर्पिरोदन इत्याहारः। प्रतिषेधोऽत्र पूर्व्ववत्। क्रियाप्रयोगमुपसेवमानो वर्षशतमायुरवाप्नोति स्त्रीषु चाक्षयताम्। एतेनैव चूर्णेन पयोऽवचूर्ण्य शृतशीतमभिमथ्याज्यमुत्पाद्य मधुयुतमुपयुञ्जीत सायंप्रातः, एककालं वा। जीर्णे पयः सर्पिरोदन इत्याहारः। एवं मासमुपयुज्य वर्षशतायुर्भवति। जीर्णे पयः सर्पिरोदन इत्याहारः ॥ ९ ॥

चक्षुःकामः प्राणकामो वा बीजकसाराग्निमन्थमूलं निःक्वाथ्य माषप्रस्थं साधयेत्। तस्मिन् सिध्यति चित्रकमूलानामक्षमात्रं कल्कं दद्यादामलकरसचतुर्थभागम्। ततः स्विन्नमवतार्य्य सहस्रसम्पातातिहुतं कृत्वा शीतीभूतं मधुसर्पिर्भ्यां संसृज्योपयुञ्जीत यथाबलम्। लवणं परिहरन् भक्षयेत्। जीर्णे मुद्गामलकयूषेणालवणेन घृतवन्तमोदनमश्नीयात् पयसा वा। मासत्रयमेवमाभ्यां प्रयोगाभ्यां चक्षुः सौपर्णवद्भवति, अनल्पबलो बलवान् स्त्रीषु चाक्षयो वर्षशतायुर्भवतीति ॥ १० ॥

भवति चात्र।

पयसा सह सिद्धानि नरः शणफलानि यः।
भक्षयेत् पयसा सार्द्धं वयस्तस्य न शीर्य्यते ॥ ११ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
सर्व्वोपघातशमनीयं-रसायनचिकित्सितं
नाम सप्तविंशोऽध्यायः ॥ २७ ॥

परिशिष्टमतिरोहितार्थम् ॥ ७—११ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
चिकित्सितस्थाने सर्व्वोपघातशमनीयं रसायन-
चिकित्सितं नामसप्तविंशोऽध्यायः ।

अष्टाविंशोऽध्यायः ।

अथातो मेधायुष्कामीयं रसायनं चिकित्सितं व्याख्यास्यामः ॥ १ ॥

मेधायुःकामः श्वेतावल्गुजफलान्यातपपरिशुष्काण्यादाय सूक्ष्मचूर्णानि कृत्वा गुडेन सह समालोड्य स्नेहकुम्भे सप्तरात्रं धान्यराशौ निदध्यात् । सप्तरात्रादुद्धृत्य कृतशोधनो यथाबलं पिण्डं प्रयच्छेदनुदिते सूर्य्ये, उष्णोदकञ्चानुपिबेत् । भल्लातकविधानवच्चागारप्रवेशः । जीर्णौषधश्चापराह्णे शीताभिरद्भिः परिषिक्तगात्रः शालीनां षष्टिकानाञ्च पयसा शर्करामधुरेणौदनमश्नीयात् । एवं षण्मासानुपयुज्य विगतपाप्मा बलवर्णोपेतः श्रुतिनिगादी स्मृतिमानरोगी वर्षशतायुर्भवति । कुष्ठिनं पाण्डुरोगिणमुदरिणं वा कृष्णाया गोमूत्रेणालोड्यार्द्धपलिकं पिण्डं विगतलौहित्ये सवितरि पाययेत्, पराह्णे चालवणेनामलकयूषेण सर्पिष्मन्तमोदनमश्नीयात् । एवं मासमुपयुज्य स्मृतिमानरोगो वर्षशतायुर्भवति । एव

सम्प्रति सर्व्वोपघातशमनीयं नामातिरसायनं श्रुत्वा हृदयेऽस्माकं चेतसि चमत्कारं प्राप्नोति, तदिदानीं नितरामौषधोपयोगिकं कथितवैं ... मेधायुष्कामीयं रसायनमधिकरोति अथात इत्यादिना ॥१॥

मेधेत्यादि यदिह कुटीप्रावेशिकत्वेन वातातपिकत्वेन च द्वेधा विभज्य

यवोपयोगश्चित्रकमूलानां, रजन्याम् चित्रकमूलं विशेषो विप-चिकं पिण्डं परं प्रमाणम् । शेषं पूर्व्ववत् ॥ २ ॥

कृतदोष एव प्रतिसंसृष्टभक्तो यथाक्रममागारं प्रविश्य मण्डूकपर्णीस्वरसमादाय सहस्रसम्पाताभिहुतं कृत्वा यथा-बलं पयसालोड्य पिबेत् पयोऽनुपानं वा । तस्यां जीर्णायां यवान्नं पयसोपयुञ्जीत तिलैर्वा सह भक्षयित्वा त्रीन् मासान् पयोऽनुपानम् ; जीर्णे पयः सर्पिरोदन इत्याहारः । एव-मुपयुञ्जानो ब्रह्मवर्च्चसी श्रुतनिगादी भवति, वर्षशतमायु-रवाप्नोति । त्रिरात्रोपोषितश्च त्रिरात्रमेनां भक्षयेत् । त्रिरा-त्रादूर्द्ध्वं पयः सर्पिरिति चोपयुञ्जीत । बिल्वमात्रं पिण्डं वा पयसालोड्य पिबेत् । एवं दशरात्रमुपयुज्य मेधावी वर्ष-शतायुर्भवति ॥ ३ ॥

कृतदोष एवागारं प्रविश्य प्रतिसंसृष्टभक्तो ब्राह्मी-स्वरसमादाय सहस्रसम्पाताभिहुतं कृत्वा यथाबलमुपयुञ्जीत । जीर्णौषधश्चापराह्णे यवागूमलवणां पिबेत् , क्षीरसात्म्यो वा

रसायनमुपयुञ्जानस्य।चार्थास्तयोरायत्वेनेदं पाठयितुमिदमुच्यते भल्लात-कीति । अत्र भल्लातकवच्चेत्युपदेशात् 'चि० ६ अ०' उक्तस्य भल्लातकविधेः कुटीप्रावेशिककल्पमर्यादा।चिप्यते । एव इत्यादि । रजन्यां रात्रौ । एव इति चामान्येनोक्तमर्थं किञ्चिदिशिनष्टि चित्रकेति । योगान्तरमुपदिदि-क्षति कृतेति ।, प्रतिसंसृष्टभक्तः सम्यक् प्रत्याख्याताहारः "प्रतिसृष्टः प्रेषिते स्यात् प्रत्याख्याते च" इति मेदिनी । यथाक्रममिति । प्रायः सर्व्वजनी-

पयसा भुञ्जीत। एवं सप्तरात्रमुपयुज्य ब्रह्मवर्च्चसी मेधावी भवति। द्वितीयं सप्तरात्रमुपयुज्य ग्रन्थमीप्सितमुत्पादयति, नष्टञ्चास्य प्रादुर्भवति। तृतीयं सप्तरात्रमुपयुज्य द्विरुच्चारितं शतमप्यवधारयति। एवमेकविंशतिरात्रमुपयुञ्जानमलक्ष्मीरपक्रामति, मूर्त्तिमती चैनं वागदेव्यनुप्रविशति, सर्व्वाश्चैनं श्रुतय उपतिष्ठन्ति। श्रुतधरः पञ्चवर्षशतायुर्भवति॥ ४॥

ब्राह्मीस्वरसप्रस्थद्वये घृतप्रस्थं, विडङ्गतण्डुलानां कुडवं, द्वे द्वे पले वचात्रिवृतयोः, द्वादश हरीतक्यामलकविभीतकानि श्लक्ष्णपिष्टान्यावाप्यैकध्यं साधयित्वा स्वनुगुप्तं निदध्यात्। ततः पूर्व्वविधानेन मात्रां यथाबलमुपयुञ्जीत। जीर्णे पयः सर्पिरोदन इत्याहारः। एतेनोर्द्ध्वमधस्तिर्य्यक्‌क्रिमयो निष्क्रामन्ति, अलक्ष्मीरपक्रामति, पुष्कलकर्णः स्थिरवयाः श्रुतनिगादी त्रिवर्षशतायुर्भवति। एतदेव कुष्ठविषमज्वरापस्मारोन्मादविषभूतग्रहेष्वन्येषु च महाव्याधिषु च संशोधनमादिशन्ति॥ ५॥

ततेन क्रमस्येहानुपदेशादिदानीं मविदितक्रमैः क्रमावगतये आत्रेयाद्युक्तक्रमवेक्षितव्यम्। मण्डूकपर्णी "थुलकुडी" इति "थानकुनी" इति चोद्रुष्यते। सहस्रसम्पाताभिहुतमिति समानं पूर्व्वेण। तस्यां स्वरसत्वेन भक्षितायां मण्डूकपर्ण्यामित्यर्थः। भक्षयित्वा मण्डूकपर्णीमिति शेषः। वेदाध्ययनतदर्थज्ञानादिप्रकर्षकृतं तेजो ब्रह्मवर्च्चसम्। "ब्रह्मवर्च्चसकामस्य" इति "अ० २ श्लो० ३७" मनुः॥ २—४॥

हृतदोष एवागारं प्रविश्य हैमवत्या वचायाः पिण्डमामलकमात्रमभिहुतं पयसालोड्य पिबेत्। जीर्णे पयः सर्पिरोदन इत्याहारः। एवं द्वादशरात्रमुपयुञ्जीत। ततोऽस्य श्रोत्रं विव्रियते। द्विरभ्यासात् स्मृतिमान् भवति। त्रिरभ्यासाच्छ्रुतमादत्ते। चतुर्द्वादशरात्रमुपयुज्य सर्व्वं तरति किल्बिषं, तार्क्ष्यदर्शनमुत्पद्यते, शतायुश्च भवति। द्वे द्वे पले हृतरसा वचाया निःक्वाथ्य पिबेत् पयसा। समानं भोजनं, समाः पूर्व्वेणाशिषश्च ॥ ६ ॥

वचाशतपाकं वा सर्पिर्द्रोणमुपयुज्य पञ्चवर्षशतायुर्भवति, गलगण्डापचीश्लीपदस्वरभेदांश्चापहन्तीति ॥ ७ ॥

अथायुष्कामीयं वक्ष्यामः ॥ ८ ॥

मन्त्रौषधसमायुक्तं संवत्सरफलप्रदम्।
बिल्वस्य चूर्णं पुष्ये तु हुतं वारान् सहस्रशः ॥
श्रीसूक्तेन नरः कल्ये समुत्थाय दिने दिने।
सर्पिर्मधुयुतं लिह्यादलक्ष्मीनाशनं परम् ॥

ब्राह्मीत्यादि। पुष्कलकर्णः श्रुतकर्णेन्द्रियः। हृतेत्यादि। हैमवत्या वचायाः श्वेतवचायाः। अभिहुतं प्राग्वत् सहस्रसम्पातेनेति ज्ञेयम्। परिशिष्टं निगदव्याख्यानम् ॥ ५—७ ॥

अवसितमायत् प्रायः प्रयोज्यं मेध्यं रसायनं नाम सम्प्रति तु पारिशेष्याद्विशिष्टचिकित्सितस्थानोपक्षिप्तमायुष्कामीयमेवावहिताः शृणुध्वमित्येव भावितावश्यमयन्, जरीक्षनमर्थमनुवदति अथेति। यदितआह मन्त्रो-

त्वचं बिल्वस्य मूलस्य मूलक्वाथं दिने दिने ।
प्राश्नीयात् पयसा सार्द्धं स्नात्वा हुत्वा समाहितः ॥
दशसाहस्रमायुष्यं स्मृतं युक्तरथं भवेत् ॥ ९ ॥
हुत्वा विसानां क्वाथन्तु मधुलाजैश्च संयुतम् ।
अमोघं शतसाहस्रं युक्तं युक्तरथं स्मृतम् ॥ १० ॥
सुवर्णपद्मबीजानि मधुलाजाः प्रियङ्गवः ।
गव्येन पयसा पीतमलक्ष्मीं प्रतिषेधयेत् ॥ ११ ॥
नीलोत्पलदलक्वाथो गव्येन पयसा शृतः ।
ससुवर्णतिलैः सार्द्धमलक्ष्मीनाशनः स्मृतः ॥ १२ ॥
गव्यं पयः सुवर्णञ्च मधूच्छिष्टञ्च माक्षिकम् ।
पीतं शतसहस्राभिहुतं युक्तरथं स्मृतम् ॥ १३ ॥

अथयोः समार्थांशोऽस्त्रेति मन्त्रौषधसमायुक्तं रसायनजातमनुक्रमिष्यामस्तत् सर्व्वं संवत्सरफलप्रदं संवत्सरोपयोगेन फलं प्रददातीत्यभिप्रेतं वेदितव्यम् । किन्तु खलु तत्तद्रसायनमित्याह बिल्वस्येति । अत्र "सू० ४६ अ०" अनुसन्धाय आनसारमामं बिल्वं ग्राहयितुमुच्यते पुष्य इति । पुष्ये पुष्यकाले वसन्त इति यावत् । श्रीसूक्तेन "हिरण्य वर्णां हरिणीं सुवर्णाम्" इत्यादिना ऋग्वेदीयेन सूक्तविशेषेण हुतमिति अन्वयः । कल्ये प्रभाते प्राश्नीयादिति सम्बन्धः । अलक्ष्मीनाशनं कान्त्यभिवर्द्धनम् । अनन्तरोक्त वाक्यद्वयं दशसाहस्रमायुष्यमित्यादयोः । त्वचमित्यादि । अत्र हुत्वेति पूर्व्वापरमभिसमीक्ष्य गायत्र्या सहस्रसम्पातेन संस्कृतं कृत्वेति भावनीयम् । दशसहस्राणि परिमाणमस्येति दशसाहस्रम् । आयुष्य-

वचाघृतसुवर्णञ्च विल्वचूर्णमिति त्रयम् ।
मेध्यमायुष्यमारोग्यपुष्टिसौभाग्यवर्द्धनम् ॥ १४ ॥
वासामूलतुलाक्काथे तैलमावाप्य साधितम् ।
हुत्वा सहस्रमश्नीयात् मेध्यमायुष्यमुच्यते ॥ १५ ॥
यावकांस्तावकान् भक्षेदभिभूय यवांस्तथा ।
पिप्पलीमधुसंयुक्तान् शिखाचरणवद्भवेत् ॥ १६ ॥
मध्वामलकचूर्णानि सुवर्णमिति च त्रयम् ।
प्राश्यारिष्टगृहीतोऽपि मुच्यते प्राणसंशयात् ॥ १७ ॥
शतावरी घृतं सम्यगुपयुक्तं दिने दिने ।
सक्षौद्रं ससुवर्णञ्च नरेन्द्रं स्थापयेद्वशे ॥ १८ ॥
गोचन्दना मोहनिका मधुकं माक्षिकं मधु ।
सुवर्णमिति संयोगः पेयः सौभाग्यमिच्छता ॥ १९ ॥
पद्मनीलोत्पलक्काथे यष्टीमधुकसंयुते ।
सर्पिरासादितं गव्यं ससुवर्णं सदा पिबेत् ॥
पयश्चानुपिबेत् सिद्धं तेषामेव समुद्भवे ।
पद्मश्रीदं सदायुष्यं राज्याय सुभगाय च ॥

मानुषी चितम् । सुप्तरथं स्वादिष्वप्यविकृतम् । निर्व्वचनं च 'चि० २८ च०' ग्रन्थमध्येयमेव । वचेत्यादि । वचा सिद्धं घृतं वचाघृतम् ॥८—१५॥

यावकानित्यादि । तावकान् शुष्कान्नकान् नातिनिर्वृत्तविशीर्णानिति यावत् । अभिभूय] संक्षुद्य । चरणोऽस्त्र बह्वचादिर्वेदसमूहः "चरणोऽस्त्री बह्वचादौ" इति मेदिनी, तमर्हतीति चरणवत् "तदर्हम्" इति "पा०

यत्र नोदीरितो मन्त्रो योगेष्वेतेषु साधने ।
मन्त्रिता तत्र सर्व्वत्र गायत्री त्रिपदी भवेत् ॥
पाप्मानं नाशयन्त्येता दद्युश्चौषधयः श्रियम् ।
कुर्य्युर्नागबलञ्चापि मनुष्यममरोपमम् ॥
सतताध्ययनं वादः परतन्त्रावलोकनम् ।
तद्विद्याचार्य्यसेवा च बुद्धिमेधाकरो गणः ॥
आयुष्यं भोजनं जीर्णे वेगानाञ्चाविधारणम् ।
ब्रह्मचर्य्यमहिंसा च साहसानाञ्च वर्ज्जनम् ॥ २० ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
मेधायुष्कामीयरसायनंचिकित्सितं
नामाष्टाविंशोऽध्यायः ॥ २८ ॥

सू० ५ । १ । ९७" यति । शिक्षाऽभ्यासो भवेदित्यर्थः । एतेन मेध्यत्वमस्या विकृतं भवत्यायुष्यत्वञ्च प्रस्तुतत्वादाक्षिप्तम इत्यतो नानुपपत्तिः । गोचन्दना प्रियङ्गुः मोहनिका पुत्रञ्जीवः । पद्मेत्यादि । तेषां पद्मादीनां समुद्गे क्वाथ इत्येव । ब्रह्मचर्य्यं सर्व्वथा मैथुनराहित्यम् । सहसा अविवेकेन कृतं कर्म्म साहसम् मनुष्यमारणादिकं वा स्मरन्ति हि "मनुष्यमारणं स्तेयं परदाराभिमर्षणम् । पारुष्यमनृतञ्चैव साहसं पञ्चधा स्मृतम्" इति । अतिरोहितार्थमन्यत् ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
चिकित्सितस्थाने मेधायुष्कामीयरसायनं नामाष्टाविंशोऽध्यायः ।

एकोनत्रिंशोऽध्यायः ।

अथातः स्वभावव्याधिप्रतिषेधनीयं रसायनं व्याख्यास्यामः ॥१॥

ब्रह्मादयोऽसृजन् पूर्व्वममृतं सोमसंज्ञितम् ।
जरामृत्युविनाशाय विधानं तस्य वक्ष्यते ॥ २ ॥

एक एव खलु भगवान् सोमः स्थाननामाकृतिवीर्य्यविशेषैश्चतुर्व्विंशतिधा भिद्यते ॥ ३ ॥

तद्यथा—

अंशुमान् मुञ्जवांश्चैव चन्द्रमा रजतप्रभः ।
दूर्व्वासोमः कनीयांश्च श्वेताक्षः कनकप्रभः ॥
प्रतानवांस्तालवृन्तः करवीरोऽंशवानपि ।
स्वयम्प्रभो महासोमो यश्चापि गरुडाहृतः ॥
गायत्र्यस्त्रैष्टुभः पाङ्क्तो जागतः शाङ्करस्तथा ।
अग्निष्टोमो रैवतश्च यथोक्तः श्रुतिसंज्ञितः ॥
गायत्र्या त्रिपदा युक्तो यश्चोडुपतिरुच्यते ।

सम्प्रति मेधायुष्कामीयानन्तरं स्वभावव्याधिप्रतिषेधनीयं रसायनमारभते अथात इत्यादिना । स्वभावप्रवृत्तानां जरादिव्याधीनां दीर्घकालानुबन्धिप्रतिषेधाय हितं स्वभावव्याधिप्रतिषेधनीयम् । एवञ्च जरामृत्युविनाशार्थत्वेनानन्तरोक्तं कालिकमपि प्राधान्येनोपदिष्टमित्यवगन्तव्यम्, वक्ष्यति हि 'साङ्गोपाङ्गांश्च निखिलान् वेदान् समधिगच्छति' इति ॥१—२॥

अंशुमानिति । अत्र यथोक्त इति सोमविशेषस्यैव नामधेयमित्यर्थः

एते सोमाः समाख्याता वेदोक्तैर्नामभिः शुभैः ॥
सर्व्वेषामेव चैतेषामेको विधिरुपासने ।
सर्व्वे तुल्यगुणाश्चैव विधानं तेषु वक्ष्यते ॥ ४ ॥

अतोऽन्यतमं सोममुपयुयुक्षुः सर्व्वोपकरणपरिचारकोपेतः प्रशस्ते देशे त्रिवृतमागारं कारयित्वा हृतदोषः प्रतिसंसृष्टभक्तः प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु अंशुमन्तमादायाध्वरकल्पेनाहृतमभिषुतमभिहुतं चान्तरागारे कृतमङ्गलः सोमकन्दं सुवर्णसूच्या विदार्य्य पयो गृह्णीयात् सौवर्णे पात्रे अञ्जलिमात्रं ततः सकृदेवोपयुञ्जीत, नास्वादयन् । तत उपस्पृश्य शेषमप्स्ववसाद्य यमनियमाभ्यामात्मानं संयोज्य वाग्यतोऽभ्यन्तरतः सुहृद्भिरुपास्यमानो विहरेत् ॥ ५ ॥

रसायनं पीतवांस्तु निवाते तन्मनाः शुचिः ।

धेयम् इति ना स्वरूपस्यैव निर्देशात् । गायत्र्या त्रिपदा युताः त्रिपाद्गायत्राः । अस्यैव संज्ञान्तरमाह उक्तेति । चकारोऽवधारणार्थः । य एव पुनरुडुपतिः स एव, इत्यर्थं निष्कर्षः । अत इति । अन्यतममंशुमन्तमित्यत्र गन्तव्यम् अंशुमन्तमादायेत्याद्यन्तरोक्तः । न तावद्व्याख्यानमिदं स्वैरतामात्रमेवाख्यापयतीत्यवसेयम् "यदुपक्रमे सन्दिग्धं तच्छेषाद्विनिर्णीयते" इति हि न्यायः । परितस्त्रिसृभिर्भित्तिभिर्वृत्तं त्रिवृतम् । प्रतिसंसृष्टभक्तो निराहारः । अध्वरकल्पेन यागव्यवसंहितोक्तेनेत्येव । अभिषुतं प्रक्षालितम्, अभिहुतं मन्त्रद्वाराध्येयम् । अन्तरागारे अन्तःकोष्ठे । अव-साद्य प्रविश्य यमो नामाहिंसादिः "अहिंसा सत्यवचनं ब्रह्मचर्यमकल्कता ।

आसीत तिष्ठेत् क्रामेच्च न कथञ्चन संविशेत् ॥ ६ ॥

सायं वा भुक्तवान् हुतशान्तिः कुशशय्यायां कृष्णाजिनोत्तरायां सुहृद्भिरुपास्यमानः शयीत, तृषितो वा शीतोदकमात्रां पिबेत्। ततः प्रातरुत्थायोपहुतशान्तिः कृतमङ्गलो गां स्पृष्ट्वा तथैवासीत। तस्य जीर्णे सोमे छर्दिरुत्पद्यते, ततः शोणिताक्तं क्रिमिव्यामिश्रं छर्दितवते सायं शृतशीतं क्षीरं वितरेत्। ततस्तृतीयेऽहनि क्रिमिव्यामिश्रमतिसार्य्यते, स तेनानिष्टप्रतिग्रहभुक्तप्रभृतिभिर्विशेषैर्मुक्तः शुद्धतनुर्भवति; ततः सायं स्नाताय पूर्व्ववदेव क्षीरं वितरेत्, क्षौमवस्त्रास्तृतायाञ्चैव शय्यायां शाययेत। ततश्चतुर्थेऽहनि तस्य श्वयथुरुत्पद्यते, ततः सर्व्वाङ्गेभ्यः क्रिमयो निष्क्रामन्ति। तदहश्च शय्यायां पांशुभिरवकीर्य्यमाणः शयीत। ततः सायं पूर्व्ववदेव क्षीरं वितरेत्। एवं पञ्चमषष्ठयोर्दिवसयोर्वर्त्तेत, केवलमुभयकालमस्मै क्षीरं वितरेत्। ततः सप्तमेऽहनि निर्म्मांसस्त्वगस्थिभूतः केवलं सोमपरिरक्षणादेवोच्छ्वसिति। तदहश्च क्षीरेण सुखोष्णेन परिषिच्य तिलमधुकचन्दनानुलिप्तदेहं पयः पाययेत्। ततोऽष्टमेऽहनि प्रातरेव क्षीरपरि-

---

अस्तेयमिति पञ्चैव यमाख्यानि व्रतानि च" इति मनुः। नियमस्तूपवासादिः, यदाह "नियमस्तु स यत् कर्म्म नित्यमागन्तुसाधनम्" इति ॥४—६॥

सायमिति। शान्तिर्विघ्नेभ्यो मनसोऽभिरक्षकं मान्त्रीयं वाक्यम्। शीतोदकमात्रामिति मितमात्रं शीतोदकमित्यर्थः। "अल्पे च परिमाणे मा"

सिक्तं चन्दनप्रदिग्धगात्रं पयः पाययित्वा पांशुशय्यां समुत्सृज्य क्षौमास्तृतायां शाययेत् ; ततो मांसमाप्यायते, त्वक् चावदलति, दन्तनखरोमाणि चास्य पतन्ति। तस्य नवमदिवसात् प्रभृत्यणुतैलाभ्यङ्गः सोमवल्ककषायपरिषेकश्च। ततो दशमेऽहन्येतदेव वितरेत्, ततोऽस्य त्वक् स्थिरतामुपैति। एवमेकादशद्वादशयोर्वर्त्तेत। ततस्त्रयोदशात् प्रभृति सोमवल्ककषायपरिषेकः। एवमाषोडशाद्वर्त्तेत। ततः सप्तदशाष्टादशयोर्दिवसयोर्दशना जायन्ते शिखरिणः स्निग्धवज्रवैदूर्य्यस्फटिकनिकाशाः समाः स्थिराः सहिष्णवः। तदाप्रभृति चानवैः शालितण्डुलैः क्षीरयवागूमुपसेवेत यावत् पञ्चविंशतिरिति। ततोऽस्मै दद्याच्छाल्योदनं मृदुभयकालं पयसा, ततोऽस्य नखा जायन्ते विद्रुमेन्द्रगोपकतरुणादित्यप्रकाशाः स्थिराः स्निग्धा लक्षणसम्पन्नाः केशाश्च जायन्ते, त्वक् च नीलोत्पलातसीपुष्पवैदूर्य्यप्रकाशा। ऊर्द्ध्वञ्च मासात् केशान् वापयेत्, वापयित्वा चोशीरचन्दनकृष्णतिलकल्कैः शिरः प्रदिह्यात्, पयसा वा स्नापयेत्। ततोऽस्यानन्तरं सप्तरात्रात् केशा जायन्ते भ्रमराञ्जननिभाः कुञ्चिताः स्निग्धाः। ततस्त्रिरात्रात् प्रथमपरिसरान्निष्क्रम्य मुहूर्त्तं स्थित्वा पुन-

---

त्वमरः। वा माषेति तदर्थः। अणुतैलं 'चि० ४ अ०' उपदिष्टम्। सोमवल्कोऽरीठाकवच्च: शिखरिणः शृङ्गवत्त उन्नता इति यावत्। इन्द्रगोपः

रेवान्त: प्रविशेत्। ततोऽस्य बलातैलमभ्यङ्गार्थेऽवचार्य्यं, यवपिष्टमुद्वर्त्तनार्थे, सुखोष्णञ्च पय: परिषेकार्थे, अजकर्ण-कषायमुत्सादनार्थे, सौशीरं कूपोदकं स्नानार्थे, चन्दनमनु-लेपनार्थे, आमलकरसविमिश्राश्चास्य यूषसूपविकल्पा:, क्षीर-मधुकसिद्धञ्च कृष्णतिलमवचारणार्थे। एवं दशरात्रम्। ततोऽन्यद्दशरात्रं द्वितीये परिसरे वर्त्तेत। ततस्तृतीये परि-सरे स्थिरीकुर्व्वन्नात्मानमन्यद्दशरात्रमासीत, किञ्चिद्दातप-पवनान् वा सेवेत, पुनश्चान्त: प्रविशेत्। न चात्मानमाद-र्शेषु वा निरीक्षेत रूपरमणीयत्वात्। ततोऽन्यद्दशरात्रं क्रोधा-दीन् परिहरेत्। एवं सर्व्वेषामुपयोग:। विशेषतस्तु वल्ली-प्रतानजुपादय: सोमा भक्षयितव्या:। तेषान्तु प्रमाणमर्द्ध-चतुर्थमुष्टय: ॥ ७ ॥

अंशुमन्तं सौवर्णे पात्रेऽभिषुणुयात्। चन्द्रमसं राजते चोपयुज्याष्टगुणमैश्वर्य्यमवाप्येशानं देवमनुप्रविशति। शेषांस्तु ताम्रमये मृन्मये वा रौहिते वा चर्म्मणि विदध्यात्। शूद्रवर्ज्जं त्रिभिर्वर्णै: सोमा उपयोक्तव्या:। ततश्चतुर्थे मासि पौर्णमास्यां

कीटभेद:। लक्षणसम्पन्ना घनत्वादि गुणयुक्ता:। पयसावेति च शब्दस्यासा-धिकारोऽयं वा शब्द:। बलातैलं 'चि० १५ अ०" निरदिक्षत्। उद्वर्त्तनार्थं शरीरमार्ज्जनार्थम्। "अर्थेऽपि च शब्दौ द्वौ तादर्थ्ये संप्रकाशितौ" इति। रमणीयं हि रूपं मनसो विभ्रमाय प्रभवति तदिद मुक्तं रूपरमणीयत्वा-दिति। अर्द्धचतुर्थमुष्टय: सार्द्धत्रिविस्तमिता:। मुष्टिर्विस्तं चतुर्थिकेति

शुचौ देशे ब्राह्मणानर्चयित्वा कृतमङ्गलो निष्क्रम्य यथोक्तं व्रजेदिति ॥ ८ ॥

ओषधीनां पतिं सोममुपयुज्य विचक्षणः ।
दश वर्षसहस्राणि नवां धारयते तनुम् ॥
नाग्निर्न तोयं न विषं न शस्त्रं नास्त्रमेव च ।
तस्यालमायुःक्षपणे समर्थाश्च भवन्ति हि ॥
भद्राणां षष्टिवर्षाणां प्रसूतानामनेकधा ।
कुञ्जराणां सहस्रस्य बलं समधिगच्छति ॥
क्षीरोदं शक्रसदनमुत्तरांश्च कुरूनपि ।
यत्रेच्छति स गन्तुं वा तत्राप्रतिहता गतिः ॥
कन्दर्प इव रूपेण कान्त्या चन्द्र इवापरः ।
प्रह्लादयति भूतानां मनांसि स महाद्युतिः ॥
साङ्गोपाङ्गांश्च निखिलान् वेदान् विन्दति तत्त्वतः ।
चरत्यमोघसङ्कल्पो देववच्चाखिलं जगत् ॥ ९ ॥

पर्यायाः । अभिषुणुयात् कण्डयेत् प्रक्षालयेदिति तात्पर्यम् । अष्टगुणमैश्वर्यमणिमाद्यैश्वर्यम् । तत्र प्रपञ्चेन 'सू० १अ०' व्याकृतमस्माभिः । रोहितं लोहितमित्यनर्थान्तरम् । अत्र "छत्री दण्डी मौली सोपानत्कः सदाव्रजेत्" इत्यादि शास्त्रं धारयन्नाह यथोक्तमित्यध्यवसेयम् ॥ ७—८ ॥

ओषधीनामिति । भद्राणां श्रेष्ठजातीयानां षष्टिवर्षाणां षष्टिवर्षवयस्कानाम् 'चित्तवति नित्यम्" इति पा० सू० ५।१।८९ तद्धितलुक् । प्रसूताना मित्यक रोमत्वर्थीयः प्रस्यन्दमदानामित्यर्थः । उत्तरकुरुर्नाम नववर्षान्त-

सर्व्वेषामेव सोमानां पत्राणि दश पञ्च च ।
तानि शुक्ले च कृष्णे च जायन्ते निपतन्ति च ॥
एकैकं जायते पत्रं सोमस्याहरहस्तदा ।
शुक्लस्य पौर्णमास्यान्तु भवेत् पञ्चदशच्छदः ॥
शीर्य्यते पत्रमेकैकं दिवसे दिवसे पुनः ।
कृष्णपक्षक्षये चापि लता भवति केवला ॥ १० ॥
अंशुमानाज्यगन्धस्तु कन्दवान् रजतप्रभः ।
कदल्याकारकन्दस्तु मुञ्जवानशुनच्छदः ॥
चन्द्रमाः कनकाभासो जले चरति सर्व्वदा ।
गरुडाहृतनामा च श्वेताक्षश्चापि पाण्डुरौ ।
सर्पनिर्म्मोकसदृशौ तौ वृक्षाग्रावलम्बिनौ ॥ ११ ॥
तथान्ये मण्डलैश्चित्रैश्चित्रिता इव भान्ति ते ।
सर्व्व एव तु विज्ञेयाः सोमाः पञ्चदशच्छदाः ।
क्षीरकन्दलतावन्तः पत्रैर्नानाविधैः स्मृताः ॥
हिमवत्यर्व्वुदे सह्ये महेन्द्रे मलये तथा ।
श्रीपर्व्वते देवगिरौ गिरौ देवसहे तथा ।
पारियात्रे च विन्ध्ये च देवसुन्दे ह्रदे तथा ॥
उत्तरेण वितस्तायाः प्रवृद्धा ये महीधराः ।
पञ्च तेषामधो मध्ये सिन्धुनामा महानदः ।

कथं जम्बुद्वीपस्य वर्षभेदः । सर्व्व इत्यादि । पञ्चदशच्छदाः सर्व्व एव

उडुवत् प्लवते तत्र चन्द्रमा सोमसत्तमः ॥
तस्योद्देशेषु वाऽप्यस्ति मुञ्जवानंशुमानपि ॥
काश्मीरेषु सरो दिव्यं नाम्ना क्षुद्रकमानसम्।
गायत्र्यस्त्रैष्टुभः पांक्तो जागतः शाङ्करस्तथा।
अत्र सन्त्यपरे चापि सोमाः सोमसमप्रभाः ॥
न तान् पश्यन्त्यधर्म्मिष्ठाः कृतघ्नाश्चापि मानवाः।
भेषजद्वेषिणश्चापि ब्राह्मणद्वेषिणस्तथा ॥ १२ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
स्वभावव्याधिप्रतिषेधनीयरसायनचिकित्सितं
नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥

सोमाः शौरकन्दलताधस्तौ विशेषास्तयानानाविधैः पत्रैर्विशिष्टाः कृताः इति योजना। अन्यथा तु पौनरुक्तं प्रसज्येत। उत्तरेण वितस्ताया इति वितस्ता नाम नदीविशेषस्तस्या अदूरवर्त्तिन्युत्तर प्रदेश इत्यर्थः। अत्र द्वितीया प्राप्तौ विवक्षातः षष्ठी। उडुः प्लवी। उद्देशेषु समीपवर्त्ति प्रदेशेषु वा शब्दोऽवधारणार्थः। अति रोहितार्थमन्यत् ॥ ८—१२ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये चिकित्सितस्थाने स्वभावव्याधिप्रतिषेधनीयरसायनंनामैकोनत्रिंशदध्यायः।

त्रिंशोऽध्यायः।

अथातो निवृत्तसन्तापीयं रसायनं व्याख्यास्यामः॥ १॥

यथा निवृत्तसन्तापा मोदन्ते दिवि देवताः।

तथौषधीरिमाः प्राप्य मोदन्ते भुवि मानवाः॥ २॥

अथ सप्त पुरुषा रसायनं नोपयुञ्जीरन्। तद्यथा—अनात्मवानलसः प्रमादी दरिद्रो व्यसनी पापकृद्भेषजापमानी चेति। सप्तभिरेव कारणैर्न सम्पद्यते—अज्ञानादनारम्भादस्थिरचित्तत्वाद्दारिद्र्यादनायत्तत्वादधर्मादौषधालाभाच्चेति॥ ३॥

अथौषधीर्व्याख्यास्यामः। अजगरी श्वेतकापोती कृष्णकापोती गोनसी वाराही कन्या छत्रातिच्छत्रा करेणुरजा चक्रका आदित्यपर्णिनी ब्रह्मसुवर्चला श्रावणी महाश्रावणी गोलोमी

वीर्यतः सोमसाम्यादजगरीप्रभृतीनां कासाञ्चिदोषधीनां रसायनविधिनोपयोगक्रममुपदिदिक्षुरिदानीं निवृत्तसन्तापीयं नाम रसायनमधिकरोति अथात इत्यादिना। नितरां सत्त्वानुशयात् प्रायेण निवृत्तः सन्तापो येषां ते निवृत्तसन्तापाः; यदिदं देवताभिप्रायिकमित्यतः परं व्यक्तीभविष्यति। तथा च यथैवामृतरोगहरत्वादुपयुक्तेतद्रसायनस्य दृष्टान्तत्वेन तानधिकृत्य कृतो यस्मान्निवृत्तसन्तापीयः॥ १॥

यथेत्यादि। आत्मा बुद्धिस्तद्भावोऽनात्मा, अज्ञानाद्येतिवक्तव्ये अनार्थोप-लक्षणेन बुद्धिविरहितत्वमाख्यातम्॥ २—३॥

आजगर्यौ महावेगवती चेत्यष्टादश सोमसमवीर्य्या महौषधयो व्याख्याताः। तासां सोमवत् क्रियाशीःस्तुतयः याश्चेऽभिहिताः। तासामभिहुतानां या क्षीरवत्यस्तासां क्षीरकुडवमागारे सकृदेवोपयुञ्जीत ॥ ४ ॥

यास्त्वक्षीरा मूलवत्यस्तासां प्रदेशिनीप्रमाणानि त्रीणि काण्डानि प्रमाणमुपयोगे। श्वेतकापोती समूलपत्रा भक्षयितव्या। गोनस्यजगरीकृष्णकापोतीनां सनखमुष्टिं खण्डशः कल्पयित्वा क्षीरेण विपाच्य परिस्रावितमभिहुतञ्च सकृदेवोपयुञ्जीत। चक्रकायाः पयः सकृदेव। ब्रह्मसुवर्चला सप्तरात्रमुपयोक्तव्या ॥ ५ ॥

भक्ष्यकल्पेन शेषाणां पञ्च पलानि क्षीराढकक्वथितानि प्रक्षेऽवशिष्टेऽवतार्य्य परिस्राव्य सकृदेवोपयुञ्जीत। सोमवदाहारविहारौ व्याख्यातौ, केवलन्तु नवनीतमभ्यङ्गार्थे। शेषं सोमवदानिर्गमादिति ॥ ६ ॥

भवन्ति चात्र।

युवानं सिंहविक्रान्तं कान्तं श्रुतनिगादिनम्
कुर्य्युरेताः क्रमेणैव द्विसाहस्रायुषं नरम् ॥
अङ्गदी कुण्डली मौली दिव्यस्रक्चन्दनाम्बरः।
चरत्यमोघसङ्कल्पो नभस्यम्बुददुर्गमे ॥

या इत्यादि। सनखमुष्टिमित्यनखमुष्टिमितमित्यर्थः ॥ ५ ॥

व्रजन्ति पक्षिणो येन जलमम्भसि तोयदाः।
गतिः सौषधिसिद्धस्य सोमसिद्धगतिः परा॥ ७॥
अथ वक्ष्यामि विज्ञानमोषधीनां पृथक् पृथक्॥
मण्डलैः कपिलैश्चित्रैः सर्पाभा पञ्चपर्णिनी।
पञ्चारत्निप्रमाणा वा विज्ञेयाजगरी बुधैः॥
निष्पत्रा कनकाभासा मूले द्व्यङ्गुलसम्मिता।
सर्पाकारा लोहितान्ता श्वेतकापोतिरुच्यते॥
द्विपर्णिनीं मूलभवामरुणां कृष्णमण्डलाम्।
द्व्यरत्निमात्रां जानीयात् गोनसीं गोनसाकृतिम्॥
सक्षीरां रोमशां मृद्वीं रसेनेक्षुरसोपमाम्।
एवंरूपरसाञ्चापि कृष्णकापोतिमादिशेत्॥
कृष्णसर्पस्वरूपेण वाराही कन्दसम्भवा।
एकपत्रा महावीर्य्याभिन्नाञ्जनसमप्रभा।
छत्रातिच्छत्रके विद्याद्रक्षोघ्ने कन्दसम्भवे।
जरामृत्युनिवारिण्यौ श्वेतकापोतिसंस्थिते।
कान्तैर्द्वादशभिः पत्रैर्मयूराङ्गरुहोपमैः।
कन्दजा काञ्चनक्षीरा कन्या नाम महौषधी॥
करेणुः सुबहुक्षीरा कन्देन गजरूपिणी।
हस्तिकर्णपलाशस्य तुल्यपर्णा द्विपर्णिनी॥ ८॥
अजास्तनाभकन्दा तु सक्षीरा क्षुपरूपिणी।

अजा महौषधी ज्ञेया शङ्खकुन्देन्दुपाण्डुरा ॥
श्वेतां विचित्रकुसुमां काकादन्यासमां क्षुपाम् ।
चक्रकामोषधीं विद्याज्जरामृत्युनिवारिणीम् ॥
मूलिनी पञ्चभिः पत्रैः सुरक्तांशुककोमलैः ।
आदित्यपर्णिनी ज्ञेया सदादित्यानुवर्त्तिनी ॥
कनकाभा जलान्तेषु सर्व्वतः परिसर्पति ।
सक्षीरा पद्मिनीप्रख्या देवी ब्रह्मसुवर्चला ॥
अरत्निमात्रक्षुपका पत्रैर्दाड्गुलसम्मितैः ।
पुष्पैर्नीलोत्पलाकारैः फलैश्चाञ्जनसन्निभैः ।
श्रावणी महती ज्ञेया कनकाभा पयस्विनी ॥
श्रावणी पाण्डुराभासा महाश्रावणिलक्षणा ॥
गोलोमी चाजलोमी च रोमशे कन्दसम्भवे ।
हंसपादीव विच्छिन्नैः पत्रैर्मूलसमुद्भवैः ॥
अथवा शङ्खपुष्प्या च समाना सर्व्वरूपतः ॥
वेगेन महताविष्टा सर्पनिर्म्मोकसन्निभा ।
एषा वेगवती नाम जायते ह्यम्बुदक्षये ॥ ६ ॥
सप्तादौ सर्व्वरूपिण्यो या ह्योषध्यः प्रकीर्त्तिताः ।
तासामुद्धरणं कार्य्यं मन्त्रेणानेन सर्व्वदा ॥
महेन्द्ररामकृष्णानां ब्राह्मणानां गवामपि ।

सप्तत्यादि । सर्व्वरूपिण्यः शिवरूपिण्यः शिवस्वाभावभूता इति यावत् ॥१०॥

तपसा तेजसा वापि प्रशाम्यध्वं शिवाय वै ॥
मन्त्रेणानेन मतिमान् सर्वानेवाऽभिमन्त्रयेत् ।
अश्रद्दधानैरलसैः कृतघ्नैः पापकर्मभिः ।
नैवासादयितुं शक्याः सोमाः सोमसमास्तथा ॥
पीतावशेषममृतं देवैर्ब्रह्मपुरोगमैः ।
निहितं सोमवीर्य्यास्तु सोमे चाप्योषधीपतौ ॥
देवसुन्दे ह्रदवरे तथा सिन्धौ महानदे ।
दृश्यते च जलान्तेषु मध्ये ब्रह्मसुवर्चला ॥
आदित्यपर्णिनी ज्ञेया तथैव हि हिमक्षये ।
दृश्यतेऽजगरी नित्यं गोनसी चाम्बुदागमे ॥
काश्मीरेषु सरो दिव्यं नाम्ना क्षुद्रकमानसम् ।
करेणुस्तत्र कन्या च छत्रातिच्छत्रके तथा ॥
गोलोमी चाजलोमी च महती श्रावणी तथा ।
वसन्त कृष्णसर्पाख्या गोनसी च प्रदृश्यते ॥
कौशिकीं सरितं तीर्त्वा सञ्जयन्त्यास्तु पूर्वतः ।
क्षितिप्रदेशो वल्मीकैराचितो योजनत्रयम् ॥
विज्ञेया तत्र कापोती श्वेता वल्मीकमूर्द्धसु ।
मलये नलसेतौ च वेगवत्योषधी ध्रुवा ॥
कार्त्तिक्यां पौर्णमास्याञ्च भक्षयेत् तामुपोषितः ।
सोमवच्चाथ वर्त्तेत कालं तावच्च कीर्त्तितम् ॥ १० ॥

सर्व्वा विज्ञेयास्त्वोषध्यः सोमश्चाप्यर्व्वुदे गिरौ ।
स शृङ्गैर्देवचरितैरभ्युदग्रैर्नैकभेदिभिः ।
व्याप्तस्तीर्थैश्च विख्यातैः सिद्धर्षिसुरसेवितैः ॥
गुहाभिर्भीमरूपाभिः सिंहोन्नादितकुक्षिभिः ।
गजालोड़िततोयाभिरापगाभिः समन्ततः ।
विविधैर्धातुभिश्चित्रैः सर्व्वतश्चोपशोभितः ॥ ११ ॥
नदीषु शैलेषु सरःसु चापि पुण्येष्वरण्येषु तथाश्रमेषु ।
सर्व्वत्र सर्व्वाः परिमार्गितव्याः सर्व्वत्र भूमिर्हि वसूनि धत्ते ॥ १२

इति सुश्रुतसंहितायां चिकित्सितस्थाने
निवृत्तसन्तापीयं-रसायनचिकित्सितं
नाम त्रिंशोऽध्यायः ॥ ३० ॥

परिशिष्टमतिरोहितार्थम् ॥ ११—१२ ॥
इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
चिकित्सितस्थाने निवृत्तसन्तापीयं नामत्रिंशोऽध्यायः ।

एकोत्रिंशोऽध्यायः ।

अथातः स्नेहोपयौगिकं चिकित्सितं व्याख्यास्यामः ॥ १ ॥

स्नेहसारोऽयं पुरुषः, प्राणाश्च स्नेहभूयिष्ठाः स्नेहसाध्याश्च भवन्ति स्नेहो हि पानानुवासन-मस्तिष्क-शिरोबस्त्युत्तरबस्ति-नस्य-कर्णपूरण-गात्राभ्यङ्ग-भोजनेषूपयोज्यः ॥ २ ॥

तत्र द्वियोनिश्चतुर्विकल्पोऽभिहितः स्नेहो गुणाश्च, तत्र जङ्गमेभ्यो गव्यं घृतं प्रधानं, स्थावरेभ्यस्तिलतैलं प्रधानमिति ॥३॥

अत ऊर्द्ध्वं यथाप्रयोजनं यथाविधानञ्च स्थावरस्नेहानुपदेक्ष्यामः ॥ ४ ॥

तत्र तिल्वकैरण्ड-कोशाम्र-दन्ती-सप्तला-शङ्खिनी-पलाश-विषाणिका-गवाक्षी-कम्पिल्लक-सम्पाक-नीलिनीस्नेहा विरेचयन्ति । जीमूतक-कुटज-कृतवेधनेक्ष्वाकु-धामार्गव-मदनस्नेहा

रसायनं हि नियमेन स्नेहादिकमपेक्षत इति निरदिक्षत्तदिदानीं स्नेहोपयौगिकं नाम चिकित्सितमधिकरोति अथात इत्यादिना । स्नेहानामुपयोगमधिकृत्य कृतोऽध्यायः स्नेहोपयौगिकः ॥ १ ॥

स्नेहेत्यादि । सारोबलमित्यनर्थान्तरं, प्राणाः (शा० ४अ०) उपदिष्टा अग्नीषोमादयः । मस्तिष्कहितं कर्म मस्तिष्क्यं । तत्रेत्यादि । तत्र स्नेहोपयौगिके कर्मणीत्यर्थः । अभिहितः (सू० ४५ अ०) इति शेषः । गुणाश्च

वामयन्ति । विडङ्ग-खरमञ्जरी-मधुशिग्रु-सूर्य्यवल्ली-पीलु-सिद्धार्थक-ज्योतिष्मतीस्नेहाः शिरोविरेचयन्ति ॥ ५ ॥

करञ्ज-पूतिक-कृतमाल-मातुलुङ्गेङ्गुदी-किराततिक्तकस्नेहा दुष्टव्रणेषूपयुज्यन्ते ॥ ६ ॥

तुवरक-कपित्थ-कम्पिल्लक-भल्लातक-पटोलस्नेहा महाव्याधिषु । त्रपुसैर्वारुक-कर्कारुक-तुम्बी-कुष्माण्डस्नेहा मूत्रसङ्गेषु । कपोतवङ्कावल्गुज-हरीतकीस्नेहाः शर्कराश्मरीषु । कुसुम्भ-सर्षपातसी-पिचुमर्दातिमुक्तक-भाण्डी-कटुतुम्बी-कटभीस्नेहाः प्रमेहेषु । ताल-नारिकेल-पनस-मोच-पियाल-बिल्व-मधूक-श्लेष्मातकाम्रातकफलस्नेहाः पित्तसंसृष्टे वायौ । बिभीतक-भल्लातक-पिण्डीतकस्नेहाः कृष्णीकरणे । श्रवण-कङ्गुक-टुण्टुकस्नेहाः पाण्डूकरणे । शिंशपागुरुसारस्नेहा दद्रुकुष्ठकिटिभेषु ॥ ७ ॥

सर्व्व एव स्नेहा वातमुपघ्नन्ति । तैलगुणाश्च समासेन व्याख्याताः ॥ ८ ॥

प्रकृतत्वात् स्नेहानामेवाभिहितास्तथैवेत्याकूतम् । प्रयोजनं कर्म्मेति पर्य्यायौ । उत्तरोत्तरमर्थं क्रमेणोपदिदिक्षति तद्वेति । तत्र स्नेहेषु मध्ये इत्यर्थः । शिखा-शिखानामौषधिः (नारङ्गमिङ्गा) इत्युच्यते । सूर्य्यवल्ली अर्कपुष्पी । कृत-मालः सम्पाकः महाव्याधिशब्देनेह (सू० ११ अ०) उक्ता वातव्याधयो बोद्धव्याः । अतिमुक्तकोऽत्रबीजकत्वात्तिन्दुक एव न पुनर्माधवीलतेत्याहुः अवधोऽपुष्पतिका । कङ्गुकोऽश्मभेदः (काङ्गुन) इति परिचीयते । उप-संहरति तैलेति ॥ २—८ ॥

अत ऊर्द्ध्वं कषायस्नेहपाकक्रममुपदेक्ष्यामः ॥ ९ ॥

तत्र केचिदाहुस्त्वक्पत्रमूलादीनां भागस्तच्चतुर्गुणं जलमा-वाप्य चतुर्भागावशेषं निःक्वाथ्यापहरेदित्येष कषायपाककल्पः। स्नेहप्रभृतिषु षट्सु चतुर्गुणं द्रवमावाप्य चतुरस्रायसमान् भेषजपिण्डांश्चैत्य च स्नेहपाककल्पः। एतत् तु न सम्यक्। कस्मात्? आगमासिद्धत्वात् ॥

पलकुडवादीनामतो मानन्तु व्याख्यास्यामः ॥ १० ॥

तत्र द्वादश धान्यमाषा मध्यमाः सुवर्णमाषकः। ते षोडश सुवर्णम्। अथ मध्यमनिष्पावा वा एकोनविंशति-र्धरणम्। तान्यर्द्धतृतीयानि कर्षः। ततस्त्वोर्द्ध्वं चतुर्गुणमभि-

---

अत इत्यादि। अत्र शिष्याणां व्यवसायाभिवृद्धये प्रथमं तावत् वि-प्रतिवादिनां मतं दूषयति तत्रेति। स्वमतमामूलं स्फुटीकृत्यावगमयन् प्रकृतोपयोगित्वात् मानविशेषत्वेनोपदिष्टानां पलादीनामवान्तरपरिमाण-विशेषमुपदेष्टुम् प्रतिजानीते पलेति। आचार्य्या हि सर्वेष पलकुडवादीनि पठन्तीति परमतोऽसमीभविष्यति कर्षन्तु माषकैरेवोपदेक्ष्यति तदिह पुरस्तात् माषकमेवाभिव्यक्त्याभिधत्ते तत्रेति। तत्र पलकुडवादीनामवा-न्तरपरिमाणविशेषेषु मध्ये। मध्यमाः न क्षुद्रा नापि च विपुला इति यावत्, द्वादशधान्यमाषाः, धान्यविशेषत्वेनाभ्युपगतामाषाः सुवर्णमाषकः अर्द्धषट्को माषकस्त्वर्द्धः। सुवर्णं कर्ष इति हि पर्य्यायौ। आयुर्वेदे चीरमाम-नन्ति "चतुर्भिरक्षिरिक्तिः गुञ्जाभिर्माषकोऽपरः। पञ्चभिः सप्तभिर्माषः षड्भिः क्वचिदुदाहृतः" इति तदत्र मध्यमशब्देन स्थितचयिचितमाषमतयोरन्तर्वर्ति-

वर्द्धयन्तः पल-कुडव-प्रस्थाढ़क-द्रोणा इत्यभिनिष्पद्यन्ते । तुला पलशतं, तानि विंशतिर्भारः । शुष्काणामिदं मानमार्द्रद्रवाणाञ्च द्विगुणमिति ॥ ११ ॥

तथान्यतमपरिमाणसम्मितानां यथायोगं त्वक्पत्रमूलादीनामातपपरिशोषितानां छेद्यानि खण्डशश्छेदयित्वा भेद्यान्यणुशो भेदयित्वावकुट्याष्टगुणेन षोड़शगुणेन वाम्भसाभिषिच्य स्थाल्यां चतुर्भागावशिष्टं क्वाथयित्वापहरेदित्येष कषायपाककल्पः ॥ १२ ॥

स्नेहाच्चतुर्गुणो द्रवः, स्नेहचतुर्थांशो भेषजकल्कः, तदैकध्यं संसृज्य विपचेदित्येष स्नेहपाककल्पः ॥ १३ ॥

अथवा तयोरेकद्रोणे त्वक्-पत्र-मूलादीनां तुलामावाप्य चतुर्भागावशिष्टं निःक्वाथ्यापहरेदित्येष कषायपाककल्पः । स्नेह-

---

त्वेन समगुणात्मकं माषसमाख्यं मानविशेषम् व्यवच्छेत्तुं धान्यमाषेति चक्र शब्द उपात्त इत्यनुसन्धेयम् । स्यादेतत् कियन्तस्तावदुक्ता माषाः सुवर्णं घटयन्ति येनैव सुवर्णमाषकेति संज्ञा क्रियत इत्याह न इति । एवञ्चास्मिन् शास्त्रेऽशीतिरक्तिक एव कर्षोऽभिप्रेयत इति निर्णीयते, तुलितोऽप्येवः सुवर्णमाषकोऽयम् पञ्चरक्तिकासाम्यमेवाङ्गीकरोतीति । अन्यथापि सुवर्णाभिधानं मानमुपदिशति चरकेति । शंसत्ययमयशब्दः पर्यायान्तरं नाम । निष्पावा राजमाषा (बकुवटी) इति प्राकृतैरभिलप्यते । चतुःकृतीयोऽंशोऽत्र तानि तयोक्तानि चत्वारिंशतियानि तानि चरणानि, कर्षः सुवर्णं मित्यनर्थान्तरम् ॥ ८—११ ॥

कुडवे भेषजपलं पिष्टं कल्कं चतुर्गुणं द्रवमावाप्य विपचेदित्येष स्नेहपाककल्पः ॥ १४ ॥

भवतश्चात्र ।

स्नेहभेषजतोयानां प्रमाणं यत्र नेरितम् ।
तत्रायं विधिरास्थेयो निर्दिष्टे तत्तदेव तु ॥
अनुक्तद्रवकार्य्ये तु सर्व्वत्र सलिलं मतम् ।
कल्कक्वाथावनिर्द्देशे गणात् तस्मात् प्रयोजयेत् ॥ १५ ॥

अत ऊर्द्ध्वं स्नेहपाकक्रममुपदेक्ष्यामः । स तु त्रिविधः; तद्यथा—मृदुर्मध्यमः खर इति । तत्र स्नेहौषधिविवेकमात्रं यत्र भेषजं, स मृदुरिति । मधूच्छिष्टमिव विशदमविलेपि यत्र भेषजं, स मध्यमः । कृष्णमवसन्नमीषद्विशदं चिक्कणञ्च यत्र भेषजं, स खर इति । अत ऊर्द्ध्वं दग्धस्नेहो भवति । तं पुनः साधु साधयेत् । तत्र पानाभ्यवहारयोर्मृदुः । नस्याभ्यङ्गयोर्मध्यमः । वस्तिकर्णपूरणयोस्तु खर इति ॥ १६ ॥

भवतश्चात्र ।

शब्दस्योपशमे प्राप्ते फेनस्योपरमे तथा ।
गन्धवर्णरसादीनां सम्पत्तौ सिद्धिमादिशेत् ॥
घृतस्यैवं विपक्वस्य जानीयात् कुशलो भिषक् ।
फेनोऽतिमात्रं तैलस्य शेषं घृतवदादिशेत् ॥ १७ ॥

अत ऊर्द्ध्वं स्नेहपानक्रममुपदेक्ष्यामः । अथ लघुकोष्ठाया-

सुराय कृतमङ्गलस्वस्तिवाचनायोदयगिरिशिखरसंस्थिते प्रतप्तकाञ्चननिकरपीतलोहिते सवितरि यथाबलं तैलस्य घृतस्य वा मात्रां पातुं प्रयच्छेत्। पीतमात्रे चोष्णोदकेनोपस्पृश्य सोपानत्को यथासुखं विहरेत्॥ १८॥

रूक्षक्षतविषार्त्तानां वातपित्तविकारिणाम्।
हीनमेधास्मृतीनाञ्च सर्पिःपानं प्रशस्यते॥
क्रिमिकोष्ठानिलाविष्टाः प्रवृद्धकफमेदसः।
पिबेयुस्तैलसात्म्याश्च तैलं दार्ढ्यार्थिनश्च ये॥
व्यायामकर्शिताः शुष्करेतोरक्ता महारुजः।
महाग्निमारुतप्राणा वसायोग्या नराः स्मृताः॥
क्रूराशयाः क्लेशसहा वातार्त्ता दीप्तवह्नयः।
मज्जानमाप्नुयुः सर्व्वे सर्पिर्वा स्वौषधान्वितम्॥ १९॥
केवलं पैत्तिके सर्पिर्वातिके लवणान्वितम्।
देयं बहुकफे चापि व्योषक्षारसमायुतम्॥
दोषाणामल्पभूयस्त्वं संसर्गं समवेक्ष्य च।
युञ्ज्यात् त्रिषष्टिधाभिन्नैः समासव्यासतो रसैः॥
स्नेहसात्म्यः क्लेशसहः काले नात्युष्णशीतले।
अच्छमेव पिबेत् स्नेहमच्छपानं हि पूजितम्॥
शीतकाले दिवा स्नेहमुष्णकाले पिबेन्निशि।
वातपित्ताधिके रात्रौ वातश्लेष्माधिके दिवा॥

वातपित्ताधिकस्योष्णे तृष्णामूर्च्छोन्मादकारकः ।
शीते वातकफार्त्तस्य गौरवारुचिशूलकृत् ॥
स्नेहपीतस्य चेत् तृष्णा पिबेदुष्णोदकं नरः ।
एवञ्चानुपशाम्यन्त्यां स्नेहमुष्णाम्बुना वमेत् ॥
शिराच्छीतैः शिरः शीतं तोयञ्चाप्यवगाहयेत् ।
या मात्रा परिजीर्य्येत चतुर्भागगतेऽहनि ।
सा मात्रा दीपयत्यग्निमल्पदोषे च पूजिता ॥
या मात्रा परिजीर्य्येत तथार्द्धदिवसे गते ।
सा वृष्या बृंहणी चैव मध्यदोषे च पूजिता ॥ २० ॥
या मात्रा परिजीर्य्येत चतुर्भागावशेषिते ।
स्नेहनीया च सा मात्रा बहुदोषे च पूजिता ॥
या मात्रा परिजीर्य्येत् तु तथा परिणतेऽहनि ।
ग्लानिमूर्च्छामदान् हित्वा सा मात्रा पूजिता भवेत् ॥
अहोरात्रादसन्दुष्टा या मात्रा परिजीर्य्यति ।
सा तु कुष्ठविषोन्माद-ग्रहापस्मारनाशिनी ॥
यथाग्नि प्रथमां मात्रां पाययेत विचक्षणः ।
पीतो ह्यतिबहुः स्नेहो जनयेत् प्राणसंशयम् ॥
मिथ्याचाराद् बहुत्वाद्वा यस्य स्नेहो न जीर्य्यति ।
विष्टभ्य चापि जीर्य्येत् तं वारिणोष्णेन वामयेत् ॥
जीर्णाजीर्णविशङ्कायां स्नेहस्योष्णोदकं पिबेत् ।

तमोद्गारो भविष्यतो भक्तं प्रति च विक्लवा ॥
जन्तु: पच्यमाने तृड्दाह-भ्रमसादारतिक्लमाः ॥
परिषिच्याद्भिरुष्णाभिर्जीर्णस्नेहं ततो नरम् ।
यवागूं पाययेत्कोष्णां कामं क्लिन्नाल्पतण्डुलाम् ॥
देयौ यूषरसौ वापि सुगन्धौ स्नेहवर्जितौ ।
कृतौ वात्यल्पसर्पिष्कौ यवागूर्वा विधीयते ॥
पिबेत् त्र्यहं चतुरहं पञ्चाहं षडहं तथा ।
सप्तरात्रात् परं स्नेहः सात्म्यीभवति सेवितः ॥
सुकुमारं कृशं वृद्धं शिशुं स्नेहद्विषं तथा ।
तृष्णार्तमुष्णकाले च सह भक्तेन पाययेत् ॥
पिप्पल्यो लवणं स्नेहाश्चत्वारो दधिमस्तुकः ।
पीतमेकध्यमेतद्धि सद्यःस्नेहनमुच्यते ॥ २१ ॥
भृष्टमांसरसे स्निग्धा यवागूः सूपकल्पिता ।
सक्षौद्रा पीयमाना तु सद्यःस्नेहनमुच्यते ॥
सर्पिष्मती पयःसिद्धा यवागूः स्वल्पतण्डुला ।
सुखोष्णा सेव्यमाना तु सद्यःस्नेहनमुच्यते ॥
शर्कराचूर्णसंसृष्टे दोहनस्थे घृते तु गाम् ।

देयावित्ति । कृतौ स्नेहलवणसंस्कृतौ । पिप्पल्यस्त्वादि । अत्र पीतमिति "नपुंसकमनपुंसकेन—" [१।२।६९ पा० सू०] एकत्वं नपुंसकत्वञ्चेति ज्ञेयम् ॥ १२—२१ ॥

दुग्ध्वा क्षीरं पिबेद्रुक्षः सद्यःस्नेहमृच्छति ॥
यव-कोल-कुलत्थानां क्वाथो भागत्रयान्वितः ।
पयोदधि-सुराक्षीर-घृतभागैः समन्वितः ॥
सिद्धमेतद्घृतं पीतं सद्यःस्नेहनमुत्तमम् ।
राज्ञे राजसमेभ्यो वा देयमेतद्घृतोत्तमम् ॥
बलहीनेषु वृद्धेषु मृदग्निस्त्रीमहात्मसु ।
अल्पदोषेषु योज्याः स्युर्ये योगाः सम्यगीरिताः ॥
विवर्ज्जयेत् स्नेहपानमजीर्णी चोदरी ज्वरी ।
दुर्ब्बलोऽरोचकी स्थूलो मूर्च्छार्त्तो मदपीड़ितः ॥
छर्द्यर्दितः पिपासार्त्तः श्रान्तः पानक्लमान्वितः ।
दत्तवस्तिर्विरिक्तश्च वान्तो यश्चापि मानवः ॥
अकाले दुर्द्दिने चैव नच स्नेहं पिबेन्नरः ।
अकाले च प्रसूता स्त्री स्नेहपानं विवर्ज्जयेत् ॥
स्नेहपानाद्भवन्त्येषां नृणां नानाविधा गदाः ।
गदा वा कृच्छ्रतां यान्ति न सिध्यन्त्यथवा पुनः ॥
गर्भाशये सश्लेष्माः स्यू रक्तक्लेदमलास्ततः ।
स्नेहं यथाग्निपिबेत पाचनं रूक्षमेव च ॥
त्वराभावात् ततः स्नेहं यथावदवचारयेत् ।
पुरीषं ग्रथितं रूक्षं कृच्छ्रादन्नं विपच्यते ॥
उरो विदहते वायुः कोष्ठादुपरि धावति ।

दुर्व्वर्णो दुर्व्वलश्चैव रूक्षो भवति मानवः ॥ २२ ॥

ग्लानिः सदनमङ्गानामधस्तात् स्नेहदर्शनम् ।

सम्यक्स्निग्धस्य लिङ्गानि स्नेहोद्वेगस्तथैव च ॥

भक्तद्वेषो मुखस्रावो गुदेदाहः प्रवाहिका ।

पुरीषातिप्रवृत्तिश्च भृशस्निग्धस्य लक्षणम् ॥ २३ ॥

रूक्षस्य स्नेहनं स्नेहैरतिस्निग्धस्य रूक्षणम् ।

श्यामाक-कोरदूषान्न-तक्र-पिण्याक-शक्तुभिः ॥

दीप्तान्तरग्निः परिशुद्धकोष्ठः प्रत्यग्रधातुर्बलवर्णयुक्तः ।

दृढेन्द्रियो मन्दजरः शतायुः स्नेहोपयोगी पुरुषो भवेत् तु ॥

स्नेहोऽहितोदुर्व्वलवह्निदेहसन्धुक्षणे व्याधिनिपीड़ितस्य ॥ २४ ॥

बलान्वितोभोजनदोषजातैः प्रमर्द्दितुं तौ सहसा न साध्यौ ॥२५

इति सुश्रुतसंहितायां चिकित्सितस्थाने

स्नेहोपयौगिकचिकित्सितं

नामैकत्रिंशोऽध्यायः ॥ ३१ ॥

रूक्षस्निग्धातिस्निग्धलक्षणान्याह पुरीषमिति । दीप्तेत्यादि । प्रत्यग्रधातु लब्धधातुः संवृद्धधातुर्व्वा । परिशिष्टं निगदव्याख्यातम् ॥ २२—२५ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये

चिकित्सितस्थाने स्नेहोपयौगिकचिकित्सितं

नामैकत्रिंशोऽध्यायः ।

द्वात्रिंशोऽध्यायः ।

अथातः स्वेदावचारणीयं चिकित्सितं व्याख्यास्यामः ॥१॥

चतुर्व्विधः स्वेदः । तद्यथा—तापस्वेद उष्मस्वेद उपनाहस्वेदो द्रवस्वेद इति । अत्र सर्व्वस्वेदविकल्पावरोधः ॥ २ ॥

तत्र तापस्वेदः पाणिकांस्यकन्दुकपालवालुकावस्त्रैः प्रयुज्यते शयानस्य चाङ्गतापो बहुशः खादिराङ्गारतप्तैः ॥ ३ ॥

उष्मस्वेदस्तु कपालपाषाणेष्टकालोहपिण्डानग्निवर्णानद्भिरासिञ्चेदम्लद्रव्यैर्वा, तैरार्द्रैरलक्तकपरिवेष्टितमङ्गप्रदेशं स्वेदयेत् । मांसरसपयोदधिधान्याम्लवातहरपत्रभङ्गक्वाथपूर्णां वा कुम्भीमनुतप्तां प्रावृत्योष्माणं गृह्णीयात् । पार्श्वच्छिद्रेण वा कुम्भेनाधोमुखेन तस्या मुखमभिसन्धाय तस्मिन् छिद्रे हस्तिशुण्डाकारां नाडीं प्रणिधाय तं स्वेदयेत् ॥ ४ ॥

सुखोपविष्टं स्वभ्यक्तं गुरुप्रावरणावृतम् ।
हस्तिशुण्डिकया नाड्या स्वेदयेद्वातरोगिणम् ॥
सुखा सर्व्वाङ्गगा ह्येषा न च क्लिश्नाति मानवम् ।

शोधनाङ्गत्वात् स्नेहानन्तरकार्य्यत्वेन विवक्षितत्वादिदानीं स्वेदावचारणीयं चिकित्सितमधिकरोति अथात इत्यादिना समासतः ॥ १—२ ॥

तत्रेत्यादि, कन्दुः स्वेदनीयपात्रं "तावोया" इति परिचीयते । शयानस्याशयानस्येतिचार्थः । योऽङ्गतापः प्रयुज्यते स तापस्वेद इति योजना । कुट्टितपत्रसमूहः पत्रभङ्गाः । पार्श्वेत्यादि तस्या मांसरसादिपूर्णायाः कुम्भ्या मुखमभिसन्धाय दृढं मृन्मयतुषपङ्कलेपैः संयोज्य ॥ ३—४ ॥

व्यामार्द्धमात्रा त्रिर्वक्रा हस्तिहस्तसमाकृतिः ॥
स्वेदनार्थे हिता नाड़ी कैलिञ्जी हस्तिशुण्डिका ॥ ५ ॥
पुरुषायाममात्रान्तु भूमिमुत्कीर्य्य खादिरैः ।
काष्ठैर्दग्ध्वा तथाभ्युक्ष्य क्षीरधान्याम्लवारिभिः ॥
पत्रभङ्गैरवच्छाद्य शयानं स्वेदयेत् ततः ।
पूर्व्ववत् स्वेदयेद्दग्ध्वा भस्मापोह्यापि वा शिलाम् ॥ ६ ॥

पूर्व्ववत् कुटीं वा चतुर्द्वारां कृत्वा तस्यामुपविष्टस्यान्तश्चतुर्द्वारेऽङ्गारानुपसन्धाय तं स्वेदयेत्। धान्यानि वा सम्यगुपस्वेद्यास्तीर्य्य किलिञ्जेऽन्यस्मिन् वा तत्प्रतिरूपके शयानं प्रावृत्य स्वेदयेत्। एवं पांशु-गोशकृत्तुषबुषपलालोष्मभिः स्वेदयेत् ॥७

उपनाहस्वेदस्तु वातहरमूलकल्कैरम्लपिष्टैर्लवणप्रगाढैः सुस्निग्धैः सुखोष्णैः प्रदिह्य स्वेदयेत्। एवं काकोल्यादिभिः सुरसादिभिस्तिलातसीसर्षपकल्कैः कृशरापायसोत्कारिकाभिर्वेशवारैः शाल्वणैर्वा तनुवस्त्रावनद्धैः स्वेदयेत् ॥ ८ ॥

द्रवस्वेदस्तु वातहरद्रव्यक्वाथपूर्णे कोष्ठकटाहे द्रोण्यां वावगाह्य स्वेदयेत्। एवं पयोमांसरसयूषतैलधान्याम्लघृतवसामूत्रेष्ववगाहेत। सुखोष्णैः कषायैः परिषिञ्चेदिति ॥ ९ ॥

व्यामोनाम तिर्य्यक् पार्श्वतो विस्तृतयोर्बाह्वोरन्तरालपरिमाणम्। कैलिञ्जी कटोपकरणकाष्ठादिरचितेत्यर्थः। पत्रभङ्गैरित्यौपयोगिकत्वात् वातहरैरित्येव पूर्व्ववत् स्वेदादिकमत्र। किलिञ्जे कटे ॥ ५—७ ॥

तत्र तापोष्मस्वेदौ विशेषतः श्लेष्मघ्नौ। उपनाहस्वेदा वातघ्नः। अन्यतरस्मिन् पित्तसंसृष्टे द्रवस्वेद इति। कफ-मेदोऽन्विते वायौ निवातातपगुरुप्रावरणनियुद्धाध्वव्यायामभाराहरणामर्षैः स्वेदमुत्पादयेदिति ॥ १० ॥

भवन्ति चात्र।

चतुर्व्विधो योऽभिहितो द्विधा स्वेदः प्रयुज्यते।
सर्व्वस्मिन्नेव देहे तु देहस्यावयवे तथा॥
येषां नस्यं विधातव्यं वस्तिश्चैव हि देहिनाम्।
शोधनीयाश्च ये केचित् पूर्व्वं स्वेद्यास्तु ते मताः॥
पश्चात् स्वेद्या हृते शल्ये मूढगर्भानुपद्रवा।
सम्यक् प्रजाता काले या पश्चात् स्वेद्या विजानता॥
स्वेद्याः पूर्व्वञ्च पश्चाच्च भगन्दर्य्यर्शसस्तथा।
अश्मर्य्या चातुरो जन्तुः शेषान् शास्त्रे प्रचक्ष्महे॥ ११॥
नानभ्यक्ते नापि चास्निग्धदेहे स्वेदो योज्यः स्वेदविद्भिः कथञ्चित्।
दृष्टं लोके काष्ठमस्निग्धमाशु गच्छेद्भङ्गं स्वेदयोगैर्गृहीतम्॥
अन्नेर्दीप्तिं मार्द्दवं त्वक्प्रसादं भक्तश्रद्धां स्रोतसां निर्म्मलत्वम्।
कुर्य्यात्स्वेदोऽन्विनिद्रां सतन्द्रां सन्धीन् स्तब्धांश्चेष्टयेदाशु युक्तः॥
स्नेहक्लिन्ना धातुसंस्थाश्च दोषाः स्वस्थानस्था ये च मार्गेषु लीनाः।

अमर्षो विरोधो द्वन्द्वयुद्धादिरिति यावत्। अत्र व्यायामपदेनैवाद्युपलब्धेऽपि युद्धोपादानं प्राधान्यार्थम्॥ १०॥

सम्यक्स्वेदैर्विजितैस्ते द्रवत्वं प्राप्ताः कोष्ठं यान्ति देहादशेषात्॥
स्वेदास्रावो व्याधिहानिर्लघुत्वं शीतार्थित्वं मार्दवञ्चातुरस्य ।
सम्यक्स्विन्ने लक्षणं प्राहुरेतन्मिथ्यास्विन्ने व्यत्ययेनैतदेव ॥
स्विन्नेऽत्यर्थं सन्धिपीड़ा विदाहः स्फोटोत्पत्तिः पित्तरक्तप्रकोपः ।
मूर्च्छाभ्रान्तिदाहतृष्णा क्लमश्च कुर्य्यात् तूर्णं तत्र शीतं विधानम्
॥ १२ ॥

पाण्डुर्मेही पित्तरक्ती क्षयार्त्तः क्षामोऽजीर्णी चोदरार्त्तो विषार्त्तः ।
तृट्छर्द्यार्त्तौ गर्भिणी पीतमद्यो नैते स्वेद्या यश्च मर्त्योऽतिसारी॥
स्वेदादेषां यान्ति देहा विनाशमसाध्यत्वं यान्ति चैषां विकाराः
॥ १३ ॥

एतेषां स्वेदसाध्या ये व्याधयस्तेषु बुद्धिमान् ।
मृदून् स्वेदान् प्रयुञ्जीत तथा हृन्मुष्कदृष्टिषु ॥ १४ ॥
सर्व्वान् स्वेदान् निवाते च जीर्णान्नस्यावचारयेत् ।
स्नेहाभ्यक्तशरीरस्य शीतैराच्छाद्य चक्षुषी ।
स्विद्यमानस्य च मुहुर्हृदयं शीतलैः स्पृशेत् ॥ १५ ॥
सम्यक्स्विन्नं विमृदितं स्नानमुष्णाम्बुभिः शनैः ।
स्वभ्यक्तं प्रावृताङ्गञ्च निवातशरणस्थितम् ।
भोजयेदनभिष्यन्दि सर्व्वं वाचारमादिशेत् ॥ १६ ॥

सरलं गूढमितत्वमर्थाकरम् ।परिशिष्टं विशदव्याख्यातम् ॥ ८—१६ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
स्वेदावचारणीयचिकित्सितं नाम
द्वात्रिंशोऽध्यायः ॥ ३२ ॥

इति श्रीडल्हणाचार्य्यविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
चिकित्सितस्थाने स्वेदावचारणीयं नाम द्वात्रिंशोऽध्यायः ।

त्रयस्त्रिंशोऽध्यायः ।

अथातो वमनविरेचनसाध्योपद्रवचिकित्सितं व्याख्यास्यामः ॥१

दोषाः क्षीणा बृंहयितव्याः, कुपिताः प्रशमयितव्याः, वृद्धा निर्हर्त्तव्याः, समाः परिपाल्या इति सिद्धान्तः । प्राधा-

---

१ स्वेदानन्तरविषयत्वेनेदानीं वमनविरेचनसाध्योपद्रवचिकित्सित मधिकरोति अथात इत्यादिना । उपद्रवशब्दोऽयमजहत्स्वार्थया लक्षणया तांस्तान् व्याधिविशेषानपि लक्षयतीत्यवश्यं वक्तव्यम् । अनन्तरं सामान्येनोपदेशात् । तथाच व्याधिसामान्यमभिप्रेत्य वमनविरेचनार्थोऽयमारम्भ इत्यायाति सत्यप्युपद्रवेष्वेवहि जातेषु महान्तमत्ययमाशङ्कमाना भिषजस्त्वरयन्ति यथायोगं वमनविरेचने उपयोक्तुं प्रायेण, तदिह सर्व्वजनीनं व्याधिशब्दं हित्वा कष्टतरीकृत्योपद्रवशब्दं प्रायुङ्क्तेति सुधियः स्पष्टयम् ॥ १ ॥

न्येन वमनविरेचने वर्त्तेते निर्हरणे दोषाणाम् । तस्मात् तयो-विधानमुच्यमानमुपधारय ॥ २ ॥

तथातुरं स्निग्धं स्विन्नमभिष्यन्दिभिराहारैरनवबद्धदोष-मवलोक्य श्वो वमनं पाययितास्मीति सम्भोजयेत् तीक्ष्णाग्निं बलवन्तं बहुदोषं महाव्याधिपरीतं वमनसात्म्यञ्च ॥ ३ ॥

भवति चात्र ।

पेशलैर्विविधैरन्नैर्दोषानुत्क्लेश्य देहिनः ।
स्निग्धस्विन्नाय वमनं दत्तं सम्यक् प्रवर्त्तते ॥ ४ ॥

अथापरेद्युः पूर्व्वाह्णे साधारणे काले वमनद्रव्यकषाय-कल्कचूर्णस्नेहानामन्यतमस्य मात्रां पाययित्वा वामयेत् । यथा-योगं कोष्ठविशेषमवेक्ष्याविबीभत्समदुर्गन्धदुर्दर्शनानि च वम-नानि विदध्यात् । अतो विपरीतानि विरेचनानि ॥ ५ ॥

तत्र सुकुमारं कृशं बालं वृद्धं भीरुं वा वमनसाध्येषु विका-रेषु क्षीरदधितक्रयवागूनामन्यतममाकण्ठं पाययेत् । पीतौ-षधञ्च पाणिभिरग्नितप्तैः प्रतप्यमानं मुहूर्त्तमुपेक्षेत ॥ ६ ॥

तस्य च स्वेदप्रादुर्भावेण शिथिलतामापन्नं सूक्ष्मेभ्यः स्था-नेभ्यः प्रचलितं कुक्षिमनुसृतं जानीयात् , ततः प्रवृत्तहृल्लासं

प्रज्ञातमर्थं स्फुटीकृत्यावगमयन् प्रथमन्तावत् सूचयन्ति दोषा इति । अथ प्राधान्येनेति स्नेहादीन् व्यावर्त्तयति आमनन्ति हि प्राधान्येन व्यपदेशा भवन्तीति । तस्मान्निर्हरणं प्रति प्राधान्यात् । सम्भोजयेदभिष्यन्दिभिरोदन

पीत्वा जानुमात्रासनोपविष्टमाप्तैर्ललाटे पृष्ठे पार्श्वयोः कण्ठे च पाणिभिः सुपरिगृहीतमङ्गुलीगन्धर्वहस्तोत्पलनालानामन्यतमेन कण्ठमभिस्पृशन्तं वामयेत् तावत्, यावत् सम्यग्वान्तलिङ्गानीति ॥ ७ ॥

भवतश्चात्र।

कफप्रसेकं हृदयाविशुद्धिं कण्डूञ्च दुश्छर्दितलिङ्गमाहुः।
पित्तातियोगञ्च विसंज्ञताञ्च हृत्कण्ठपीडामपि चातिवान्ते ॥
पित्ते कफस्यानुसुखं प्रवृत्ते शुद्धेषु हृत्कण्ठशिरःसु चापि।
लघौ च देहे कफसंस्रवे च स्थिते सुवान्तं पुरुषं व्यवस्येत् ॥ ८ ॥

सम्यग्वान्तञ्चैनमभिसमीक्ष्य स्नेहनविरेचनशमनानां धूमानामन्यतमं सामर्थ्यतः पाययित्वाचारिकमादिशेत् ॥ ९ ॥

भवन्ति चात्र।

ततोऽपराह्णे शुचिशुद्धदेहमुष्णाभिरद्भिः परिषिक्तगात्रम्।
कुलत्थमुद्गाढकिजाङ्गलानां यूषै रसैर्वाप्युपभोजयेत् तु ॥ १० ॥
कासोपलेपस्वरभेदनिद्रा-तन्द्रास्यदौर्गन्ध्यविषोपसर्गाः।
कफप्रसेकग्रहणीप्रदोषा न सन्ति जन्तोर्वमतः कदाचित् ॥ ११ ॥

दोषोत्क्लेशार्थं दधिमाषगुड़ादीनि सम्यक् भोजयेत्। अत्र तीक्ष्णाग्न्यादि विशेषणमजीर्णादिशङ्कानिरासार्थम्। पेशलैः कोमलैः स्निग्धैरिति तात्पर्यम्। कोष्ठविशेषं क्रूरकोष्ठम्। अतिबीभत्ससत्वार्थं जुगुप्सितमाम-

छिन्ने तरौ पुष्पफलप्ररोहा यथा विनाशं सहसा व्रजन्ति ।
तथा हृते श्लेष्मणि शोधनेन तज्जा विकाराः प्रशमं प्रयान्ति ॥१२
न वामयेत् तैमिरिकोर्द्धवात-गुल्मोदरप्लीहकृमिश्रमार्त्तान् ।
स्थूलक्षतक्षीणकृशातिवृद्ध-मूत्रातुरान् केवलवातरोगान् ॥१३॥
स्वरोपघाताध्ययनप्रसक्त-दुश्छर्दिदुःकोष्ठतृड़ार्त्तबालान् ।
ऊर्द्धास्रपित्तक्षुधितातिरूक्ष-गर्भिण्युदावर्त्तिनिरूहितांश्च ॥१४॥

अवम्यवमनाद्रोगाः कृच्छ्रतां यान्ति देहिनाम् ।
असाध्यतां वा गच्छन्ति नैते वाम्यास्ततः स्मृताः ॥ १५ ॥
एतेऽप्यजीर्णव्यथिता वाम्या ये च विषातुराः ।
अतीव चोल्वणकफास्ते च स्युर्मधुकाम्बुना ॥ १६ ॥

वाम्यास्तु विषदोषस्तन्यदोषविषममन्दाग्न्युन्मादापस्मार-श्लीपदार्बुदविदारिकामेदोमेहगरज्वरारुच्यामातीसारहृद्रोग-चित्तविभ्रमविसर्पविद्रध्यजीर्णमुखप्रसेकहृल्लासश्वासकास-पीनसपूतिनास-कण्ठौष्ठ-वक्त्रपाककर्णस्रावाधिजिह्वोपजिह्विका-गलशुण्डिकाधःशोणितपित्तिनः कफस्थानजेषु विकारेष्वन्येषु कफव्याधिपरीतेष्विति ॥ १७ ॥

मद्यादिकमत्येतत् । उक्तानामेतेषामुपयोगस्तु निरूहं वमनानुगुणत्वा-दित्यवधेयम् । गन्धर्वहस्त एरण्डः । सम्यगित्यादि । धूमानां "चि० ४० अ०" वक्ष्यमाणानाम् । आगारिके "चि० ३८ अ०" विवक्षितम् ॥ २—१३ ॥

विरेचनमपि स्निग्धस्विन्नाय वान्ताय च देयम् । अथातुरं श्वो विरेचनं पाययितास्मीति लघु भोजयेत्, फलाम्लमुष्णोदकञ्चैनमनुपाययेत् । अथापरेऽहनि विगतश्लेष्माणमातुरोपक्रमणीयादवेक्ष्यातुरमथास्मै औषधमात्रां पातुं प्रयच्छेत ॥१८॥

तत्र मृदुः क्रूरो मध्य इति त्रिविधः कोष्ठो भवतीति । तत्र बहुपित्तो मृदुः, स दुग्धेनापि विरिच्यते । बहुवातश्लेष्मा क्रूरः, स दुर्विरेच्यः । समदोषो मध्यमः, स साधारण इति । तत्र मृदौ मात्रा मृद्वी, क्रूरे तीक्ष्णा, मध्ये मध्या कर्त्तव्येति । पीतौषधश्च तन्मनाः शय्यामासीत विरिच्यते ॥ १९ ॥

विरेचनं पीतवांस्तु न वेगान् धारयेद्बुधः ।
निवातशायी शीताम्बु न स्पृशेन्न प्रवाहयेत् ॥ २० ॥

यथा च वमने प्रसेकौषधकफपित्तानिलाः क्रमेण गच्छन्ति, एवं विरेचने मूत्रपुरीषपित्तौषधकफा इति ॥ २१ ॥

भवन्ति चात्र ।

स्याद्दुर्विरिक्ते कफपित्तकोपो दाहोऽरुचिर्गौरवमग्निसादः ।
हृत्कुक्ष्यशुद्धिः परिदाहकण्डूविण्मूत्रसङ्गाश्च न सद्विरिक्ते ॥

विरेचनमिति । "सू० ३५ अ०" अनुमन्धायेत्यातुरोपक्रमणीयात् अवेक्ष्य सत्वबलादिविशेषेण परीक्ष्येत्यर्थः । प्रवाहयेत वेगेन प्रवर्त्तयेत् क्रमेणायोगमिथ्यायोगातिसम्यग्योगयुक्तानां लक्षणान्युपदिदिक्षति स्यादिति । दुर्विरिक्त इति निषेधार्थोऽयं दुःशब्दोऽत्र विरेचनाभाववत्त्वमाख्यापयति "दुर्निषेधेच निन्दायाम्" इति कोषान्तरञ्च । तथाचाविरिक्त इत्यर्थनिष्कर्षः, अत्र

मूर्च्छागुदभ्रंशकफातियोगाः शूलोद्गमश्चातिविरिक्तलिङ्गम् ।
गतेषु दोषेषु कफान्वितेषु नाभ्या लघुत्वे मनसश्च तुष्टौ ॥
गतेऽनिले चाप्यनुलोमभावं सम्यग्विरिक्तं मनुजं व्यवस्येत् ।
मन्दाग्निमक्षीणमसद्विरिक्तं न पाययेताहनि तत्र पेयाम् ॥
क्षीणं तृषार्त्तं सुविरिचितञ्च तन्वीमशीतां लघु पाययेत ।
बुद्धेः प्रसादं बलमिन्द्रियाणां धातुस्थिरत्वं बलमग्निदीप्तिम् ।
चिराच्च पाकं वयसः करोति विरेचनं सम्यगुपास्यमानम् ॥
यथौदकानामुदकेऽपनीते चरस्थिराणां भवति प्रणाशः ।
पित्ते हृते त्वेवमुपद्रवाणां पित्तात्मकानां भवति प्रणाशः ॥
मन्दाग्न्यतिस्निग्धितबालवृद्धस्थूलाः क्षतक्षीणभयोपतप्ताः ।
श्रान्तस्तृडार्त्तोऽपरिजीर्णभक्तो गर्भिण्यधो गच्छति यस्य चासृक् ।
नवप्रतिश्यायमदात्ययी च नवज्वरी या च नवप्रसूता ।
शल्यार्दिताश्चाप्यविरेचनीयाः स्नेहादिभिर्ये त्वनुपस्कृताश्च ॥
अत्यर्थपित्ताभिपरीतदेहान् विरेचयेत् तानपि मन्दवीर्य्यैः ।
विरेचनैर्यान्ति नरा विनाशमज्ञप्रयुक्तैरविरेचनीयाः ॥ २२ ॥

द्विरिक्तोऽसम्यग्विरिक्तो मिथ्यायोगयुक्त इति यावत् सम्यग्योगमिथ्यायोगयुक्तयोराहारं निषेधति मन्देति श्लोकेन अत्रासद्विरिक्तप्रतिषेधेनैवातिरिक्तस्यापि प्रतिषेधोऽवगम्यते विषमविष्टम्भसङ्गात् । पित्त इत्यादि । इहाप्युपद्रवशब्दः प्राब्दशब्दार्थेयः । अनुपस्कृता असंस्कृताः । अत्यर्थेति । अत्र पित्ताऽभिपरीतदेहत्वेन बहुदोषत्वमनुसन्धायातियोगशङ्कामपाकर्तुं विधिमपि मन्दवीर्यं रित्युपदिशति यम् ॥ १८—२२ ॥

विरेच्यास्तु ज्वरगरारुच्यर्शोऽर्बुदोदरग्रन्थिविद्रधिपाण्डु-रोगापस्मार-हृद्रोग-वातरक्तभगन्दरच्छर्दियोनिरोग-विसर्प-गुल्मपक्वाशयरुग्विबन्ध-विसूचिकालसकमूत्राघात-कुष्ठ-विस्फोटक-प्रमेहानाहप्लीहशोफवृद्धिशस्त्रक्षतक्षाराग्निदग्धदुष्टव्रणाक्षिपाककाचतिमिराभिष्यन्दशिरःकर्णाक्षिनासास्य गुदमेढ्रदाहोर्द्ध-रक्तपित्तक्रिमिकोष्ठिनः पित्तस्थानजेषु विकारेष्वन्येषु च पैत्तिकव्याधिपरीता इति ॥ २३ ॥

सरत्वसौक्ष्म्यतैक्ष्ण्यौष्ण्य-विकाशित्वैर्विरेचनम् ।
वमनन्तु हरेद्दोषं प्रकृत्यागतमन्यथा ॥ २४ ॥
यात्यधो दोषमादाय पच्यमानं विरेचनम् ।
गुणोत्कर्षाद्व्रजत्यूर्द्धमपक्वं वमनं पुनः ॥
मृदुकोष्ठस्य दीप्ताग्नेरतितीक्ष्णं विरेचनम् ।
न सम्यङ्निर्हरेद्दोषानतिवेगप्रधावितान् ॥ २५ ॥
पीतं यदौषधं प्रातर्भुक्तपाकसमे क्षणे ।
पक्वं गच्छति दोषांश्च निर्हरेत् तत् प्रशस्यते ॥ २६ ॥
दुर्ब्बलस्य चलान् दोषानल्पानल्पान् पुनः पुनः ।
हरेत् प्रभूतानल्पांस्तु शमयेत् प्रच्युतानपि ॥
हरेद्दोषांश्चलान् पक्वान् बलिनो दुर्ब्बलस्य च ।
चला ह्युपेक्षिता दोषाः क्लेशयेयुश्चिरं नरम् ॥

विरेच्या इत्यादि । काचो नेत्ररोगभेदः । सरत्वेत्यादि । अत्र प्रकाशा-

मन्दाग्निं क्रूरकोष्ठञ्च सक्षारलवणैर्घृतैः ।
सन्धुक्षिताग्निं स्निग्धञ्च स्विन्नञ्चैव विरेचयेत् ॥
स्निग्धस्विन्नस्य भेषज्यैर्दोषस्तूत्क्लेशितो बलात् ।
विलीयते न मार्गेषु स्निग्धे भाण्ड इवोदकम् ॥ २७ ॥
न चातिस्नेहपीतस्तु पिबेत् स्नेहविरेचनम् ।
दोषाः प्रचलिताः स्थानाद्भूयः श्लिष्यन्ति वर्त्मसु ॥ २८ ॥
विषाभिघातपिड़का-शोफपाण्डुविसर्पिणः ।
नातिस्निग्धा विशोध्याः स्युस्तथा कुष्ठप्रमेहिणः ॥ २९ ॥
विरूक्ष्य स्नेहसात्म्यन्तु भूयः संस्नेह्य शोधयेत् ।
तेन दोषा हृतास्तस्य भवन्ति बलवर्द्धनाः ॥ ३० ॥
प्रागपीतं नरं शोध्यं पाययेतौषधं मृदु ।
ततो विज्ञातकोष्ठस्य कार्य्यं संशोधनं पुनः ॥
सुखं दृष्टफलं हृद्यमल्पमात्रं महागुणम् ।
व्यापत्स्वल्पात्ययञ्चापि पिबेन्नृपतिरौषधम् ॥ ३१ ॥
स्नेहस्वेदावनभ्यस्य यस्तु संशोधनं पिबेत् ।
दारुशुष्कमिवानामे देहस्तस्य विशीर्य्यते ॥
स्नेहस्वेदप्रचलिता रसैः स्निग्धैरुदीरिताः ।
दोषाः कोष्ठगता जन्तोः सुखा हर्त्तुं विशोधनैः ॥ ३२ ॥

गत मित्यनन्तरोक्त सर्वयवागूरुतीया बहुवचनान्तत्वेनानुक्रान्त्येयमेव पृथिव्यम्बुगुणभूयिष्ठत्वेन "सू० ४१ अ०" उपदिष्टानां विरेचनद्रव्याणां सौकुमार्यादितोऽतिविप्रकृष्टत्वेनानुभवात् । भानामै बक्रोकरणे ॥ २३—३२ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
वमनविरेचनसाध्योपद्रवचिकित्सितं
नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
चिकित्सितस्थाने वमनविरेचनसाध्योपद्रवचिकित्सितं
नाम त्रयस्त्रिंशोऽध्यायः ।

चतुस्त्रिंशोऽध्यायः ।

अथातो वमन-विरेचनव्यापच्चिकित्सितं व्याख्यास्यामः ॥१॥

वैद्यातुरनिमित्तं वमनं विरेचनञ्च पञ्चदशधा व्यापद्यते । तत्र वमनस्याधोगतिरूर्द्धं विरेचनस्येति पृथक् । सामान्यमुभयोः

महाक्षमा विदितवेदितव्योऽपि रजस्तमोऽविरहितः कश्चिद्भिषगुपदिष्टे वमनविरेचने तथा प्रतिविधातुमीष्टे, यथाप्रतिविहिते सर्व्वस्मिन् शरीरे नियमेन ते सिध्येयाताम्, प्रतिपुरुषं दोषादिगतेरचिन्त्यत्वेनानुभवेनाक्रमणात् । चाक्रायणेन "सूक्ष्माणि हि दोष × × × भेषजपक्रम्य प्रकृति वयसामवस्थान्तराणि यान्यनुचिन्त्यमानानि विमलविपुलबुद्धेरपि बुद्धिमाकुलीकुर्य्युः किं पुनरल्पबुद्धेः" इति "च० सू० १५ अ०" तदिह तयोर्नैकान्तिकी सिद्धिरवश्यम्भाविनीति सम्प्रधार्य्यासिद्धिनिमित्तां तामापदमपाचिकीर्षुरिदानीं वमनविरेचनव्यापच्चिकित्सितमधिकरोति अथात इत्यादिना ॥ १ ॥

सावशेषौषधत्वं, जीर्णौषधत्वं, हीनाधिकदोषापहृतत्वं, वातशूलम्, अयोगातियोगौ, जीवादानम्, आध्मानं, परिकर्त्तिका, परिस्रावः, प्रवाहिका, हृदयोपसरणं विबन्ध इति ॥ २ ॥

तत्र बुभुक्षापीड़ितस्यातितीक्ष्णाग्नेर्मृदुकोष्ठस्य चावतिष्ठमानं दुर्ब्बलस्य वा गुणसामान्यभावाद्वमनमधो गच्छति। तत्रेप्सितानवाप्तिर्दोषोत्क्लेशश्च। तमाशु स्नेहयित्वा भूयस्तीक्ष्णतरैर्वामयेत् ॥ ३ ॥

अपरिशुद्धामाशयस्योत्क्लिष्टश्लेष्मणः सशेषान्नस्य वाऽहृद्यमतिप्रभूतं विरेचनं पीतमूर्द्ध्वं गच्छति। तत्राशुद्धामाशयमुत्क्लिष्टश्लेष्माणमाशु वामयित्वा भूयस्तीक्ष्णतरैर्विरेचयेत्। आमान्वये त्वामवत् संविधानम्। अहृद्योऽतिप्रभूते च हृद्यं प्रमाणयुक्तञ्च। अत ऊर्द्ध्वमुच्छिष्टस्यौषधे न तृतीयं पाययेत्। ततस्त्वेनं मधुघृतफाणित-युक्तैर्लेहैर्विरेचयेत् ॥ ४ ॥

वैद्येत्यादि। परिशिष्टाश्चतुर्दशव्यापदस्तु वमनविरेचने प्रति समानाः स्वभिसम्बन्धाऽऽहसामान्य मति। सूचितमर्थं क्रमेण विवृणोति तत्रेति। दुर्ब्बलस्याद्दुर्ब्बलस्य वा बुभुक्षापीडितादेर्निश्चयार्थं हि कफाल्पभावात् बलवता पित्तेनामाशयमधितिष्ठत्तीक्ष्णं नाम वमनमात्रेव स्वगतेनाग्निगुणेनातुरशरीरस्थमुद्रिक्तं पित्तं सामान्यादभवर्थ्य प्रवर्त्तपित्तान्वयात् सदोषमामाशयमधो निर्नोपतीति साम्यमुक्तं बुभुक्षेति। अत्र समानमेव सामान्यम् तदितोऽयमनन्यार्थः। तस्माच्च गुणसामान्यभावात्, नैदिष्ठविरेचनेनातुरशरीरस्थेन बलीयसापित्तेन सह भेषजगतस्याऽग्निगुणस्य तुल्यत्वादित्यर्थः। न तावता-

दोषविग्रथितमल्पमौषधमवस्थितमूर्द्ध्वभागिकमधोभागिकं वा न संसयति दोषान् । तत्र तृष्णा पार्श्वशूलं छर्द्दिर्मूर्च्छा पर्व्वभेदो हृल्लासारत्युद्गाराविशुद्धिश्च भवति । तमुष्णाभिरद्भि-राशु वामयेत् । सावशेषौषधमतिप्रधावितदोषमतिबलम-सम्यग्विरिक्तमप्येवं वामयेत् । क्रूरकोष्ठस्यातितीक्ष्णाग्नेरल्प-मौषधमल्पगुणं वा भक्तवत् पाकमुपैति ; तत्र समुदीर्णा दोषा यथाकालमनिर्ह्रियमाणा व्याधिबलविभ्रममापादयन्ति। तमनल्पमन्दमौषधं पाययेत् । अस्निग्धस्विन्नेनाल्पगुणं वा भेषजमुपयुक्तमल्पान् दोषान् हन्ति ॥ ५ ॥

तत्र वमने दोषशेषो गौरवमुत्क्लेशं हृदयाविशुद्धिं व्याधि-वृद्धिञ्च करोति । तत्र यथायोगं पाययित्वा वामयेद्दृढतरम् । विरेचने गुदपरिकर्त्तनमाध्मानं शिरोगौरवमनिःसरणं वा वायोर्व्याधिवृद्धिञ्च करोति । तमुपपाद्य भूयः स्नेहस्वेदाभ्यां

व्याख्यानमिदमवधेयम् "सुधार्कमृदुकोष्ठाभ्यां स्वल्पोत्क्लिष्टकफेन वा । तीक्ष्णं पीतं क्षितं क्षुब्धं वमनं स्याद्विरेचनम्" इति । "च० सि० ६ अ०" स्मरणात् । यपरीत्यादि । अल्पममनौषधम् । सामान्यये सशेषाकत्वे, अति प्रभृते च विरेचन इत्यन्वेयम् । प्रमाणायुक्तस्य प्रयोजयेदिति शेषः । साव-शेषौषधमधिकरोति दोषेत्यादिना । अवस्थितं सावशेषत्वेनात्यवधेयम् । अत्र सावशेषौषधे अमप्रहृतदोषे, असम्यग्विरिक्ते वा किं कुर्य्यादित्याह सावेति । क्षीणौषधमधिकरोति क्रूरेति । क्षीणाऽधिकदोषाणामल्पावधिकरोति अस्निग्धे-

विरेचयेद् दृढ़तरम्। दृढ़ं वहुप्रचलितदोषं वा तृतीये दिवसेऽल्पगुणञ्चेति ॥ ६ ॥

अस्निग्धस्विन्नेन रूक्षमौषधमुपयुक्तमब्रह्मचारिणा वा वायुं कोपयति। तत्र वायुः प्रकुपितः पार्श्वपृष्ठश्रोणीमन्यामर्म्मशूलं मूर्च्छां भ्रमं संज्ञानाशञ्च करोति। तमभ्यज्य धान्यस्वेदेन स्वेदयित्वा यष्टिमधुकविपक्केन तैलेनानुवासयेत्। स्नेहस्वेदाभ्यामविभावितशरीरेणाल्पमौषधमल्पगुणं वा पीतमूर्द्ध्वमधो वा नाभ्येति दोषांश्चोत्क्लिश्य तैः सह वलक्षयमापादयति। तत्राध्मानं हृदयग्रहस्तृष्णा मूर्च्छा दाहश्च भवति। तमयोगमित्याचक्षते। तमाशु वामयेन्मदनफललवणाम्बुभि र्विरेचयेत् तीक्ष्णतरैः कषायैश्च। दुर्व्वान्तस्य तु समुत्क्लिष्टा दोषा व्याप्य शरीरं कण्डूश्वयथुकुष्ठपिड़काज्वराङ्गमर्द्दनिस्तोदनानि कुर्व्वन्ति। ततस्तानवशेषान् महौषधेनापहरेत्। अस्निग्धस्विन्नस्य मृदुविरिक्तस्याधो नाभिः स्तब्धपूर्णोदरता शूलं वातपुरीषसङ्गः कण्डूमण्डलप्रादुर्भावो वा भवति; तमास्थाप्य पुनःसंस्नेह्य विरेचयेत् तीक्ष्णेन। नातिवर्त्तमाने तिष्ठति वा दुष्टसंशोधने तत्-

---

त्यादिना दृढ़मित्यादिनाच। दृढ़ं वलवन्तम् अल्पगुणम् महौषधं पाययेदिति शेषः ॥ २—६ ॥

वातशूलं प्रतिचिकीर्षति अस्निग्धेत्यादिनाऽनुवासयेदित्यन्तेन ग्रन्थसन्दर्भेण। अयोगं लक्षयति स्नेहेत्यादिना शाधयेदित्यन्तेन। अविभावित

सन्तेजनार्थमुष्णोदकं पाययेत्, पाणितापैश्च पार्श्वोदरमुपस्वेदयेत् । ततः प्रवर्त्तन्ते दोषाः । अनुप्रवृत्ते सान्यदोषे जीर्णौषधं बहुदोषमहःशेषं वलञ्चावेक्ष्य भूयो मात्रां विदध्यात् । अप्रवृत्तदोषं दशरात्रादूर्द्ध्वमुपसंस्कृतदेहं स्नेहस्वेदाभ्यां भूयः शोधयेत् । दुर्व्विरेच्यमास्थाप्य पुनः संस्नेह्य विरेचयेत् ॥ ७ ॥

[illegible]र्भैर्वेगाघातशीलाः प्रायशः स्त्रियो [illegible]पन्ना [illegible] तस्मादेते दुर्व्विरेच्या बहुवात- [illegible]गधान् स्वेदोपपन्नान् शोधयेत्

[illegible]

[illegible]मतिमृदुकोष्ठस्य वा तीक्ष्णाधिक- [illegible]र्येत् ॥ ८ ॥

[illegible] पित्तातिप्रवृत्तिर्बलविस्रंसी वातकोपश्च [illegible] घृतेनाभ्यज्यावगाह्य शीतास्वप्सु शर्करा-मधु[illegible]द्यथास्वम् । विरेचनातियोगे कफस्राति-प्रवृत्तिरुत्तरकालञ्च सरक्तस्य ; तत्रापि बलविस्रंसी वातकोपश्च बलवान् भवति । तमतिशीताम्बुभिः परिषिच्यावगाह्य वा शीतैस्तण्डुलाम्बुभिर्मधुमिश्रैश्छर्द्दयेत् । पिच्छावस्तिश्चास्मै

मशुद्ध मप्राप्तं वा । अल्पगुणं स्वल्पसम्यक्त्वञ्च । अत्र दुर्व्वान्त दुर्विरिक्तांश्च विशिनष्टि दुर्विरिक्तस्येत्यादिना स्निग्धस्येत्यादिना च । अनुप्रवृत्त इति । अत्र जीर्णौषधमित्यतियोगनिमित्तामाशङ्कामपाकरोति ॥ ७—८ ॥

अतियोगमुपक्रमते स्निग्धेत्यादिना । छर्द्दयेदितिच्छर्द्दनमतिबलाय दि-

... चैनमनुवासयेत्, प्रियङ्ग्वादिश्चास्मै तण्डु... ...यच्छेत्। क्षीररसयोश्चान्यतरेण भोजयेत् ॥ ०९ ॥

तस्मिन्नेव वमनातियोगे प्रवृद्धे शोणितं ष्ठीवति छर्दयति वा ; तत्र जिह्वानिःसरणमक्ष्णोर्व्यावृत्तिर्हनुसंहननं तृष्णा हिक्का ज्वरो वैसंज्ञ्यमित्युपद्रवा भवन्ति। तमजासृक्चन्दनोशीराञ्जनलाजचूर्णैः सशर्करोदकैर्मन्थं पाययेत्। फलरसैर्वा सघृतक्षौद्रशर्करैः शुङ्गाभिर्वा वटादीनां पेयां सिद्धां सक्षौद्रां वर्चोग्राहिभिर्वा पयसा जाङ्गलरसेन वा भोजयेत्। अतिस्रुतशोणितविधानेनोपचरेत् ॥ १० ॥

जिह्वामतिसर्पितां त्रिकटुकलवणचूर्णप्रघृष्टां तिलद्राक्षाप्रलिप्तां वा पीड़येत्। प्रविष्टायामम्लमन्ये तस्य पुरस्तात् खादेयुः। व्यावृत्ते चाक्षिणी घृताभ्यक्ते पीड़येत्। हनुसंहनने वातश्लेष्महरं नस्यं स्वेदांश्च विदध्यात्। तृष्णादिषु च यथास्वं प्रतिकुर्व्वीत। विसंज्ञे वेणुवीणागीतस्वनं श्रावयेत् ॥ ११

विरेचनातियोगे च सचन्द्रकं सलिलमधः स्रवति। ततो मांसधावनप्रकाशमुत्तरकालं जीवशोणितञ्च। ततो

षयम्। तदप्यङ्गुल्या कण्ठावमर्षेणैवोपदिशन्ति प्राञ्चः कर्त्तुम्। पिच्छावस्तिः "चि० ३८ अ०" निवेदयिष्यते। प्रियङ्ग्वादिः "सू० ३८अ०" द्रष्टव्यः। व्यावृत्तिर्वहिर्गतिः। हनुसंहननं हनुसङ्घातः सम्वृतहनुतेति यावत्। अतिस्रुतशोणितविधानेन "सू० १४अ०" उपदिष्टेन "उ० ४० । ४५अ०" रक्तातिं

गुदनिःसरणं वेपथुर्वमनातियोगोपद्रवाश्चास्य भवन्ति। तमपि निस्रुतशोणितविधानेनोपचरेत्। निःसर्पितगुदस्य गुदमभ्यज्य परिस्वेद्यान्तः पीडयेत्, क्षुद्ररोगचिकित्सितं वा वीक्षेत। वेपथौ वातव्याधिविधानं कुर्वीत। जिह्वानिःसरणादिषूक्तः प्रतीकारः। अतिप्रवृत्ते वा जीवशोणिते काश्मरीफलबदरी-दूर्व्वोशीरैः शृतेन पयसा घृतमण्डाञ्जनयुक्तेन सुशीतेनास्थापयेत्। न्यग्रोधादिकषायैरिक्षुरसघृतशोणितसंसृष्टैश्चैनं वस्ति-भिरुपाचरेत्। शोणितष्ठीवने रक्तपित्तरक्तातीसारक्रियाश्चास्य विदध्यात्। न्यग्रोधादिश्चास्य विदध्यात् पानभोजनेषु॥१२॥

जीवशोणितरक्तपित्तयोश्च जिज्ञासार्थं तस्मिन् पिचु प्लोतं वा क्षिपेत्। यद्युष्णोदकप्रक्षालितमपि वस्त्रं रञ्जयति तज्जी-वशोणितमवगन्तव्यम्। सभक्तञ्च शुने दद्यात् शक्तुसंमिश्रं वा स यद्युपभुञ्जीत तज्जीवशोणितमवगन्तव्यम्॥ १३॥

सशेषान्नेन बहुदोषेण रूक्षेणानिलप्रायकोष्ठेनानुष्णम-स्निग्धं वा पीतमौषधमाध्मापयति। तत्रानिलमूत्रपुरीषसङ्गः समुन्नतोदरता पार्श्वभङ्गो गुदवस्तिनिस्तोदनं भक्तारुचिश्च भवति, तच्चाध्मानमित्याचक्षते तमुपस्वेद्यानाहवर्त्तिदीपनवस्ति-क्रियाभिरुपचरेत्॥ १४॥

[illegible] सर्पितां निर्गताम्। क्षुद्ररोगचिकित्-सितं वा वीक्षेत गुदभ्रंशविधानेन प्रतिकर्त्तुमित्यभिसन्धिः॥ ८—१२॥

पिच्छावस्तिर्यष्टिमधुककल्कप्रगाढतिलकल्कमधुघृतयुक्तः । शीताम्बु-परिषिक्तञ्चैनं पयसा भुक्तवन्तं घृतमण्डेन यष्टीमधुकसिद्धेन तैलेन वानुवासयेत् ॥ १५ ॥

क्रूरकोष्ठस्यातिप्रभूतदोषस्य मृद्वौषधमवचारितं समुत्क्लिश्य दोषान् न निःशेषानपहरति, ततस्ते दोषाः परिस्रावमापादयन्ति । तत्र दौर्बल्योदरविष्टम्भारुचिगात्रसदनानि भवन्ति । सवेदनौ चास्य पित्तश्लेष्माणौ परिस्रवतस्तं परिस्रावमित्याचक्षते । तमजकर्णधवतिनिशपलाशकषायैर्मधुसंयुक्तैरास्थापयेत् । उपशान्तदोषं स्निग्धम् भूयः संशोधयेत् ॥१६

अतिरूक्षेऽतिस्निग्धे वा भेषजेनावचारितेनाप्राप्तयोर्व्वा वातवर्च्चसोरुदीरणेन वेगाघातेन वा प्रवाहिका भवति ; तत्र सवातं सदाहं सशूलं सश्वेतं सपिच्छिलं कृष्णं रक्तं वा भृशं प्रवाहमाणः कफमुपविशति । तं परिस्रावविधानेनोपचरेत् ॥ १७ ॥

जीवेति । जीवादानचिकित्सितं हि अतियोगचिकित्सितएवोपदिष्ट

यस्तूर्द्ध्वमधो वा भेषजवेगं प्रवृत्तमज्ञत्वाद्विहन्ति, तस्योपसरणं हृदि कुर्व्वन्ति दोषाः । तत्र प्रधानमर्म्मसन्तापाद्वेदनाभिरत्यर्थं पीड्यमानो दन्तान् किटकिटायते, उद्धताक्षो जिह्वां खादति, प्रताम्यत्यचेताश्च भवति, तं परिवर्ज्जयन्ति मूर्खाः । तमभ्यज्य धान्यस्वेदेन स्वेदयेत्, यष्टिमधुकसिद्धेन च तैलेनानुवासयेत् । शिरोविरेचनञ्चास्मै तीक्ष्णं विदध्यात् । ततो यष्टिमधुकमिश्रेण तण्डुलाम्बुना छर्द्दयेत्, यथादोषोच्छ्रायेन चैनं वस्तिभिरुपचरेत् ॥ १८ ॥

यस्तूर्द्ध्वमधो वा प्रवृत्तदोषः शीतागारमुदकमनिलमन्यद्वा सेवेत, तस्य दोषाः स्रोतःस्ववलीयमानाः घनीभावमापन्ना वातमूत्रशकृद्ग्रहमापाद्य विबध्यन्ते । तस्याटोपो दाहो ज्वरो वेदनाश्च तीव्रा भवन्ति; तमाशु वामयित्वा प्राप्तकालां क्रियां कुर्व्वीत । अधोभागे त्वधोभागहरद्रव्यसैन्धवाम्लमूत्रसंसृष्टं विरेचनं पाययेत्, आस्थापनमनुवासनञ्च यथादोषं विदध्यात्, यथादोषमाहारक्रमञ्च । उभयतो भागे तूपद्रवविशेषान् यथास्वं प्रतिकुर्व्वीत ॥ १९ ॥

या तु विरेचने गुदपरिकर्त्तिका तद्वमने कण्ठक्षणनम् ।

सिध्यतोऽत्र प्रतीकारक्रमं प्रति ज्ञोषमास्ते । स शेषेत्यादि । आनाहवर्त्तिरुदरचिकित्सिते द्रष्टव्या । यस्त्वित्यादि । प्रधानमर्म्म हृदयम् ॥ १३—१८ ॥

यदधः परिस्रवणं स जङ्घभागे श्लेष्मप्रसेकः। या त्वधः प्रवाहिका सा तृड्‌ शुष्कोद्गारा इति ॥ २० ॥

भवति चात्र।

यास्त्वेता व्यापदः प्रोक्ता दश पञ्च च तत्त्वतः।
एता विरेकातियोगदुर्य्योगायोगजाः स्मृताः ॥ २१ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
वमनविरेचनव्यापच्चिकित्सितं नाम
चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

परिशिष्टं प्राञ्जलाऽभिधानम् ॥ १८—२१ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये चिकित्सितस्थाने वमनविरेचनव्यापच्चिकित्सितं नामचतुस्त्रिंशोऽध्यायः।

पञ्चत्रिंशोऽध्यायः।

अथातो नेत्रवस्तिप्रमाणप्रविभागचिकित्सितं व्याख्यास्यामः ॥ १

वमनविरेचनादनन्तरं हि वस्तिकर्म्माऽभिमन्यन्त्याचार्य्याः, कर्म्मच तद्विरूक्षमातुरमुत्थापयितुं नेत्रवस्तिप्रमाणवेदनमवलम्बते तदिदानीं नेत्रवस्तिप्रमाणप्रविभागचिकित्सितमधिकरोति अथात इत्यादिना। वस्तिनेत्राणां

तत्र स्नेहादीनां कर्म्मणां वस्तिकर्म्म प्रधानतममाहुराचार्य्याः। कस्मात्? अनेककर्म्मकरत्वाद्वस्तेः। इह वस्तिर्नानाविधद्रव्यसंयोगाद्दोषाणां संशोधनसंशमनसंग्रहणानि करोति, क्षीणशुक्रं वाजीकरोति, कृशं वृंहयति, स्थूलं कर्षयति, चक्षुः प्रीणयति, वलीपलितमुपहन्ति, वयः स्थापयति। शरीरोपचयं वर्णबलमारोग्यमायुषः परिवृद्धिञ्च करोति सम्यगुपासितः; तथा ज्वरातीसार-तिमिर-प्रतिश्याय-शिरोरोग-धिमन्थार्द्दिताक्षेपक-पक्षाघातैकाङ्गसर्व्वाङ्गरोगाध्मानोदर-शर्करा-शूल-वृद्ध्युपदंशानाह-मूत्रकृच्छ्र-गुल्म-वातशोणित-वातमूत्र-पुरीषोदावर्त्त-शुक्रार्त्तवस्तन्यनाश-हृद्धनुमन्याग्रहार्शोऽश्मरी-मूढगर्भप्रभृतिषु चात्यर्थमुपयुज्यते ॥ २ ॥

भवति चात्र।

वस्तिर्वाते च पित्ते च कफे रक्ते च शस्यते।
संसर्गे सन्निपाते च वस्तिरेव हितः सदा ॥ ३ ॥

तत्र सांवत्सरिकाष्टद्वादशवर्षाणां षडष्टदशाङ्गुलप्रमाणानि कनिष्ठिकानामिकामध्यमाङ्गुलिपरिणाहान्यग्रेऽर्द्धाङ्गुलाध्यर्द्धाङ्गुलतृतीयाङ्गुलसन्निविष्टकर्णिकानि काङ्कश्येनवर्हिपत्रनाड़ीतुल्य-

---

वस्तिद्रव्याणाञ्च प्रमाणानि प्रविभज्यन्तेऽनेनेति नेत्रवस्तिप्रमाणप्रविभागः। प्रविभागइति चेन्नायं सिद्धस्तर्हि समभ्यस्तात्मपदार्थो वहुव्रीहिः ॥ १ ॥

अत्र प्रकृतेरोपयोगिकत्वं व्याख्येयमाचार्य्यः प्रथमन्तावदुपजीव्यभूतं वस्तिं स्तौति तत्रेति ॥ २—३ ॥

प्रवेशानि मुद्गमाषकलायमात्रस्रोतांसि विदध्यात् नेत्राणि। तेषु त्वास्थापनद्रव्यप्रमाणमातुरहस्तसम्मितेन प्रसृतेन सम्मितौ प्रसृतौ द्वौ चत्वारोऽष्टौ विधेयाः॥ ४॥

भवति चात्र।

वर्षोत्तरेषु नेत्राणां वस्तिमानस्य चैव हि।
वयोबलशरीराणि समीक्ष्य वर्द्धयेद्विधिम्॥ ५॥

पञ्चविंशतेरूर्द्ध्वं द्वादशाङ्गुलं मूलेऽङ्गुष्ठोदरपरिणाहमग्रे कनिष्ठिकोदरपरिणाहमग्रे त्र्यङ्गुलसन्निविष्टकर्णिकं गृध्रपक्षनाड़ीतुल्यप्रवेशं कोलास्थिमात्रच्छिद्रं, क्लिन्नकलायमात्रच्छिद्रमित्येके। सर्व्वाणि मूले वस्तिनिबन्धनार्थं द्विकर्णिकानि। आस्थापनद्रव्यप्रमाणन्तु विहिता द्वादश प्रसृताः। सप्ततेस्तूर्द्ध्वं नेत्रप्रमाणमेतदेव, द्रव्यप्रमाणन्तु द्विरष्टवर्षवत्॥ ६॥

प्रक्रान्तमनुसरति तत्रेति। संवत्सरे भूतः सांवत्सरिकः। द्विरष्टवर्षाणामिति वर्षशब्दान्तत्वात् "चित्तवति नित्यम्" इति "पा० सू० ५।१।८९" तद्धितस्य लुक्। अत्र षड़ष्टदशाङ्गुलता यथाक्रमं सांवत्सरिकाष्टद्विरष्टवर्षान् प्रति-लक्षणीया। एतेन शेषाणि व्याख्यातानि। अधिकमर्द्धमत्रेत्यध्यर्द्धम्। अर्द्धं तृतीयमत्रेत्यर्द्धतृतीयम् सार्द्धद्वितयमित्यर्थनिष्कर्षः प्रसृतोऽञ्जलिरितिपर्य्यायौ। अनेन निदर्शनेनानुक्तेषु द्विवर्षादिषु प्रमाणतोनेत्रवस्त्योर्वृद्धिपरिकल्पनामुपदिदिक्षति वर्षोत्तरेष्वित्यादिना। षड़्विंशतिवर्षादौ विशिनष्टि पञ्चेति। अत्राऽपि प्रक्रान्तत्वात् प्रसृतानातुरहस्तमात्रसम्मितानेव *प्राहयन्ति कुशलाः॥ ४—६॥*

तत्र नेत्राणि सुवर्णरजतताम्रायोरीतिदन्तशृङ्गमणितरुसारमयाणि.श्लक्ष्णानि दृढानि गोपुच्छाकृतीन्यृजूनि गुटिकामुखानि । बस्तयश्चाहतानां मृदवो नातिबहला दृढाः प्रमाणवन्तो गोमहिषवराहाजोरभ्राणाम् ॥ ७ ॥

नेत्रालाभे हिता नाड़ी नलवंशास्थिसम्भवा ।
वस्त्यलाभे हितं चार्म्मं सूक्ष्मं वा तान्तवं घनम् ॥
वस्तिं निरुपदिग्धन्तु शुद्धं सुपरिमार्ज्जितम् ।
मृद्वनुत्तहीनञ्च मुहुः स्नेहविमर्द्दितम् ॥ ८ ॥
नेत्रमूले प्रतिष्ठाप्य न्युब्जन्तु विहताननम् ।
बद्ध्वा लोहेन तप्तेन चर्म्म स्रोतसि निर्द्दहेत् ॥
परिवर्त्य ततो वस्तिं बद्ध्वा गुप्तं निधापयेत् ।
आस्थापनञ्च तैलञ्च यथावत् तेन दापयेत् ॥
मृदुर्वस्तिः प्रयोक्तव्यो विशेषाद् बालवृद्धयोः ॥
तयोस्तीक्ष्णः प्रयुक्तस्तु वस्तिर्हिंस्याद्बलायुषी ॥ ९ ॥

तत्र द्विविधो वस्तिः—नैरूहिकः स्नैहिकश्च । आस्थापनं निरूह इत्यनर्थान्तरम् । तस्य विकल्पो माधुतैलिकः । तस्य पर्यायशब्दो यापनो युक्तरथः सिद्धवस्तिरिति । स दोषनिर्हर-

---

नेत्रेत्यादि । प्रतिष्ठाप्य वैपरीत्येन स्थापयित्वा पश्चाद्भावे स्थापयित्वेति यावत् । स्रोतसि नेत्रस्रोतोऽवच्छेदे चर्म्मनिर्द्दहेत् नेत्रानुसारिस्फुटछिद्रार्थमित्याकूतम् । परिवर्त्यान्तर्भागं बहिष्कृत्य मपहृत्य, बद्ध्वा सूत्रेणेति शेषः ।

शाखाशरीररोगहरणाद्वा निरूहः, वयःस्थापनादायुःस्थापनाद्वा-स्थापनम् । माधुतैलिकविधानञ्च निरूहक्रमचिकित्सिते व-क्ष्यामः ॥ १० ॥

तत्र यथाप्रमाणगुणविहितः स्नेहवस्तिविकल्पोऽनुवासनः पादावकृष्टः, अनुवसन्नपि न दुष्यत्यनुदिवसं वा दीयत इत्यनु-वासनः । तस्यापि विकल्पोऽर्द्धमात्रावकृष्टोऽपरिहार्य्यो मा-त्रावस्तिरिति ॥ ११ ॥

निरूहः शोधनो लेखी स्नेहनो बृंहणो मतः ।
निरूहशोधितान् मार्गान् सम्यक् स्नेहोऽनुगच्छति ॥
अपेतसर्व्वदोषासु नाड़ीष्विव वहज्जलम् ।
सर्व्वदोषहरश्चासौ शरीरस्य च जीवनः ॥
तस्माद्विशुद्धदेहस्य स्नेहवस्तिर्विधीयते ॥ १२ ॥

तत्रोन्माद-भय-शोक-पिपासारोचकाजीर्णार्शः-पाण्डुरोग-भ्रम-मद-मूर्च्छा-छर्द्दि-कुष्ठ-मेहोदर-स्थौल्य-श्वास-कास-कण्ठ-शोष-शोफोपसृष्ट-क्षतक्षीण-चतुस्त्रिमासगर्भिणी-दुर्व्वलाग्निसहा बालवृद्धौ च वातरोगादृते क्षीणा नानुवास्या नास्थापयितव्याः ॥ १३ ॥

एष सुपदिष्टोऽप्यर्व्वाचीनाः परिदृष्टकर्म्माणो भिषजोऽचिरन्तनैः प्राचीनभि-भिरविष्कृतमचिरन्तनम् "डुस" इत्यादिसमाख्यं वस्तिजातमेवापत्थुप सुसुखप्रयोगसौकर्य्याद्वाऽपहिनाकृतत्वाच्च । गुणोऽत्र विवक्षितदोषप्रति-पक्षत्वेन लक्षणीयः । पादावकृष्टः पादहीनः । तत्र पादावकृष्टस्यापि अर्द्धमात्रावकृष्टः पादावकृष्टः ॥ ७—११ ॥

उदरी च प्रमेही च कुष्ठी स्थूलश्च मानवः ।
अवश्यं स्थापनीयास्ते नानुवास्याः कथञ्चन ॥
असाध्यता विकाराणां स्यादेषामनुवासनात् ।
असाध्यत्वेऽपि भूयिष्ठं गात्राणां सदनं भवेत् ॥ १४ ॥
पक्वाशये तथा श्रोण्यां नाभ्यधस्ताच्च सर्व्वतः ।
सम्यक् प्रणिहितो वस्तिः स्थानेष्वेतेषु तिष्ठति ॥
पक्वाशयाद्वस्तिवीर्य्यं खैर्देहमुपसर्पति ।
वृक्षमूले निषिक्तानामपां वीर्य्यमिव द्रुमम् ॥
स चापि सहसा वस्तिः केवलः समलोऽपि वा ।
प्रत्येति त्वनिलैर्वीर्य्यमपानाद्यैर्विनीयते ॥
वीर्य्येण वस्तिरादत्ते दोषानापादमस्तकात् ।
पक्वाशयस्थोऽम्बरगो भूमेरर्को रसानिव ॥
स कटीपृष्ठकोष्ठस्थान् वीर्य्येणालोड्य सञ्चयान् ।
उत्खातमूलान् हरति दोषाणां साधुयोजितः ॥
दोषत्रयस्य यस्माच्च प्रकोपे वायुरीश्वरः ।
तस्मात् तस्यातिवृद्धस्य शरीरमभिनिघ्नतः ॥
वायोर्विहन्ते वेगं नान्या वस्तेर्ऋते क्रिया ।
पवनाविद्धतोयस्य वेलावेगमिवोदधेः ॥
शरीरोपचयं वर्णं बलमारोग्यमायुषः ।
कुरुते परिवृद्धिञ्च वस्तिः सम्यगुपासितः ॥ १५ ॥

निरूहस्थादि । वेगोवैषम; वेगनोऽनुवासनस्य इत्यत्र इत्यर्थः ॥१२—१५॥

अत ऊर्द्ध्वं व्यापदो वक्ष्यामः । तत्र नेत्रं चलितं विवर्त्तितं पार्श्वावपीड़ितमत्युत्क्षिप्तमवसन्नं तिर्य्यक्क्षिप्तमिति षट् प्रणिधानदोषाः । अतिस्थूलं कर्कशमवनतमणु भिन्नं सन्निकृष्टविप्रकृष्टकर्णिकं सूक्ष्मातिच्छिद्रमतिदीर्घमतिह्रस्वमित्येकादश नेत्रदोषाः । बहुलताल्पता सच्छिद्रता प्रकीर्णता दुर्बद्धतेति पञ्च वस्तिदोषाः । अतिपीड़ितता शिथिलपीड़ितता भूयो-भूयोऽवपीड़नं कालातिक्रम इति चत्वारः पीड़नदोषाः । आमता हीनतातिमात्रतातिशीततात्युष्णतातितीक्ष्णतातिमृदुतातिस्निग्धतातिरूक्षतातिसान्द्रतातिद्रवतेत्येकादश द्रव्यदोषाः । अवाक्शीर्षोच्छीर्षन्युब्जोत्तानसङ्कुचितदेहास्थिरता दक्षिणपार्श्वशायिनः प्रदानमिति सप्त शय्यादोषाः । एवमेताश्चतुश्चत्वारिंशद्व्यापदो वैद्यनिमित्ताः आतुरनिमित्ताः पञ्चदश आतुरोपद्रवचिकित्सिते वक्ष्यन्ते ॥ १६ ॥

स्नेहस्त्वष्टाभिः कारणैः प्रतिहतो न प्रत्यागच्छति ;— त्रिभिर्दोषैरशनाभिभूतो मलव्यामिश्रो दूरानुप्रविष्टोऽस्विन्नस्यानुष्णोऽल्पोऽभुक्तवतोऽल्पाशनस्य चेति वैद्यातुरनिमित्ता भवन्ति । अयोगस्तूभयोराध्मानं परिकर्त्तिका परिस्रावः प्रवाहिका हृदयोपसरणमङ्गग्रहोऽतियोगो जीवादानमिति नव व्यापदो वैद्यनिमित्ता भवन्ति ॥ १७ ॥

अत इत्यादि । प्रकीर्णता विस्तृतता । अवाक् पादाग्रत इत्यादि ।

भवन्ति चात्र ।

षट्सप्ततिः समासेन व्यापदः परिकीर्त्तिताः ।
तासां वक्ष्यामि विज्ञानं सिद्धिञ्चैतदनन्तरम् ॥ १८ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
नेत्रवस्तिप्रमाणप्रविभागचिकित्सितं
नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

क्षेप इत्यादि । उभयोरास्थापनानुवासनयोरयोगश्च योगाभावो मिथ्यायोगश्चेत्याहुः "दैतेयदनुजेन्द्रारि दानवाः" इति पदैकदेशस्याभेदेन परिग्रहात् । अङ्गप्रपच्छोऽङ्गवेदना अतिरोहितार्थमन्यत् ॥ १६—१८ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
चिकित्सितस्थाने नेत्रवस्तिप्रमाणप्रविभागचिकित्सितं नाम
पञ्चत्रिंशोऽध्यायः ।

षट्त्रिंशोऽध्यायः ।

अथातो नेत्रवस्तिव्यापच्चिकित्सितं व्याख्यास्यामः ॥ १ ॥

पूर्व्वं हि नेत्रादि व्यापदः प्रकाश्य "तासां वक्ष्यामि विज्ञानं सिद्धिञ्चैतदनन्तरम्" इत्युद्दिष्टम् तदिदानीं नेत्रवस्तिव्यापच्चिकित्सितमधिकरोति अथात इत्यादिना ॥ १ ॥

अथ नेत्रे विचलिते तथा चैव विवर्त्तिते ।
गुदे क्षतं रुजा वा स्यात् तत्र सद्यः क्षतक्रिया ॥
अत्युत्क्षिप्तेऽवसन्ने च नेत्रे पायौ भवेद्रुजा ।
विधिरत्रापि पित्तघ्नः कार्य्यः स्नेहैश्च सेचनम् ॥
तिर्य्यक्प्रणिहिते नेत्रे तथा पार्श्वावपीड़िते ।
मुखस्यावरणाद्वस्तिर्न सम्यक् प्रतिपद्यते ॥
ऋजु नेत्रं विधेयं स्यात् तत्र सम्यग्विजानता ॥
अतिस्थूले कर्कशे च नेत्रे चावनते तथा ।
गुदे भवेत् क्षतं रुक् च साधनं पूर्व्ववत् स्मृतम् ॥
आसन्नकर्णिके नेत्रे भिन्नेऽणौ चाप्यपार्थकः ।
प्रवेशिको भवेद्वस्तिस्तस्माद्दोषान् विवर्ज्जयेत् ॥
प्रकृष्टकर्णिके रक्तं गुदमर्म्मप्रपीड़नात् ।
स्रवत्यत्रापि पित्तघ्नो विधिर्वस्तिश्च पिच्छिलः ॥

उक्तानुक्रमेण लक्षणान्युपदिश्य व्यापदः प्रतिचिकीर्षन्नाह अथेति । विवर्त्तिते अपवर्त्तिते अपवर्त्य प्रणीते इति यावत् । अत्युत्क्षिप्ते चतुरङ्गुलमतीत्य प्रवेशिते, अवसन्ने यथा कथञ्चित् स्पन्दितुमप्यशक्ते पार्श्वावपीड़िते मनाक्-तिर्य्यक् प्रणिहित इत्यर्थः । अभिहितास्तावत् षट्प्रणिधान दोषा इदानीन्तु नेत्रदोषानेवाधिकरोमीत्याह अतीत्यादि । पूर्व्ववत् विचलितादि नेत्रवत् सद्यःक्षतवदिति यावत् । आसन्नकर्णिके सन्निकृष्टकर्णिके । अपार्थको वस्तिरिति शेषः । कुत आह प्रवेशिक इति वस्तेर्वहिर्गतोऽप्रवेशको, भेषजस्याप्रवेशनं क्षरणमित्येतत् । प्रकृष्टकर्णिके गुदमर्म्मप्रपीड़नादतिप्रवेशनेनेति शेषः ।

ह्रस्वे त्वणुस्रोतसि च क्लेशो वस्तिश्च पूर्ववत् ।
प्रत्यागच्छंस्ततः कुर्य्याद्रोगान् वस्तिविघातजान् ॥
दीर्घे महास्रोतसि च ज्ञेयमत्यवपीड़वत् ॥ २ ॥
प्रस्तीर्णे बहले चापि वस्तौ दुर्बद्धदोषवत् ।
वस्तावल्पेऽल्पता चापि द्रव्यस्याल्पगुणा मताः ।
दुर्ब्बद्धे चाणुभिन्ने च विज्ञेयं भिन्ननेत्रवत् ॥
अतिप्रपीड़ितो वस्तिः प्रयात्यामाशयं ततः ।
वातेरितो नासिकाभ्यां मुखतो वा प्रपद्यते ॥
तत्र तूर्णं गलापीड़ं कुर्य्याच्चाप्यवधूननम् ।
शिरःकायविरेकौ च तीक्ष्णौ सेकांश्च शीतलान् ॥
शनैः प्रपीड़ितो वस्तिः पक्वाधानं न गच्छति ।
न च सम्पादयत्यर्थांस्तस्मादयुक्तं प्रपीड़येत् ॥
भूयोभूयोऽवपीड़ेन वायुरन्तः प्रपीड्यते ।
तेनाध्मानं रुजश्चोग्रा यथास्वं तत्र वस्तयः ॥

ह्रस्व इत्यादि पूर्ववत् चासन्नकर्णिकादिवत् वस्तिः प्रत्यागच्छन् बहिरागच्छन्नित्यर्थः । वस्तिविघातजान् मिथ्यायोगप्रवृत्तान् । अत्यवपीड़वत् बलमात्रातिप्रपीड़ित वस्तिवत् ज्ञेयं दुःखमिति शेषः ॥ २ ॥

एकादश नेत्रदोषान् प्रति व्याचिख्यासितमर्थजातं व्याख्यातम् इदानीन्तु वस्तिदोषानेव प्रक्रम्य ब्रूम इत्याह प्रस्तीर्णं इति । प्रस्तीर्णे विस्तीर्णे, बहले दृढ़े दुर्बद्धदोषवत् "दुर्बद्धे" इत्यादिना वक्ष्यमाणदोषवत् । अल्पे क्षुद्र द्रव्यस्याल्पता अल्पगुणाश्च मताः । अणुभिन्ने अल्पं भिन्ने सर्षपाकारच्छिद्राङ्कितत्वे इति यावत्, भिन्ननेत्रवत् अपार्थकसमाख्योदोष इत्यर्थनिष्कर्षः । आह ॥

कालातिक्रमणात् क्लेशो व्याधिश्चाभिप्रवर्द्धते ।
तत्र व्याधिबलन्तु भूयो बस्तिं निधापयेत् ॥
गुदोपदेहशोफौ तु क्लेशोऽपक्वः करोति हि ।
तत्र संशोधनो बस्तिर्हितश्चापि विरेचनम् ॥
हीनमात्रावुभौ बस्ती नातिकार्य्यकरौ मतौ ।
अतिमात्रौ तथानाह-क्लमातीसारकारकौ ॥
मूर्च्छादाहमतीसारं पित्तञ्चात्युष्णतीक्ष्णकौ ।
मृदुशीतावुभौ वातविबन्धाध्मानकारकौ ॥
तत्र हीनादिषु हितः प्रत्यनीकः क्रियाविधिः ।
तत्र सान्द्रे तनुं बस्तिं तनौ सान्द्रञ्च दापयेत् ॥
स्निग्धोऽतिजाड्यकृद्रूक्षः स्तम्भाध्मानकृदुच्यते ।
बस्तिं रूक्षमतिस्निग्धे स्निग्धं रूक्षे च दापयेत् ॥ ३ ॥

व्याख्याताः पञ्चबस्तिव्यापदः इदानीन्तु पीडनदोषानेव व्याख्यास्याम इत्याह अतीत्यादि । यन्त्रैः प्रपीडितः भिन्नेति प्रपीडितः । व्याख्याता हि चत्वारः पीडन दोषाः इदानीन्तु द्रव्यदोषानेव प्रवर्त्तयिष्याम इत्याह गुदोपेति । क्लेशशब्दोऽत्र बस्तिद्रव्यमात्रमुपलक्षयतीति नास्थापने विप्रतिपत्तिः । उभावास्थापनानुवासनबस्ती इत्यर्थः । हीनादिषु हीनातिमात्रोष्णतीक्ष्णमृदुशीतेषु दत्तेष्विति शेषः । प्रत्यनीकस्तु तत्तज्जातोपद्रवविरुद्धः क्रियाविधिः प्रतीकारः क्रमः कार्य्य इति शेषः । यथाहि हीनादिषु सञ्जातोपद्रवा यथार्थं प्रतीकारमन्तरेण प्रशान्तिं नापद्यन्ते न तथा सान्द्रादिषु सञ्जातोपद्रवास्तदिह स्वल्पोपद्रवत्वेन निर्दिशन्ति तत्रेत्यादिना दापयेदित्यन्तेन ग्रन्थसन्दर्भेण ॥ ३ ॥

अतिपीडितवद्दोषान् विद्ध्याच्चाप्यवशीर्षके ।
उच्छीर्षके समुन्नाहं बस्तिः कुर्य्याच्च मेहनम् ॥
तथोत्तरो स्थितौ बस्तिः सुस्विन्नस्य सुखावहः ।
न्युब्जस्य बस्तिर्नाप्नोति पक्वाधानं विमार्गगः ॥
हृद्गुदं बाधते चात्र वायुः कोष्ठमथापि च ॥
उत्तानस्यावृते मार्गे बस्तिर्नान्तः प्रपद्यते ।
नेत्रसंवेजनभ्रान्तो वायुश्चान्तः प्रकुप्यति ॥
देहे सङ्कुचिते दत्तः सक्थ्नोरप्युभयोस्तथा ।
न सम्यगनिलाविष्टो बस्तिः प्रत्येति देहिनः ॥
स्थितस्य बस्तिर्दत्तस्तु क्षिप्रमायात्यवाङ्मुखः ।
न चाशयं तर्पयति तस्मान्नार्थकरो हि सः ॥
नाप्नोति बस्तिर्दत्तस्तु कृत्स्नं पक्वाशयं पुनः ।
दक्षिणाश्रितपार्श्वस्य वामपार्श्वानुगो हितः ॥ ४ ॥
न्युब्जादीनां प्रदानञ्च बस्तेर्नैव प्रशस्यते ।
यस्मादनिलकोपोऽत्र यथास्वं तत्र कारयेत् ॥ ५ ॥

निवेदिता नेत्रकादप्रद्रव्यदोषाः सम्प्रति तु पारिशेष्यात् शयनव्यापत्तिरेव व्याकरिष्याम इत्याह अतीत्यादि । अवशीर्षके अवाक्शीर्षके, अतिपीडितवद्दोषान् मारुतान् दृष्ट्वा विधिज्ञापि प्रत्यागत्याऽतिपीडितवदेव कुर्यादिति योजना । समुन्नाहं समुन्नद्धमुत्तोत्थ बद्धमित्येतत् । प्रत्येति पुनरागच्छति । अवाङ्मुखोऽधोमुखः दक्षिणः शय्याभिमिनः पार्श्वोऽस्येति दक्षिणाश्रितपार्श्वः ॥ ४—५ ॥

व्यापदः स्नेहवस्तेस्तु वक्ष्यन्तेऽत्र चिकित्सिते ।
अयोगाद्यास्तु वक्ष्यामि व्यापदः सचिकित्सिताः ॥ ६ ॥
अनुष्णोऽल्पौषधो हीनो वस्तिर्नैति प्रयोजितः ।
विष्टम्भाध्मानशूलैश्च तमयोगं प्रचक्षते ॥
तत्र तीक्ष्णो हितो वस्तिस्तीक्ष्णश्चापि विरेचनम् ॥ ७ ॥
सशेषान्ने तथा भुक्ते बहुदोषे च योजितः ।
अत्याशितश्चातिबहुर्वस्तिर्मन्दोष्ण एव च ॥
अनुष्णलवणस्नेहो ह्यतिमात्रोऽथवा पुनः ।
तथा बहुपुरीषश्च क्षिप्रमाध्मापयेन्नरम् ॥
हृत्कटीपार्श्वपृष्ठेषु शूलं तत्रातिदारुणम् ॥
तत्र तीक्ष्णतरो वस्तिर्हितश्चाप्यनुवासनम् ॥ ८ ॥
अतितीक्ष्णोष्णलवणो रूक्षो वस्तिः प्रयोजितः ॥
सपित्तं कोपयेद्वायुं कुर्य्याच्च परिकर्त्तिकाम् ।
नाभिवस्तिगुदं तत्र छिन्दन्तीवातिदेहिनः ॥
पिच्छावस्तिर्हितस्तत्र स्नेहश्च मधुरैः शृतः ॥ ९ ॥

एतावदेतावतैव स्नेहवस्तेस्तु सर्व्वा व्यापदो व्याख्याता भवन्तीत्यावेदयन् प्रतिजानीते व्यापद इति । अथानन्तरमनुवासनोत्तरवस्तिचिकित्सिते इति यावत् । पूर्व्वाध्याये सूचितानां चतुश्चत्वारिंशद्व्यापदां प्रतीकारक्रमोऽभिहितः इदानीं स्वयञ्च वक्तव्यत्वेनायोगाध्मान-परिकर्त्तिका-परिस्राव-प्रवाहिका-हृदयोपसरणाङ्गग्रहातियोगजीवादानसमाख्यानां नवानां व्यापदां सनिदानं विधिं निवेदयामीत्यवहिताः शृणुध्वमित्यभिसन्धायाह अयोगाद्या इत्यादि ॥ ६ ॥

अत्यम्ललवणस्तीक्ष्णः परिस्रावाय कल्पते ।
दौर्ब्बल्यमङ्गसादश्च जायते तत्र देहिनः ॥
परिस्रवेत् ततः पित्तं दाहं सञ्जनयेद्गुदे ।
पिच्छावस्तिर्हितस्तत्र वस्तिः क्षीरघृतस्य च ॥ १० ॥
प्रवाहिका भवेत् तीक्ष्णान्निरूहात् सानुवासनात् ।
सदाह-शूलं कृच्छ्रेण वासृक् ततोपविश्यते ॥
पिच्छावस्तिर्हितस्तत्र पयसा चैव भोजनम् ।
सर्पिर्मधुरकैः सिद्धं तैलञ्चाप्यनुवासनम् ॥ ११ ॥
अतितीक्ष्णो निरूहो वा सवाते चानुवासनः ।
हृदयस्योपसरणं कुरुते चाङ्गपीड़नम् ॥
दोषैस्तत्र रुजस्ताभ्यां मदोमूर्च्छाङ्गगौरवम् ।
सर्व्वदोषहरं वस्तिं शोधनं तत्र दापयेत् ॥ १२ ॥
रूक्षस्य वहुवातस्य तथा दुःशयितस्य च ।
वस्तिरङ्गग्रहं कुर्य्याद्रूक्षो मृद्वल्पभेषजः ॥
तत्राङ्गसादः प्रस्तम्भो जृम्भोद्वेष्टनवेपकाः ।
पर्व्वभेदश्च तच्चेष्टाः स्वेदाभ्यञ्जनवस्तयः ।
अत्युष्णतीक्ष्णोऽतिवहुर्दत्तोऽतिस्वेदितस्य च ।
अल्पदोषस्य वा वस्तिरतियोगाय कल्पते ॥
विरेचनातियोगेन समानं तच्चिकित्सितम् ।
पिच्छावस्तिप्रयोगश्च तत्र शीतः सुखावहः ॥

अतियोगात् परं यत्र जीवादानं विरिक्तवत् ।
देयस्तत्र हितश्चापि पिच्छावस्तिः सशोणितः ॥ १३ ॥
नवैता व्यापदो यास्तु निरूहं प्रत्युदाहृताः ।
स्नेहवस्तिष्वपि हि ता विज्ञेयाः कुशलैरिह ॥ १४ ॥
इत्युक्ता व्यापदः सर्व्वाः सलक्षणचिकित्सिताः ।
भिषजा च तथा कार्य्यं यथैता न भवन्ति हि ॥ १५ ॥
पश्चादिरेको वान्तश्च ततश्चापि निरूहणम् ।
सद्योनिरूढोऽनुवास्यः सप्तरात्राद्विरेचितः ॥ १६ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
नेत्रवस्तिव्यापच्चिकित्सितं नाम
षट्त्रिंशोऽध्यायः ॥ ३६ ॥

अतीत्यादि । तत्र देयो निस्रुतशोणित विधानेनोपचार इति गम्यते विरिक्तवदिति विशेषणात् । निरूहोक्ता नवैताव्यापदः स्नेह वस्तावतिदिशति नवैता इति । अतिरोहितार्थं मन्यत् ॥ ७—१६ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्ति विरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
चिकित्सितस्थाने नेत्रवस्तिव्यापच्चिकित्सितं नाम षट्त्रिंशोऽध्यायः ॥

सप्तत्रिंशोऽध्यायः।

अथातोऽनुवासनोत्तरवस्तिचिकित्सितं व्याख्यास्यामः ॥१॥

विरेचनात् सप्तरात्रे गते जातबलाय च।
कृतान्नायानुवास्याय सम्यग्देयोऽनुवासनः॥
यथावयो निरूहाणां या मात्राः परिकीर्त्तिताः।
पादावकृष्टास्ताः कार्य्याः स्नेहवस्तिषु देहिनाम्॥
उत्सृष्टानिलविण्मूत्रे नरे वस्तिं विधापयेत्।
एतैर्हि विहतः स्नेहो नैवान्तः प्रतिपद्यते॥
स्नेहवस्तिर्विधेयस्तु नाविशुद्धस्य देहिनः।
स्नेहवीर्य्यं तथा धत्ते देहश्चानुविसर्पति॥ २॥
अत ऊर्द्ध्वं प्रवक्ष्यामि तैलानीह यथाक्रमम्।
पानान्वासननस्येषु यानि हन्युर्गदान् बहून्॥

पूर्व्वं हि "सद्योनिरूढोऽनुवास्यः सप्तरात्राद्विरेचितः" इति समासेन निरदिक्षत्, न तावदेतावता प्रतिपित्सितमर्थं प्रभवति कश्चित् प्रतिपादयिता यथावत् प्रतिपत्तुं प्रतिपादयितुं वा शिष्येभ्यः, तदिदानीं प्रपञ्चेनानुवासनकर्म्म प्रायेणैककार्य्यकत्वसङ्गत्योत्तरवस्तिकर्म्म चोपदिदिक्षुरिदानीमनुवासनोत्तरवस्तिचिकित्सितमधिकरोति अथात इत्यादिना। अनुवासनं स्नेहवस्तिरित्यनर्थान्तरम्। एतैरिति, पुरुषा उत्सृष्टतयोपसर्ज्जनीभूतानामनिलविण्मूत्राणां परामर्शः क्रियते। [illegible] [illegible] स्नेहमिति ॥ १—२ ॥

शटीपुष्करकृष्णाह्वा-मदनामरदारुभिः ।
शताह्वाकुष्ठयष्ट्याह्व-वचाविल्वहुताशनैः ॥
सुपिष्टैर्द्विगुणक्षीरं तैलं तोयचतुर्गुणम् ।
पक्वा वस्तौ विधातव्यं मूढ़वातानुलोमनम् ॥
अर्शांसि ग्रहणीदोषमानाहं विषमज्वरम् ।
कट्यूरुपृष्ठकोष्ठस्थान् वातरोगांश्च नाशयेत् ॥ ३ ॥
वचापुष्करकुष्ठैला-मदनामरसिन्धुजैः ॥
काकोलीद्वययष्ट्याह्व-मेदायुग्मनराधिपैः ॥
पाठाजीवकजीवन्ती-भार्गीचन्दनकट्फलैः ।
सरलागुरुविल्वाम्बु-वाजिगन्धाग्निवृद्धिभिः ॥
विडङ्गारग्वधश्यामा-चित्रकमागधिकर्द्धिभिः ।
पिष्टैस्तैलं पचेत् चीरपञ्चमूलरसान्वितम् ॥
गुल्मानाहाग्निसङ्गार्शोग्रहणीमूत्रसङ्गिनाम् ।
अन्वासनविधौ युक्तं शस्तेऽनिलरोगिणाम् ॥ ४ ॥
चित्रकातिविषापाठा-दन्तीविल्ववचामिषैः ।
सरलांशुमतीरास्ना-नीलिनीचतुरङ्गुलैः ॥

शत इत्यादि । अन्वासनमनुवासनम् । वचेत्यादि । मेदायुग्मं मेदा महामेदा च तदभावे अश्वगन्धा शारिवा च ग्राह्या, नराधिपश्चतुरङ्गुलः । ऋद्धिर्वृद्धिश्च स्वनाम प्रसिद्धे तयोरभावे महाबला बलाच देये, चौरेति । चीरमत्र तैलसमं महापञ्चमूलक्वाथस्य चतुर्गुण इत्याहुः प्राञ्चः । आमिषं जटामांसी ।

चव्याजमोदा-काकोली-मेदायुग्म-सुरद्रुमैः।
जीवकर्षभ-वर्षाभू-वत्सगन्धा-शताह्वयैः।
रेण्वश्वगन्धामञ्जिष्ठाशठीपुष्करतस्करैः॥
सक्षीरं विपचेत् तैलं मारुतामयनाशनम्॥
गृध्रसीखञ्जकुब्जाढ्य-मूत्रोदावर्त्तरोगिणाम्।
शस्यतेऽल्पबलाग्नीनां बस्तावाशु नियोजितम्॥ ५॥
भूतिकैरण्डवर्षाभू-रास्नावृषकरोहिषैः।
दशमूलसहाभार्गी-षड्ग्रन्थामरदारुभिः॥
बलानागबलामूर्व्वा-वाजिगन्धामृताह्वयैः।
सहाचर-वरी-विश्वा-काकनासा-विदारिभिः॥
यव-माषातसी-कोल-कुलत्थैः क्वथितैः शृतम्।
जीवनीयप्रतीवापं तैलं क्षीरचतुर्गुणम्॥
अङ्गोरुत्रिकपार्श्वांस-बाहुमन्याशिरःस्थितान्।
हन्याद्वातविकारांस्तु बस्तियोगैर्निषेवितम्॥ ६॥
जीवन्त्यतिबलामेदा-काकोलीद्वयजीवकैः।
ऋषभातिविषा-कृष्णा-काकनासा-वचामरैः॥

जीवकर्षभकयोरभावे गुडूची वंशलोचना च प्रदेये। तस्करः चोरपुष्पी, [illegible] [illegible] इति यावत्। भूतिकं यमानी, रोहिषो गन्धतृणम्, सहा मुद्गपर्णी, सहाचरो नीलझिण्टी, वरी शतावरी॥ १—६॥

रास्नामदनषड्ग्रन्था-सरलाभीरुचन्दनैः ।
स्वयं गुप्ताशटी-शृङ्गी-कलसी-सारिवाद्वयैः ॥
पिष्टैस्तैलघृतं पक्वं क्षीरेणाष्टगुणेन तु ।
तच्चानुवासने देयं शुक्राग्निबलवर्द्धनम् ॥
हृद्यं वातपित्तघ्नं गुल्मानाहहरं परम् ।
नस्ये पाने च संयुक्तमूर्द्ध्वजत्रुगदापहम् ॥ ७ ॥
मधुकाशीरकाश्मर्य्य-कटुकोत्पलचन्दनैः ।
श्यामापद्मकजीमूत-शक्राह्वातिविषाम्बुभिः ॥
तैलपादं पचेत् सर्पिः पयसाष्टगुणेन च ।
न्यग्रोधादिगणक्वाथयुक्तं वस्तिषु योजितम् ॥
दाहासृग्दरवीसर्प-वातशोणित-विद्रधीन् ।
पित्तरक्तज्वराद्यांश्च हन्यात् पित्तकृतान् गदान् ॥ ८ ॥
मृणालोत्पलशालूक-सारिवाद्वयकेशरैः ।
चन्दनद्वयभूनिम्बपद्मबीजकशेरुकैः ।
पटोल-कटुका-रक्ता-गुन्द्रा-पर्पट-वासकैः ।
पिष्टैस्तैलमिदं पक्वं तथामलरसेन च ॥
क्षीरद्विगुणसंयुक्तं वस्तिकर्म्मणि योजितम् ।
नस्येऽभ्यञ्जनपाने वा हन्यात् पित्तगदान् बहून् ॥ ९ ॥

जीवन्तीति, भद्रदारु देवदारु, मधीकः शतावरी, काकली-वृश्चिकपर्णी, जीमूत

त्रिफलातिविषा-मूर्व्वा-त्रिवृच्चित्रक-वासकैः ।
निम्बारग्वध-षड्ग्रन्था-सप्तपर्ण-निशाद्वयैः ॥
गुडूचीन्द्रसुरा-कृष्णा-कुष्ठ-सर्षप-नागरैः ।
तैलमेभिः समैः पक्वं सुरसादिरसाप्लुतम् ॥
पानाभ्यञ्जनगण्डूष-नस्यवस्तिषु योजितम् ।
स्थूलतालव्यकण्ड्वादीन् जयेत् कफकृतान् गदान् ॥१०॥
पाठाजमोदा-शार्ङ्गेष्टा-पिप्पलीद्वयनागरैः ।
सरलागुरु-कालीय-भार्गी-चव्यामरद्रुमैः ॥
मरिचैलाभया-कट्वी-शटी-ग्रन्थिक-कट्फलैः ।
तैलमेरण्डतैलं वा पक्वमेभिः समायुतम् ॥
वल्लीकण्टकमूलाभ्यां क्वाथेन द्विगुणेन च ।
हन्यादन्वासनैर्दत्तं सर्व्वान् कफकृतान् गदान् ॥
विडङ्गोदीच्यसिम्बूत्थ-शटीपुष्करचित्रकैः ।
कट्फलातिविषाभार्गी-वचाकुष्ठसुराह्वयैः ॥
मेदामदनयष्ट्याह्व-श्यामानिचुलनागरैः ।
शताह्वानीलिनीरास्ना-कदलीद्वयरेणुभिः ॥
बिल्वाजमोदकृष्णाह्वा-दन्तीचव्यनराधिपैः ।
तैलमेरण्डतैलं वा मुष्ककादिरसाप्लुतम् ॥
श्लीपदोदावर्त्तवातासृग्गुल्मानाहकफामयान् ।

पाठभेदः, रक्षेत्.मञ्जिष्ठां, वृषमूलरसेन वृषपत्रमूलक्वाथेन, इन्द्रसुरा

प्रमेहशर्करार्शांसि हन्यादाश्वनुवासनात् ॥ ११ ॥
अशुद्धमपि वातेन केवलेनातिपीड़ितम् ।
अहोरात्रस्य कालेषु सर्व्वेष्वेवानुवासयेत् ॥
रूक्षश्च बहुवातश्च द्वौ त्रीनप्यनुवासनम् ।
दत्त्वा स्निग्धतनुं ज्ञात्वा ततः पश्चान्निरूहयेत् ॥
अस्निग्धमपि वातेन केवलेनातिपीड़ितम् ।
स्नेहप्रगाढ़ैर्मतिमान् निरूहैः समुपाचरेत् ॥
अथ सम्यङ्निरूढ़न्तु वातादिष्वनुवासयेत् ।
बिल्व-यष्ट्याह्व-मदनफलतैलैर्यथाक्रमम् ॥ १२ ॥
रात्रौ वस्तिं न दद्यात्तु दोषोत्क्लेशो हि रात्रिजः ।
स्नेहो वीर्य्ययुतः कुर्य्यादाध्मानं गौरवं ज्वरम् ॥
अह्नि स्थानस्थिते दोषे वह्नौ चान्नरसान्विते ।
स्फुटस्रोतोमुखे देहे स्नेहौजः परिसर्पति ॥
पित्तेऽधिके कफे क्षीणे रूक्षे वातरुगर्द्दिते ।
नरे रात्रौ च दातव्यं काले चोष्णेऽनुवासनम् ॥

इन्द्रवारुणी, शार्ङ्गेष्टा करञ्जः, काण्डी कटुकी, वंशीकण्टकमूले सू० ३८ अ० द्रष्टव्ये । मुष्ककादिरपि तत्रैव ॥ ७—११ ॥

अशुद्धमिति । अशुद्धमनिर्हृतमलादिकम्, च शब्दस्यानाधिकारोऽयमपि शब्दः वातेनातिपीड़ितम् आध्मानादिना नितरामर्द्दितम्, द्वौ त्रीन् वारानिति शेषः । रात्राविति । दोषोत्क्लेश इति दोषशब्देनेह कफ एवाभिप्रेयते साधारणशब्दविशेषात्, वक्ष्यति हि "पित्तेऽधिके कफे क्षीणे" इत्यादि ।

उष्णे पित्ताधिके वापि दिवा दाहादयो गदाः

सम्भवन्ति यतस्तस्मात् प्रदोषे योजयेद्भिषक् ॥ १३ ॥

शीते वसन्ते च दिवा ग्रीष्मे प्रावृड्घनात्यये ।

स्नेहो दिनान्ते पानोक्तान् दोषान् परिजिहीर्षता ।

अहोरात्रेषु कालेषु सर्व्वेष्वेवानिलाधिकम् ॥ १४ ॥

तीव्रायां रुजि जीर्णान्नं भोजयित्वानुवासयेत् ।

न चाभुक्तवतः स्नेहः प्रणिधेयः कथञ्चन ।

शुद्धत्वाच्छून्यकोष्ठस्य स्नेह ऊर्द्धमथोत्पतेत् ॥

सदानुवासयेच्चापि भोजयित्वार्द्रपाणिनम् ।

ज्वरं विदग्धभुक्तस्य कुर्य्यात् स्नेहः प्रयोजितः ॥

न चातिस्निग्धमशनं भोजयित्वानुवासयेत् ।

मदं मूर्च्छाञ्च जनयेद्द्विधा स्नेहः प्रयोजितः ॥

रूक्षं भुक्तवतो ह्यन्नं बलं वर्णञ्च ह्रापयेत् ।

युक्तस्नेहमतो जन्तुं भोजयित्वानुवासयेत् ॥

यूषक्षीररसैस्तस्माद्यथा व्याधिमवेक्ष्य वा ।

यथोचितात् पादहीनं भोजयित्वानुवासयेत् ॥ १५ ॥

तथाच दोषोत्क्लेशः कफश्चोल्बणम्, तदनर्थं स्फोरयति स्नेह इति । वीर्य्ययुतः उष्णवीर्य्यैश्चान्वितोऽपि स्नेहः प्रतिपक्षमूर्च्छामायामादिकं कुर्य्याद्, रात्रेः सौम्यादित्याकूतम् । स्नेहौजः स्नेहबलम् । प्रागुक्तस्य विधेरपवादमाह पित्ते इति । तन्नमर्थं त्रिभिर्विभिनष्टि उष्णे इति । शीत इत्यादि पानोक्तान् चि० ३१ अ० "वातपित्ताधिकस्योष्णे" इत्यादिना स्नेहपानाभिहितानित्यर्थः । स्नेहः

अथानुवास्यं स्वभ्यक्तमुष्णाम्बुस्वेदितं शनैः ।
भोजयित्वा यथाशास्त्रं कृतचंक्रमणं ततः ॥
विसर्ज्य च शकृन्मूत्रं योजयेत् स्नेहवस्तिना ।
प्रणिधानविधानन्तु निरूहे च प्रवक्ष्यते ॥ १६ ॥
ततः प्रणिहिते स्नेहे उत्तानो वाक्शतं भवेत् ।
प्रसारितैः सर्व्वगात्रैस्तथा वीर्य्यं विसर्पति ॥
ताड़येत् तलयोरेनं त्रीं स्त्रीन् वारान् शनैः शनैः ।
स्फिचोश्चैनं ततः शय्यां त्रीन् वारानुत्क्षिपेत् ततः ॥ १७ ॥
एवं प्रणिहिते वस्तौ मन्दायासोऽथ मन्दवाक् ।
स्वास्तीर्णे शयने काममासीताचारिके रतः ॥ १८ ॥
स तु सैन्धवचूर्णेन शताह्वेन च योजितः ।
देयः सुखोष्णश्च तथा निरेति सहसा सुखम् ॥ १९ ॥

प्रयोक्तव्योऽनुवासनविधिनेत्यभिसन्धिः । आर्द्र पाणिनमित्यतिकालातिपातं निरुणद्धीति गम्यते अनन्तरं भोजयित्वा यथाशास्त्रमित्याद्युक्तेः । द्विधा-शनानुवासनाभ्याम् । युक्तेति । युक्तचंक्रमणं भोजयित्वेति योजना । उक्तमर्थं स्फुटीकृत्यावगमयति युपेति । यथा यथायोग्यैरित्यर्थः । समासेनानुवासनक्रम-मुपदिदिक्षति अथेति । यथाशास्त्रमिति सू० ४६ अ० आहारविधिं प्रकृत्यो-पदिष्टं "भुक्त्वा राजवदासीत" इत्यादिनोक्तं शास्त्रं स्मारयति । प्रयोगसौष्ठवार्थं स्नेहस्य सर्वावयवागमनं कारयितुमिदमुच्यते ताड़येदिति । तलयोः पाद-तलयोः, ताड़येद्गुदाभिमुखमभिस्यन्दात् पाणिनेति शेषः । स्फिचोश्चेति चकारेण ताड़येदिति सम्बन्धः । उत्क्षिपेदित्यधःकायस्योन्नमनार्थम् । तेन हि स्नेहोऽन्त्रेषु कुटिलं क्रामत्यनायासेनेत्यभिसन्धिः ॥ १२—१८ ॥

यस्यानुवासनो दत्तः सद्यदन्वचमाव्रजेत् ।
अत्यौष्ण्यादतितैक्ष्ण्याद्वा वायुना वा प्रपीड़ितः ॥
सवातोऽधिकमात्रो वा गुरुत्वाद्वा सभेषजः ।
तस्यान्योऽल्पतरो देयो न हि स्निह्यत्यतिष्ठति ॥ २० ॥
विष्टब्धानिलविण्मूत्रः स्नेहहीनोऽनुवासनः ।
दाहक्लमप्रवाहार्त्तिकरस्त्वत्यनुवासनः ॥ २१ ॥
सानिलः सपुरीषश्च स्नेहः प्रत्येति यस्य तु ।
चोषचोषौ विना शीघ्रं स सम्यगनुवासितः ॥ २२ ॥
जीर्णान्नमथ सायाह्ने स्नेहे प्रत्यागते पुनः ।
लघ्वन्नं भोजयेत् कामं दीप्ताग्निस्तु नरो यदि ॥
प्रातरुष्णोदकं देयं धान्यनागरसाधितम् ।
तेनास्य दीप्यते वह्निर्भक्ताकाङ्क्षा च जायते ॥ २३ ॥
स्नेहवस्तिक्रमेऽप्येव विधिमाहुर्मनीषिणः ।
अनेन विधिना षड्वा सप्त वाष्टौ नवैव वा ।
विधेया वस्तयस्तेषामन्तरा तु निरूहणम् ॥
दत्तस्तु प्रथमो वस्तिः स्नेहयेद्वस्तिवङ्क्षणौ ।
सम्यग्दत्तो द्वितीयस्तु मूर्द्धस्थमनिलं जयेत् ॥

प्रणिहितोऽपि स्नेहः स्तोकं स्तोकं निर्गच्छन्नातुरमसुखेनापयोजयतीति यथाकालमविलम्बितं सर्व्वशो निःसारयितुमिदमुच्यते स इति । अन्वोः समीपे इत्यव्ययं, तत्स्थादिति तात्पर्य्यम् । आव्रजेत् प्रत्यागच्छेत् । अतिष्ठति स्नेहे न तिष्ठति न च क्षयतीत्यर्थः । वे इत्यादि । मनीषिणमात्रोऽनुवासः ।

जनयेद्दलवर्णौ च तृतीयस्तु प्रयोजित: ।
रसं चतुर्थो रक्तन्तु पञ्चम: स्नेहयेत् तथा ॥
षष्ठस्तु स्नेहयेन्मांसं मेद: सप्तम एव च ।
अष्टमो नवमश्चास्थि मज्जानञ्च यथाक्रमम् ।
एवं शुक्रगतान् दोषान् द्विगुण: साधु साधयेत् ॥ २४ ॥
अष्टादशाष्टादशकान् वस्तीनां यो निषेवते ।
यथोक्तेन विधानेन परिहारक्रमेण तु ॥
स कुञ्जरबलोऽश्वस्य जवेस्तुल्योऽमरप्रभ: ।
वीतपाप्मा श्रुतिधर: सहस्रायुर्नरो भवेत् ॥ २५ ॥
स्नेहवस्तिं निरूहं वा नैकमेवातिशीलयेत् ।
स्नेहादग्निवधोत्क्लेशौ निरूहात् पवनाद्भयम् ॥
तस्मान्निरूढोऽनुवास्यो निरूह्यश्चानुवासित: ।
नैव पित्तकफोत्क्लेशौ स्यातां न पवनाद्भयम् ॥
रूक्षाय बहुवाताय स्नेहवस्तिं दिने दिने ।
दद्याद्वैद्यस्ततोऽन्येषामग्न्यावाधभयात् त्र्यहात् ॥
स्नेहोऽल्पमात्रो रूक्षाणां सर्व्वकालमनत्यय: ।
तथा निरूह: स्निग्धानां स्वल्पमात्र: प्रशस्यते ॥ २६ ॥

द्विगुणोऽष्ट दश, साधयेत् जेतयेत् । अविहिताष्टादश स्नेहवस्तय: "अन्तरा तु निरूहणम्" इत्यनुग्राससमाविरुद्धै: समं वस्तित्वसाधर्म्यात् षट्त्रिंशतं संख्यां नाभीकुर्व्वन्ति तदिदं सूच्यते अष्टादशेत्यादि । अष्टादशाष्टादशकान् षट्त्रिंशतमित्यर्थ: ॥ १९—२६ ॥

अत ऊर्द्धं प्रवक्ष्यामि व्यापदः स्नेहवस्तिजाः ।
बलवन्तो यदा दोषाः कोष्ठे स्युरनिलादयः ॥
अल्पवीर्य्यं तदा स्नेहमभिभूय पृथग्विधान् ।
कुर्व्वन्त्युपद्रवान् स्नेहः स चापि न निवर्त्तते ॥ २७ ॥
तत्र वाताभिभूते तु स्नेहे मुखकषायता ।
जृम्भा वातरुजस्तास्ता वेपथुर्विषमज्वरः ॥
पित्ताभिभूते स्नेहे तु मुखस्य कटुता भवेत् ।
दाहस्तृष्णा ज्वरः खेदो नेत्रमूत्राङ्गपीतता ॥ २८ ॥
श्लेष्माभिभूते स्नेहे तु प्रसेको मधुरास्यता ।
गौरवं छर्द्दिरुच्छ्वासः कण्डूः शीतज्वरोऽरुचिः ॥ २९ ॥
तत्र दोषाभिभूते तु स्नेहे वस्तिं निधापयेत् ।
यथास्वं दोषशमनान्युपयोज्यानि यानि च ॥ ३० ॥
अत्याशितेऽन्नाभिभवात् स्नेहो नैति यदा तदा ।
गुरुरामाशयः शूलं वायोश्चाप्रतिसञ्चरः ॥
हृत्पीडा मुखवैरस्यं श्वासो मूर्च्छा भ्रमोऽरुचिः ।
तत्रापतर्पणश्चान्ते दीपनो विधिरिष्यते ॥ ३१ ॥
अशुद्धस्य मलोन्मिश्रः स्नेहो नैति यदा पुनः ।
तदाङ्गसदनाध्मानं श्वासः शूलश्च जायते ॥

अत इत्यादि । शीघ्रं दोषाभिभूतं स्नेहं प्रति प्रतिविकीर्षन्ति तत्रेति । यथास्वं यथादोषप्रशमनीयं वस्तिं स्नेहवस्तिं निरूहवस्तिं चेत्यर्थः । दोषशम-

पक्वाशयगुरुत्वञ्च तत्र दद्याद्विरेचनम् ।
अतितीक्ष्णौषधैरेवं सिद्धञ्चाप्यनुवासनम् ॥ ३२ ॥
गुदस्य दूरानुसृते स्नेहे स्नेहस्य दर्शनम् ।
गात्रेषु सर्व्वेन्द्रियाणामुपलेपोऽवसादनम् ॥
स्नेहगन्धि मुखं तत्र कासश्वासावरोचकम् ।
अतिपीडितवत् तत्र विधिरास्थापनं तथा ॥
अस्निग्धस्याविशुद्धस्य स्नेहोऽल्पः सम्प्रयोजितः ।
शीतो मृदुश्च नाभ्येति ततो मन्दं प्रवाहयेत् ॥
विबन्धगौरवाध्मान-शूलाः पक्वाशयं प्रति ।
तत्रास्थापनमेवाशु प्रयोज्यं सानुवासनम् ॥
अल्पं भुक्तवतोऽल्पो हि स्नेहो मन्दगुणस्तथा ।
दत्तो नैति क्रमोत्क्लेशी भृशं वाऽरतिमावहेत् ॥
तत्रैवास्थापनं कार्य्यं शोधनीयेन वस्तिना ।
अन्वासनञ्च स्नेहेन शोधनीयेन शस्यते ॥ ३३ ॥

नात्यर्थपानञ्चोभौतिज्ञेयम् । गुदस्येति दूरानुसृते अतिपीडितवदामाशयं प्रविष्टे मुखं "ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च । गलो गलादि सकलं सप्ताङ्गं मुखमुच्यते" इत्युक्तं वदनम् । स्नेहगन्धीति, वेगेन स्नेहस्य तदनुगमादित्यध्यवसेयम् । स्नेहस्येव गन्धोऽस्येति स्नेहगन्धि तथाच गन्धमात्रेण स्नेहस्यागमनमभ्यन्तरस्य स्वरूपतस्तदागमनमप्रतिरोधार्थं तूर्णं "चि० ३६ अ०" उपदिष्टं गलापपीडनाद्यात्मकमतिपीडितचिकित्सितं व्याख्या-

अहोरात्रादपि स्नेहः प्रत्यागच्छन्न दुष्यति।
कुर्य्याद्वस्तिगुणांश्चापि जीर्णस्त्वल्पगुणो भवेत् ॥
यस्य नोपद्रवं कुर्य्यात् स्नेहवस्तिरनिःसृतः।
सर्व्वोऽल्पो वा हतो रौक्ष्यादुपेक्ष्यः स विजानता ॥ ३४ ॥
अनायान्तमहोरात्रात् स्नेहं संशोधनैर्जयेत्।
स्नेहवस्तावनायाते नान्यः स्नेहो विधीयते ॥
इत्युक्ता व्यापदः सर्व्वाः सलक्षणचिकित्सिताः ॥ ३५ ॥
वस्तेरुत्तरसंज्ञस्य विधिं वक्ष्याम्यतः परम्।
चतुर्द्दशाङ्गुलं नेत्रमातुराङ्गुलसम्मितम् ॥
मालतीपुष्पवृन्ताग्रं छिद्रं सर्षपनिर्गमम्।
मेढ्रायामसमं केचिदिच्छन्ति खलु तद्विदः ॥
स्नेहप्रमाणं परमं कुञ्चश्चात्र प्रकीर्त्तितः।
पञ्चविंशाद्धो मात्रां विदध्याद् बुद्धि-कल्पिताम् ॥
निविष्टकर्णिकं मध्ये नारीणां चतुरङ्गुले।
मूत्रस्रोतःपरीणाहं मुद्गवाहि दशाङ्गुलम् ॥ ३६ ॥

मित्यभिसम्बन्धाय युक्तमुक्तमतिपीड़ितवदित्यनुसन्धेयम्। प्रवाहयेत् प्रवाहि-कार्त्त इव वेगेन पुनःपुनः प्रवर्त्तयेदित्यर्थः। अनायान्तमित्यादि। सोपद्रवविषयमेवैतदित्यवधेयम्। निरुपद्रवस्योपेक्षणोपदेशात् ॥ २७—३५ ॥

अवसितस्तावदनुवासनार्थं व्यापच्चिकित्सितोऽर्थसमासः, इदानीन्तु प्रक्रमागतमुत्तरवस्तिचिकित्सितमेवोपदेष्टुमाह वस्तेरिति। चतुर्द्दशेति मेढ्र-मिदं पुमांसमेव निमित्तमस्तीति बूमः स्त्रीः प्रत्यनन्तरोक्तेः। निविष्टेति। अथ

तासामपत्यमार्गे तु निदध्याच्चतुरङ्गुलम् ।
द्व्यङ्गुलं मूत्रमार्गे तु कन्यानामेकमङ्गुलम् ॥
विधेयस्त्र्यङ्गुलं तासां विधिवद्वक्ष्यते यथा ।
क्षेपश्च प्रसृतस्त्वाथ स्यादङ्गुलीमूलसंमितम् ।
देयं प्रमाणं परममर्वाग्बुद्धिविकल्पितम् ॥ ३७ ॥
औरभ्रःशौकरो वापि वस्तिराजश्च पूजितः ।
तदलाभे प्रयुञ्जीत गलचर्म तु पक्षिणाम् ॥
तस्यालाभे दृतेः पादो मृदुचर्म ततोऽपि वा ॥ ३८ ॥
अथातुरमुपस्निग्धं सुस्विन्नं प्रथिताशयम् ।
यवागूं सघृतक्षीरां पीतवन्तं यथाबलम् ।
निषण्णमाजानुसमे पीठे स्नानाश्रये समे ॥

इति चतुर्दशाङ्गुलं नेत्रमेवाभिप्रेत्योपदिश्यत इति गम्यते "निदध्याद्द्व्यङ्गुलानि षट्" इत्यन्तरोक्तेः तथाच समाङ्गुल इत्यर्थः । चतुरङ्गुले चतुरङ्गुलावकाशे इति नेयम् । वस्तुतस्तु हि "निदध्याच्चतुरङ्गुलम्" इति मूत्रस्रोतःपरीणाहमिति तु स्त्रीपुंसोभयविषयम् । कन्यानामदृष्टार्त्तवानां बालानां । वक्ष्यते यथेति "अर्द्धरात्रे स्थिते"त्यादिनाऽनन्तरोक्तेनेति हृदयम् । प्रसृतमर्द्धाञ्जलिः । स्यादङ्गुलीमूलसम्मितमातुराङ्गुलीमूलपर्यन्तसंश्रयमित्यर्थः । प्रमाणमिदं मध्यो-त्तरवयसो स्त्रीपुंसावधिकरोतीति गम्यते परममिति विशेषणात् । परमं प्रमाणं यदि प्रमाणमेवोपलभ्यते तदापीपयवमवसन्नमिति । वस्तिप्रवर-कालमवेक्ष्यातुरेषु बुद्धिविकल्पितं बुद्ध्याविकल्प्य दत्तोऽल्पं प्रकल्प्य प्रमाणं देय-मिति निष्कर्षः । पक्षिणां बकादीनाम् ॥ ३६—३८ ॥

स्वभ्यक्तबस्तिमूर्द्धानं तैलेनोष्णेन मानवम् ।
ततः समं स्थापयित्वा नालमस्य प्रहर्षितम् ॥
पूर्व्वं शलाकयान्विष्य ततो नेत्रमनन्तरम् ।
शनैः शनैर्घृताभ्यक्तं विदध्यादङ्गुलानि षट् ॥
ततोऽवपीड़येद्बस्तिं शनैर्नैव च निर्हरेत् ।
ततः प्रत्यागतस्नेहमपराह्णे विचक्षणः ॥
भोजयेत् पयसा मात्रां यूषेणाथ रसेन वा ।
अनेन विधिना दद्याद्बस्तींस्त्रींश्चतुरोऽपि वा ॥ ३९ ॥
ऊर्द्ध्वजान्वै स्त्रियै दद्यादुत्तानायै विचक्षणः ।
कन्येतरस्यै कन्यायै दद्यात् सुमृदु पीड़ितम् ॥ ४० ॥
त्रिकर्णिकेन नेत्रेण दद्याद्योनिमुखं प्रति ।
गर्भाशयविशुद्ध्यर्थं स्नेहेन द्विगुणेन तु ॥ ४१ ॥
अप्रत्यागच्छति भिषग् बस्तावुत्तरसंज्ञिते ।
भूयो बस्तिं विदध्यात्तु संयुक्तं शोधनैर्गणैः ॥
गुदे वर्त्तिं निदध्याद्वा शोधनद्रव्यसम्भृताम् ॥ ४२ ॥

अथेत्यादि । मलमूत्रविरहितत्वेन शुद्धतया विख्याताशयौ यस्येति प्रथिताशयः । वामावर्ते पार्श्वयोः पृष्ठे च अविचिष्टशिरस्कगुरुपवाद्यवदने, समे समतले । शोणितेन हि सह पच्यते स्रोतांसीति साम्प्रतमुक्तस्पष्टमिति । उत्तानेन पञ्चमेनैकार्थः । स्त्रीः प्रति विधिमाह ऊर्द्धेति कन्येतरस्यै इत्यादिनार्थे स्त्रियै कन्यायै चेति व्याख्येयः । अत्र त्रिकर्णिकेनेति प्रसूतवैतया नेत्रमित्यर्थः

प्रवेशयेद्वा मतिमान् वस्तिद्वारमथैषणीम् ।
पीडयेद्वाप्यधो नाभेर्वलिनोत्तरमुष्टिना ॥
आरग्वधस्य पत्रेषु निर्गुण्ड्याः स्वरसेषु च ।
कुर्य्याद्गोमूत्रपिष्टेषु वर्त्तीर्वापि ससैन्धवाः ॥
मुद्गैलासर्षपसमाः प्रविभज्य वयांसि तु ।
वस्तेरागमनार्थाय ता निदध्याच्छलाकया ॥ ४३ ॥
आगारधूम-बृहती-पिप्पली-फल-सैन्धवैः ।
कृता वा शुक्त-गोमूत्र-सुरापिष्टैः समागधैः ॥
अनुवासनसिद्धिञ्च वीक्ष्य कर्म्म प्रयोजयेत् ।
शर्करामधुमिश्रेण शीतेन मधुकाम्बुना ॥
दह्यमाने तदा वस्तौ दद्याद्वस्तिं विचक्षणः ।
क्षीरवृक्षकषायेण पयसा शीतलेन च ॥ ४४ ॥

शुक्रं दुष्टं शोणितञ्चाङ्गनानां पुष्पोद्रेकं तस्य नाशञ्च कष्टम् ।
मूत्राघातान्मूत्रदोषान् प्रवृद्धान् योनिव्याधिं संस्थितिञ्चापरायाः ॥
शुक्रोत्सेकं शर्करामश्मरीञ्च शूलं वस्तौ वङ्क्षणे मेहने च ।
घोरानन्यान् वस्तिजांश्चापि रोगान् ।
हित्वा मेहानुत्तरो हन्ति वस्तिः ॥ ४५ ॥
सम्यग्दत्तस्य लिङ्गानि व्यापदः क्रम एव च ।

प्राप्नोति वेति ब्रूमः । नेत्रसामान्यं प्रति वस्तिपञ्चनार्थं द्वयोरतिप्रवेश प्रति-षेधार्थं चैकस्याः कर्णिकाया उपदेशात् ॥ ३८—४४ ॥

यस्तेषामुत्तरसंज्ञश्च समानं स्नेहवस्तिना ॥ ४६ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
ऽनुवासनोत्तरवस्तिचिकित्सितं नाम
सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

शुक्रमिति। अपरायाः अमरायाः। परिशिष्टं मतिरोहितार्थम् ॥४५—४६॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
चिकित्सितस्थानेऽनुवासनोत्तरवस्तिचिकित्सितं नाम सप्तत्रिंशोऽध्यायः।

अष्टात्रिंशोऽध्यायः।

अथातो निरूहक्रमचिकित्सितं व्याख्यास्यामः ॥ १ ॥

अथानुवासितमास्थापयेत्। स्वभ्यक्तस्विन्नशरीरमुत्सृष्ट-
वहिर्वेगमप्रवाते शुचौ वेश्मनि मध्याह्ने प्रततायां शय्याया-
मधःसुपरिग्रहायां श्रोणिप्रदेशव्यूढाया मनुपधानायां वामपार्श्व-

---

पूर्वं हि "निरूहश्चानुवासितः" इत्युपदिश्य तदिदानीं निरूहक्रम-
चिकित्सितमधिकरोति अथात इत्यादिना। अत्र निरूहोपक्रमचिकित्सित-
मित्यपरः पाठः "सु० १ अ०" उपक्रमे निरूहक्रमसंज्ञयेत्युक्तेः। अत्र
[illegible] यदि कर्हिचिदपि [illegible]।

शायिनमाकुञ्चित-दक्षिणसक्थिमितरप्रसारितसक्थिं सुमनसं जीर्णान्नं वाग्यतं सुनिषण्णदेहं विदित्वा ततो वामपादस्योपरि नेत्रं कृत्वेतरपादाङ्गुष्ठाङ्गुलिभ्यां कर्णिकामुपरि निष्पीड्य सव्यपाणिकनिष्ठिकानामिकाभ्यां बस्तेर्मुखार्धं सङ्कोच्य मध्यमाप्रदेशिन्यङ्गुष्ठैरर्धमन्तु विततास्यं कृत्वा बस्तावौषधं प्रक्षिप्य दक्षिणहस्ताङ्गुष्ठप्रदेशिनीभ्यामानुषिक्तमनायतमबुद्बुदमसङ्कुचितमवातमौषधासन्नमुपसंगृह्य पुनरितरेण गृहीत्वा दक्षिणेनावसिञ्चेत्, ततः सूत्रेणैवौषधान्ते द्विस्त्रिर्वाविष्टं बध्नीयात् । अथ दक्षिणेनोत्तानेन पाणिना बस्तिं गृहीत्वा वामहस्तमध्यमाङ्गुलिप्रदेशिनीभ्यां नेत्रमुपसंगृह्याङ्गुष्ठेन नेत्रद्वारं पिधाय घृताभ्यक्ताग्रनेत्रं घृताक्तगुदाय प्रयच्छेदनुपृष्ठवंशं सममुन्मुखमाकर्णिकं नेत्रं प्रणिधत्स्वेति ब्रूयात् ॥ २ ॥

त्तरमुत्थापयामः । सुपरिपक्वायाम् विद्यमानानुरागिकजरणायाम् । श्रोणिभिन्नातथ्यः प्रदेशः श्रोणिप्रदेशः, शाकपार्थिवादिषु द्रष्टव्यः । सचोवनतया सन्निवेशविशेषेण शिलोऽस्येति श्रोणिप्रदेशव्यूढायाम् । "व्यूढाङ्गुपदपुत्रेव" इति गीताच । वामपार्श्वशायिनमित्यामयद्वारस्य वामपार्श्वाश्रयित्वात् साम्मतमेव । वामपादस्येति । नन्वप्रयोजनमसन्दिग्धञ्च किञ्चन प्रेक्षावत् प्रतिपित्सा गोचरं भवति । पश्य ! नहि कश्चित् करटदन्तानमुसन्धत्ते नाऽपिच समनस्केन्द्रियसन्निकृष्टां स्थूलालोकमध्यवर्त्तिनीं रज्जुमभिसमीक्ष्य रज्जुर्वाहिर्वेति सन्दिग्धे, तथापीदं वाक्यप्रबन्धेन विनष्ट' परिहृतव्यवहारं व्यापद्रूपमाङ्गुर्वेदिकं बस्तिनेत्रम् शाश्वतिकं पाश्चात्त्यैर्भिषग्भिः राविष्कृतं निरावाध-

वस्तिं सव्ये करे कृत्वा दक्षिणेनावपीड़येत् ।
एकेनैवावपीड़ेन न द्रुतं न विलम्बितम् ॥ ३ ॥

ततो नेत्रमपनीय त्रिंशन्मात्राः पीड़नकालादुपेक्ष्योत्तिष्ठेत्यातुरं ब्रूयात् । आतुरमुपवेशयेदुत्कटुकं वस्त्यागमनार्थम् । निरूहप्रत्यागमनकालस्तु मुहूर्त्तो भवति ॥ ४ ॥

अनेन विधिना वस्तिं दद्याद्वस्तिविशारदः ।
द्वितीयं वा तृतीयं वा चतुर्थं वा यथार्थतः ॥
सम्यङ्निरूढ़लिङ्गे तु प्राप्ते वस्तिं निवारयेत् ।
अपि हीनक्रमं कुर्य्यान्न तु कुर्य्यादतिक्रमम् ॥
विशेषात् सुकुमाराणां हीन एव क्रमो हितः ॥ ५ ॥
यस्य स्याद्वस्तिरत्यल्पवेगो हीनमलानिलः ।
दुर्निरूढ़ः स विज्ञेयो मूत्रार्त्त्यरुचिजाड्यवान् ॥
यान्येव प्राक् प्रयुक्तानि लिङ्गान्यतिविरेचिते ।
तान्येवातिनिरूढ़ेऽपि विज्ञेयानि विपश्चिता ॥
यस्य क्रमेण गच्छन्ति विट्पित्तकफवायवः ।
लाघवञ्चोपजायेत सुनिरूढ़ं तमादिशेत् ॥
सुनिरूढ़ं ततो जन्तुं स्नातवन्तन्तु भोजयेत् ।
पित्तश्लेष्मानिलाविष्टं क्षीरयूषरसैः क्रमात् ॥
सर्व्वं वा जाङ्गलरसैर्भोजयेदविकारिभिः ।

नेत्रातिप्रणीयतया निरूहोपयोगं सर्व्वजनीनं वस्तिमेव नाम [illegible]
चितादर्थात् [illegible] प्रत्यागमनकालमतीतीति [illegible] ॥ १ ॥

विभागहीनमर्द्धं वा हीनमात्रमथापि वा ॥
यथाग्निदोषं मात्रैवं भोजनस्य विधीयते ।
अनन्तरं ततो युञ्ज्याद्यथास्वं स्नेहबस्तिना ॥
विविक्तता मनस्तुष्टिः स्निग्धता व्याधिनिग्रहः ।
आस्थापनस्नेहबस्त्योः सम्यग्दाने तु लक्षणम् ॥
तदहस्तस्य पवनाद्भयं बलवदिष्यते ।
रसौदनस्तेन शस्तस्तदहश्चानुवासनम् ॥
पश्चादग्निबलं मत्वा पवनस्य च चेष्टितम् ।
अन्नोपस्तम्भिते कोष्ठे स्नेहबस्तिर्विधीयते ॥
अनायान्तं मुहूर्त्तात् तु निरूहं शोधनैर्हरेत् ।
तीक्ष्णैर्निरूहैर्मतिमान् क्षारमूत्राम्लसंयुतैः ॥
विगुणानिलविष्टब्धं चिरं तिष्ठन्निरूहणम् ।
शूलारतिज्वरानाहं मरणं वा प्रवर्त्तयेत् ॥ ६ ॥
न तु भुक्तवते देयमास्थापनमिति स्थितिः ।
विसूचिकां वा जनयेच्छर्द्दिं वापि सुदारुणाम् ।
कोपयेत् सर्व्वदोषान् वा तस्माद् दद्यादभोजिते ॥
जीर्णान्नस्याशये दोषाः पुंसः प्रव्यक्तिमागताः ।
निःशेषाः सुखमायान्ति भोजनेनाप्रपीड़िताः ॥
न चास्थापनविक्षिप्तमन्नमग्निः प्रधावति ।
तस्मादास्थापनं देयं निराहाराय जानता ॥

विविक्तता पवित्रता व्याधिरहिततेति यावत् ॥ १—६ ॥

पादशिकं क्रमञ्चापि मत्वा कार्य्यं निरूहणम् ॥ ७ ॥

मतेऽपकृष्टे दोषाणां बलवत्त्वं न विद्यते ॥ ८ ॥

क्षीराम्लाम्लानि मूत्राणि स्नेहाः क्वाथा रसास्तथा ।
लवणानि फलं क्षौद्रं शताह्वा सर्षपं वचा ॥
एला त्रिकटुकं रास्ना सरलं देवदारु च ।
रजनी मधुकं हिङ्गु कुष्ठं संशोधनानि च ॥
कटुका शर्करा मुस्तमुशीरं चन्दनं शटी ।
मञ्जिष्ठा मदनं चण्डा त्रायमाणा रसाञ्जनम् ॥
बिल्वमध्यं यमानी च फलिनी शक्रजा यवाः ।
काकोली क्षीरकाकोली जीवकर्षभकावुभौ ॥
तथा मेदा महामेदा ऋद्धिर्वृद्धिर्मधूलिका ।
निरूहेषु यथालाभमेष वर्गो विधीयते ॥ ९ ॥

स्वस्थे क्वाथस्य चत्वारो भागाः स्नेहस्य पञ्चमः ।
क्रुद्धेऽनिले चतुर्थस्तु षष्ठः पित्ते कफेऽष्टमः ॥
सर्व्वेषु चाष्टमो भागः कल्कानां, लवणं पुनः ।
क्षौद्रं मूत्रं फलं क्षीरमम्लं मांसरस स्तथा ।
युक्त्या प्रकल्पयेद्धीमान् निरूहे कल्पना त्वियम् ॥ १० ॥

मत्विति । प्रधावति जरयतीत्यर्थः । पादशिकं क्रमम् अनन्तरं वक्ष्ये क्वाथ-स्नेहादिना बलमात्रं विधिम्, चकाराद् विधिसामान्यञ्च । क्षीरादीत्यादि । वचा मधुरः, फलिनी प्रियङ्गुः, मधुलिका मूर्व्वा । कल्क इति । कल्कानां

कल्कस्नेहकषायाणामविवेकाद्विपश्चितैः।
बस्तिस्तु कल्पितः सम्यक् तस्यादानं यथार्थकृत्॥
दत्त्वादौ सैन्धवस्याक्षं मधुनः प्रसृतद्वयम्।
पात्रे तत्तेन मथ्नीयादनुस्नेहं शनैः शनैः॥
सम्यक् सुमथिते दद्यात् फलकल्कमतः परम्।
ततो यथोचितान् कल्कान् भागैः स्वैः श्लक्ष्णपेषितान्॥
गम्भीरे भाजनेऽन्यस्मिन् मथ्नीयात् तं खजेन च।
कषायप्रसृतान् पञ्च सुपूतांस्तत्र दापयेत्॥
रसक्षीराम्लमूत्राणां दोषावस्थामवेक्ष्य तु।
यथा च साधु मन्येत न सान्द्रो न तनुः समः॥ ११॥
अत ऊर्द्ध्वं द्वादश प्रसृतान् वक्ष्यामः।
दत्त्वादौ सैन्धवस्याक्षं मधुनः प्रसृतिद्वयम्।
विनिर्मथ्य ततो दद्यात् स्नेहस्य प्रसृतित्रयम्॥

पञ्चमाषाणामष्टमो भाग इत्यन्वयः। यथावस्थितैरपि कल्कादिभिः कल्पितो बस्तिः सम्यक् कार्यकरो भवतीत्याह कल्केति। अविवेकादपृथग्भावात् "विवेकः पृथगात्मता" इत्यमरः। यो बस्तिः कल्पितस्तस्यादानमुपयोग इति हृदयम्। मिश्रणक्रममुपदिदिक्षति दत्त्वेति। फलकल्कं वक्ष्यमाणविधिना मदनफलकल्कम्। भागैरनन्तरं वक्ष्यमाणैः प्रमाणैः। तं प्रकृतत्वाद्बस्तिम्। यथा चेति च शब्दोऽयं वाशब्दस्यार्थमभिदधत् पक्षान्तरमाशंसति। समोऽतएव मध्यम इत्याकूतम्॥ ८—११॥

ननु चेदमामनन्ति "द्वादश प्रसृतो बस्तिर्बस्तिकर्मविचक्षते" इत्यतो जिज्ञासामहे किमुत द्वादश प्रसृतानुपादिशन्नायुर्वेदविद इत्याह अत

एकीभूते ततः स्नेहे कल्कस्य प्रसृतिं क्षिपेत् ।
संमूर्च्छिते कषायन्तु चतुःप्रसृतिसम्मितम् ॥
वितरेच्च तदावापमन्ते द्विप्रसृतोन्मितम् ।
एवं प्रकल्पितो बस्तिर्द्वादशप्रसृतो भवेत् ॥
ज्येष्ठायाः खलु मात्रायाः प्रमाणमिदमीरितम् ।
अपक्कासे भिषक् कुर्य्यात् तद्वत् प्रसृतिकल्पनम् ॥
यथावयो निरूहाणां कल्पनेयमुदाहृता ।
सैन्धवादिद्रवान्तानां सिद्धिकामैर्भिषग्वरैः ॥ १२ ॥
अत ऊर्द्ध्वं प्रवक्ष्यन्ते बस्तयोऽत्र विभागशः ।
यथादोषं प्रयुक्ता ये हन्युर्नानाविधान् गदान् ॥
सम्पाकोरुबूवर्षाभू-वाजिगन्धानिशाच्छदैः ।
पञ्चमूलीबलारास्ना-गुडूचीसुरदारुभिः ॥
क्वथितैः पालिकैरेभिर्मदनाष्टकसंयुतैः ।
कल्कैर्मागधिकाम्भोद-हवुषामिसिसैन्धवैः ॥
वत्साह्वयप्रियङ्ग्वा-यष्ट्याह्वयरसाञ्जनैः ।
दद्यादास्थापनं कोष्णं क्षौद्राद्यैरभिसंस्कृतम् ॥
पृष्ठोरुत्रिकशूलाश्म-विण्मूत्रानिलसङ्गिनाम् ।
यक्ष्मीमारुतार्शोघ्नं रक्तमांसबलप्रदम् ॥ १३ ॥

इति । अत्र द्वादश प्रसृतेति संख्येयं यथाम्नवत् पारिभाषिकीति नैवं तथाच संख्यादिभिः .अत्र द्वादशप्रसृतातिक्रमेऽपि नाभ्युपगतप्रमाणत्वादापत्तिः । प्रसृतः प्रसृतिः पञ्चकर्म्मेति पर्यायाः । अन्यमुनीनां मतमवधार्य युक्तिमता-

गुडूचीत्रिफलारास्ना-दशमूलबलापलैः ।
क्वथितैः श्वपिष्टैस्तु प्रियङ्गुघनसैन्धवैः ॥
शतपुष्पावचाकृष्णा-यमानीकुष्ठबिल्वजैः ।
सगुडैरक्षमात्रैस्तु मदनाष्टफलान्वितैः ॥
क्षौद्रतैलघृतक्षीर-शुक्तकाञ्जिकमस्तुभिः ।
समालोड्य च मूत्रैस्तु दद्यादास्थापनं परम् ॥
तेजोवर्णबलोत्साह-वीर्य्याग्निप्राणवर्द्धनम् ।
सर्व्वमारुतरोगघ्नं वयःस्थापनमुत्तमम् ॥ १४ ॥
कुशादिपञ्चमूलाब्द-त्रिफलोत्पलवासकैः ।
सारिवोशीरमञ्जिष्ठा-रास्नारेणुपरूषकैः ॥
पालिकैः क्वथितैः सम्यग्द्रव्यैरेभिश्च पेषितैः ।
शृङ्गाटकात्मगुप्तेभ-केशरागुरुचन्दनैः ॥
विदारीमिसिमञ्जिष्ठा-श्यामेन्द्रयवसिन्धुजैः ।
फलपद्मकयष्ट्याह्वैः क्षौद्रक्षीरघृताप्लुतैः ॥
दत्तमास्थापनं शीतमम्लहीनैस्तथा द्रवैः ।
दाहासृग्दरपित्तासृक्-पित्तगुल्मज्वरान् जयेत् ॥ १५ ॥

ज्ञानुमत्यानाय यथास्थूलं वस्तिवेदं निवेदयितुं प्रतिजानीते चत इति । चत्वावयवमित्यष्टकम् अष्टसंख्येत्यर्थः । मदनाष्टकं मदनस्याष्टौ फलानीत्यर्थः । कटुकानाम तिक्तमधुरविशिष्टद्रव्यभेदः 'पाठष' इत्याख्यायते । मिसिर्मधुरिका शतावरीति केचित्, उषा वचा । १२—१४ ॥

कुशेत्यादि । पद्मकः 'पद्मका' इत्यभिधीयते । एभिरेवास्थापनैर्द्रवैः ।

रोध्रचन्दनमञ्जिष्ठा-रास्नानन्तावलर्द्धिभिः।
सारिवावृषकाश्मर्य्य-मेदामधुकपद्मकैः॥
स्थिरादिद्वयमूलैश्च क्वाथैः कर्षत्रयोन्मितैः।
पिष्टैर्जीवककाकोली-युगर्द्धिमधुकोत्पलैः॥
प्रपौण्डरीकजीवन्ती मेदारिष्टुपकुषकैः।
अभीरुमिसिसिम्बूत्थ-वत्सकोशीरपद्मकैः॥
कशेरुशर्करायुक्तैः सर्पिर्मधुपयःप्लुतैः।
द्रवैस्तैः क्षाम्लवर्ज्जैश्च दत्तो वस्तिः सुशीतलः॥
गुल्मासृग्दरहृत्पाण्डुरोगान् सविषमज्वरान्।
असृक्पित्तातिसारौ च हन्यात् पित्तकृतान् गदान्॥१६॥
भद्रानिम्बकुलत्थार्क-कोशातक्यमृतामरैः।
सारिवाबृहतीपाठा-मूर्व्वारग्वधवत्सकैः॥
क्वाथः कल्कस्तु कर्त्तव्यो वचामदनसर्षपैः।
सैन्धवामरकुष्ठैला-पिप्पलीविल्वनागरैः॥
कटुतैलमधुक्षार-मूत्रतैलाम्बुसंयुतैः।
कार्य्यमास्थापनं तूर्णं कामलापाण्डुमेहिनाम्॥
मेदस्विनामनग्नीनां कफरोगाश्मनद्विषाम्।
गलगण्डगरग्लानि-श्लीपदोदररोगिणाम्॥ १७॥

स्थिरादीति। स्थिरादि कनीयः पञ्चमूलम् बृहन्मूलं पञ्चकपञ्चमूलम्। अभीरुः शतमूली, भद्रा भद्रमुस्तकम्, कोशातकी घोषकभेदः, अमरो देवदारु।

दशमूलीमिशाबिल्व-पटोलत्रिफलामरैः ।

क्वथितैः कल्कपिष्टैस्तु मुस्तसैन्धवदारुभिः ॥

पाठामागधिकेन्द्राह्वैस्तैलक्षारमधुप्लुतैः ।

कुर्य्यादास्थापनं सम्यङ् मूत्राम्लफलयोजितम् ॥

कफपाण्डुमदालस्य-मूत्रमारुतसङ्गिनाम् ।

आमाटोपापचीश्लेष्म-गुल्मकृमिविकारिणाम् ॥ १८ ॥

तृणाश्मभेदवर्षाभू-धान्यगन्धर्व्वहस्तकैः ।

दशमूलबलामूर्व्वा-यवकोलनिशाच्छदैः ॥

कुलत्थबिल्वभूनिम्बैः क्वथितैः पलसम्मितैः ।

कल्कैर्मदनयष्ट्याह्व षड्ग्रन्थामरसर्षपैः ॥

पिप्पलीमूलसिन्धुत्थ यमानीमिसिवत्सकैः ।

क्षौद्रेक्षुक्षीरगोमूत्र-सर्पिस्तैलरसाप्लुतैः ॥

तूर्णमास्थापनं कार्य्यं संसृष्टबहुरोगिणाम् ।

गृध्रसीशर्कराष्ठीला-तूणीगुल्मगदापहम् ॥ १९ ॥

रास्नारग्वधवर्षाभू-कटुकोशीरवारिदैः ।

त्रायमाणामृतारक्ता पञ्चमूलविभीतकैः ॥

सबलैः पालिकैः क्वाथः कल्कैस्तु मदनान्वितैः ।

यष्ट्याह्वमिसिसिन्धूत्थ फलिनीन्द्रयवाह्वयैः ॥

दशमूलीति इन्द्राह्वः इन्द्रयवः । इवेति । मिशा हरिद्रा. उदरलेपनम् ।
॥ १५—१८ ॥

रसाञ्जनरसक्षौद्र द्राक्षासौवीरसंयुतैः ।
युक्तो वस्तिः सुखोष्णोऽयं मांसशुक्रबलौजसाम् ॥
आयुषोऽग्नेश्च संस्कर्त्ता हन्ति चाशु गदानिमान् ।
गुल्मासृग्दरवीसर्प-मूत्रकृच्छ्रक्षतक्षयान् ॥
विषमज्वरमर्शांसि ग्रहणीं वातकुण्डलीम् ।
जानुजङ्घाशिरोवस्तिग्रहोदावर्त्तमारुतान् ॥
वाताष्ठीलाशर्कराष्ठीला कुक्षिशूलोदराश्मरीः ।
रक्तपित्तकफोन्माद-प्रमेहाध्मानहृद्ग्रहान् ॥ २० ॥
वातघ्नौषधनिःक्वाथाः सैन्धवत्रिवृतायुताः ।
साम्लाः सुखोष्णा योज्याः स्युर्वस्तयः कुपितेऽनिले ॥ २१ ॥
न्यग्रोधादिगणक्वाथाः काकोल्यादिसमायुताः ।
विधेया वस्तयः पित्ते ससर्पिष्काः सशर्कराः ॥ २२ ॥
आरग्वधादिनिःक्वाथाः पिप्पल्यादिसमायुताः ।
सक्षौद्रमूत्रा देयाः स्युर्वस्तयः कुपिते कफे ॥ २३ ॥
शर्करेक्षुरसक्षीरघृतयुक्ताः सुशीतलाः ।
क्षीरवृक्षकषायाढ्या वस्तयः शोणिते हिताः ॥ २४ ॥
शोधनद्रव्यनिःक्वाथास्तत्कल्कस्नेहसैन्धवैः ।

रात्रेति । रक्ता मञ्जिष्ठा, यवकैः यवया खचितैः, वातकुण्डली मूत्राघातविशेषः । वस्तिग्रहाष्ठीलाद्या मूत्राघाताः वातघ्नेति । वातघ्नौषधानि "सू० ३८ अ०" उक्तानि भद्रदार्व्वादीनि ॥ २०—२१ ॥

शोधनेति । शोधनद्रव्याणीह विशेषोपयोगित्वात् 'सू० ३८ अ०'

युक्ताः खजेन मथिता बस्तयः शोधनाः स्मृताः ॥ २५ ॥
त्रिफलाक्वाथगोमूत्र-क्षौद्रक्षारसमायुताः ।
ऊषकादिप्रतीवापा बस्तयो लेखनाः स्मृताः ॥ २६ ॥
बृंहणद्रव्यनिःक्वाथाः कल्कैर्मधुरकैर्युताः ।
सर्पिर्मांसरसोपेता बस्तयो बृंहणाः स्मृताः ॥ २७ ॥
चटकाण्डोच्चटाक्वाथाः सक्षीरघृतशर्कराः ।
आत्मगुप्ताफलावापाः कृता वाजीकरा नृणाम् ॥ २८ ॥
विदार्यैरावतीशेलु-शाल्मलीधन्वनाङ्कुराः ।
क्षीरसिद्धाः क्षौद्रयुताः स्रास्राः पिच्छिलसंज्ञिताः ॥ २९ ॥
वाराहमाहिषौरभ्र-वैडालैणेयकौक्कुटम् ।
सद्यस्कमसृगाजं वा देयं पिच्छिलबस्तिषु ॥ ३० ॥
प्रियङ्ग्वादिगणक्वाथा अम्बष्ठाद्येन संयुताः ।
सक्षौद्राः सघृताश्चैव ग्राहिणो बस्तयः स्मृताः ॥ ३१ ॥
एतेष्वेव च योगेषु स्नेहाः सिद्धाः पृथक् पृथक् ।
समस्तेष्वथ वा सम्यग्विधेयाः स्नेहबस्तयः ॥ ३२ ॥
बल्यानां शतपाकेन शोधितानां यथाक्रमम् ।

उक्तानि त्रिवृतादीन्येवेत्यवधेयम् । बृंहणेति । बृंहणद्रव्याणि काकोल्यादीनि, उच्चटा श्वेतगुञ्जा, ऐरावती वटपत्री व्यवहारस्तु पाषाणभेदकेच । शेलुर्बहुवारकः साम्प्रदायिकास्तु "लोनापाता" इत्याचक्षते । धन्वनः वाक-भेदः 'धामनि' इति भाषयति च परिचीयते । स्रास्रा इति रक्तत्वादन्यतरेण वराहाद्यन्यतमरक्तेन युक्ताः । वराहेति । [illegible] ॥ २५—३० ॥

वचातैलेन देयाः कुर्वसयवतैलेन च ॥ २३ ॥
नरस्योत्तमसत्त्वस्य तीक्ष्णं वस्तिं निधापयेत् ।
मध्यमं मध्यसत्त्वस्य विपरीतस्य वै मृदुम् ॥
एवं कालं बलं दोषं विकारञ्च विकारवित् ।
वस्तिद्रव्यबलञ्चैव वीक्ष्य वस्तीन् प्रयोजयेत् ॥ २४ ॥
दद्यादुत्क्लेशनं पूर्व्वं मध्ये दोषहरं पुनः ।
पश्चात् संशमनीयञ्च दद्याद्वस्तिं विचक्षणः ॥ २५ ॥
एरण्डबीजं मधुकं पिप्पली सैन्धवं वचा ।
हपुषाफलकल्कश्च वस्तिरुत्क्लेशनः स्मृतः ॥
शताह्वा मधुकं बीजं कौटजं फलमेव च ।
सकाञ्जिकः सगोमूत्रो वस्तिर्दोषहरः स्मृतः ॥
प्रियङ्गु मधुकं मुस्ता तथैव च रसाञ्जनम् ।
सक्षीरः शस्यते वस्तिर्दोषाणां शमनः परः ॥ २६ ॥
नृपाणां तत्समानानां तथा सुमहतामपि ।
नारीणां सुकुमाराणां शिशुस्थविरयोरपि ॥
दोषनिर्हरणार्थाय बलवर्णोदयाय च ।
समासेनोपदेक्ष्यामि विधानं माधुतैलिकम् ॥

वय्यानामिति । पैत्तिकेन मिश्रितेनैकचितयेन । नरस्येति । विपरीतस्य हीनसत्त्वस्य, शताह्वेति बीजमदनफलं एरण्डबीजमित्यपरे ॥२१—२६ ॥
नृपाणामिति । मधुना तैलेन सोमवेन वा संसृष्टं माधुतैलिकम् । मधु-

यानस्त्रीभोज्यपानेषु नियमश्चात्र नोच्यते ।
फलञ्च विपुलं दृष्टं व्यापदाञ्चाप्यसम्भवः ॥
योऽयस्त्वतः सुखेनैव निरूहक्रममिच्छता ।
यदिच्छति तदैवैष प्रयोक्तव्यो विपश्चिता ॥ ३७ ॥
माधुतैले समस्याता क्वाथश्चैरण्डमूलजः ।
पलार्द्धं शतपुष्पायास्ततोऽर्द्धं सैन्धवस्य च ॥
फलेनैकेन संयुक्तः खजेन च विलोडितः ।
देयः सुखोष्णो भिषजा मधुतैलिकसंज्ञितः ॥ ३८ ॥
वचामधुकतैलञ्च क्वाथः सरससैन्धवः ।
पिप्पलीफलसंयुक्तो वस्तिर्युक्तरथः स्मृतः ॥ ३९ ॥
सुरदारु वरा रास्ना शतपुष्पा वचा मधु ।
हिङ्गुसैन्धवसंयुक्तो वस्तिर्दोषहरः स्मृतः ॥ ४० ॥
पञ्चमूलीकषायश्च तैलं मागधिका मधु ।
वस्तिरेष विधातव्यः सशताह्वः ससैन्धवः ॥ ४१ ॥
यवकोलकुलत्थानां क्वाथो मागधिका मधु ।
ससैन्धवः समधुकः सिद्धवस्तिरिति स्मृतः ॥ ४२ ॥

तैले सर्पि एरण्डमूलक्वाथश्च समः, एतावता यथावस्थमातुरं प्रति विहिताना-मेषां त्रयाणां मधुप्रभृतीनेव पाठयन्ति कुशलाः पादहीनत्वेनैषां विरचित-त्वात् । फलेन मदनफलेन, एकेनेत्याकृत्या बहुत्वार्थम् । वचेति क्वाथोऽत्र पञ्च-मूलादेरेण्डमूलस्य एव । रक्तं मांसरसः । यवादीनामनुक्तानां यवकोलकुल-त्थेन, मूत्रादयस्तु निषिद्धा न प्रयुक्ता एव । सुरेति, एष वचादीनां क्वाथः

मुस्तापाठामृतातिक्ता बलारास्नापुनर्नवाः ।
मञ्जिष्ठारग्वधोशीर-त्रायमाणाक्षगोक्षुरान् ॥
पालिकान् पञ्चमूलाल्पसहितान् मदनाष्टकम् ।
जलाढके पचेत् क्वाथं पादशेषं पुनः पचेत् ॥
क्षीरप्रस्थेन संयुक्तं क्षीरशेषं परिस्रुतम् ।
पादेन जाङ्गलरसस्तथा मधु घृतं समम् ॥
शताह्वाफलिनीयष्टि-वत्सकैः सरसाञ्जनैः ।
कार्षिकैः सैन्धवयुतैः कल्कैर्वस्तिः प्रयोजितः ॥
वातासृङ्मेहशोफार्शो-गुल्ममूत्रविबन्धनुत् ।
विसर्पज्वरविड्भङ्ग-रक्तपित्तविनाशनः ॥
बल्यः सञ्जीवनो वृष्यश्चक्षुष्यः शूलनाशनः ।
यापनानामयं राजा वस्तिर्मुस्तादिको मतः ॥ ४३ ॥
परीक्ष्य भेषजं बुद्ध्या विकारञ्च विकारवित् ।
बीजेनानेन मतिमान् कुर्य्याद्वस्तिशतान्यपि ॥ ४४ ॥
अजीर्णे न प्रयुञ्जीत दिवास्वप्नञ्च वर्ज्जयेत् ।
आहाराचारिकं शेषमन्यद्युक्तं समाचरेत् ॥ ४५ ॥
यस्मान्मधु च तैलञ्च प्राधान्येन प्रदीयते ।
माधुतैलिकइत्येवं भिषग्भिर्वस्तिरुच्यते ॥

शेषं सुगमम् । मुस्तेति । पञ्चमूलाल्पसहितान् स्वल्पपञ्चमूलेन संयुक्तान् । यथा एक एव देवदत्तो गुणकर्मविशेषव्यपदेशाद्दान्तोदान्तः शान्तः शतात्त इत्येव-

रथेष्वपि च युक्तेषु हस्त्यश्वे चापि कल्प्यते ।
यस्माच्च प्रतिषिद्धोऽयमतो युक्तरथः स्मृतः ॥
बलोपचयवर्णानां यस्माद्व्याधितस्य च ।
भवत्यनेन सिद्धिस्तु सिद्धवस्तिरतो मतः ॥
सुखिनामल्पदोषाणां नित्यं स्निग्धाश्च ये नराः ।
मृदुकोष्ठाश्च ये तेषां विधेया माधुतैलिकाः ॥
मृदुत्वात् पादहीनत्वादकृत्स्नविधिसेवनात् ।
एकवस्तिप्रदानाच्च सिद्धवस्तिष्वयन्त्रणा ॥ ४६ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
निरूहक्रमचिकित्सितं नामाष्टा-
त्रिंशोऽध्यायः ॥ ३८ ॥

अनेकशब्द प्रत्ययभाग् भवति तथायं माधुतैलिकनामधेयोनाम वस्तिरुपीत्याह यस्मादिति। अत्र सज्जितापरपर्य्यायत्वेनोपन्यस्तं युक्तकल्पितेति विशेषणद्वितयं आरोहणकालेऽपि वस्तीनामेषामुपयोगोऽप्यदोषायेत्याख्यातुम्। स्तुतिरेषावस्त्यर्थोपहिमाञ्जनत्व माख्यापयतीत्यवस्थितव्यम्। परिशिष्टं विशदव्याख्यातम् ॥ ३७—४६ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्ति विरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
चिकित्सितस्थाने निरूहक्रमचिकित्सितं नामाष्टात्रिंशोऽध्यायः ॥

एकोनचत्वारिंशोऽध्यायः ।

अथात आतुरोपद्रवचिकित्सितं व्याख्यास्यामः ॥ १ ॥

स्नेहपीतस्य वान्तस्य विरिक्तस्य सुतास्रजः ।
निरूढस्य च कायाग्निर्मन्दो भवति देहिनः ॥
सोऽन्नैरत्यर्थगुरुभिरुपयुक्तैः प्रशाम्यति ।
अल्पो महद्भिर्बहुभिश्छादितोऽग्निरिवेन्धनैः ॥
स चाल्पैर्लघुभिश्चान्नैरुपयुक्तैर्विवर्द्धते ।
काष्ठैरणुभिरल्पैश्च सन्धुक्षित इवानलः ॥ २ ॥
हृतदोषप्रमाणेन सदाहारविधिः स्मृतः ।
त्रीणि चात्र प्रमाणानि प्रस्थोऽर्द्धाढकमाढकम् ॥

आयुर्व्वेदे शोणितावसेचनादीनि सुदुष्कराणि यानि निर्हरणान्युपदेष्टव्यानि तानि सर्व्वाण्येव साङ्गानि सम्यगुपदिष्टानि सम्प्रति तु तत्र तत्र मिथ्याहारविहारमूलानुपद्रवान् समूलघातमुपहन्तुं चिकित्सिष्याम इत्यभिसन्धायातुरोपद्रवचिकित्सितमधिकरोति अथात इत्यादिना । आतुराणां प्रकृतत्वाद्वमनादिना तत्सजातीयत्वाच्छोणितावचारणादिना निर्हृतदोषाणां स्नेहपानस्य वमनाद्यनुगुणत्वात् स्नेहपीतानाञ्चोपद्रवचिकित्सितमातुरोपद्रवचिकित्सितम् । चिकित्सितञ्चात्र "व्यापदां कारणं वीक्ष्य" इत्यादिना ग्रन्थे निवेदयिष्यते ॥१॥

प्रकृतमर्थमामूलमुपदिदिक्षति स्नेहेति । पूर्व्वं हि चि० ३१ अ० "स्नेहोचितो दुर्बलवह्निरेव सम्भुङ्क्ते" इत्यादिना स्नेहोपयोगस्योदर्कं फलमग्निसन्धुक्षणमित्यभिहितम्; इह तूपयोगात्पूर्वं वमनाद्यैर्यावदग्निर्मन्दो भवतीत्यभिहित-

तत्रावरं प्रथममाहुर्द्वे श्रेष्ठे मध्यमोत्तमे ॥ ३ ॥
प्रस्थे परिस्रुते देया यवागूः स्वल्पतण्डुला ।
द्वे चैवार्धाढके देये तिस्रश्चाप्याढके गते ॥ ४ ॥
विलेपीमुचिताद्भक्ताच्चतुर्भागकृतां ततः ।
दद्याद्युक्तेन विधिना स्निग्धसिक्थामपिच्छिलाम् ॥
अस्निग्धलवणां स्वल्पमुद्गयूषयुतां ततः ॥ ५ ॥
अंशद्वयप्रमाणेन दद्यात् सुस्निग्धमोदनम् ।
ततः सघृतमण्डेन हृद्येनेन्द्रियबोधिना ॥ ६ ॥
क्षीणं यान् वितरेद्धीमानातुरायौदनं मृदुम् ।
ततो यथोचितं भक्तं भोक्तुमस्मै विचक्षणः ।
लावैणहरिणादीनां रसैर्दद्यात् सुसंस्कृतैः ॥ ७ ॥

मिति बुद्धिविषयमारोहति इत्यनयोर्भिन्नकालविषयत्वादविरोधः। स्रुतेति। स्रुत शब्देनेह विरेचननिर्हृता एवोच्यन्ते अनन्तरं क्षीणेत्यादिना विधेरस्य विरेकविषयत्वेनोपदेशात्। एवंसति दोषास्त्वत्र "विरेचने मूत्रपुरीषपित्तौ-षधकफाः" इति चि० ३३अ० स्मरणात् मूत्रादय एव। स्यादेतत् कतिभाग तत्र प्रमाणानीत्याह भीणेति। अत्र प्रमाणस्य त्रेधाविभागो दोषबलवैवि-ध्येनाध्यवसेयः। प्रस्थेति। द्वे यवाग्वौ देये इत्यर्थः। एतावता दिनत्रयं यवा-गूर्देयेत्यायातं भवति। एतेनैव तिस्र इत्यपि व्याख्यातम्। अत्र "यवागूमुचि-ताद्भक्ताच्चतुर्भागकृतां वदेत्" इत्यनुच्चारणानन्तरम् विलेप्या ओदनस्य चोप-देशाद् यवागूशब्देन पारिशेष्यान् मण्डः पेया वा यदृच्छया पादमात्रेण देये-तिचेत् यद्यपि तदिदमुच्यते किंचिदयमाहारस्याल्पमनुक्रमायैव स्मृयते, मण्डस्य विरूक्षत्वात् पेयायाश्च गुरुत्वाच्च वा प्रायशस्तुलामि नाप्यतोति

हीनमध्योत्तमेष्वेव विरिक्तेषु विधिः स्मृतः ।
एकद्वित्रिगुणः सम्यगाहारस्य क्रमो हितः ॥ ८ ॥
कफपित्ताधिकान् मद्यनित्यान् हीनविशोधितान् ।
पेयाभिष्यन्दयेत् तेषां तर्पणादिक्रमो हितः ॥ ९ ॥
वेदनालाभनियम-शोकवैचित्त्यहेतुभिः ।
नरानुपोषितांश्चापि विरिक्तवदुपाचरेत् ॥ १० ॥
आढ़कार्द्धाढ़कप्रस्थसङ्ख्या श्लेष्मा विरेचने ।
एको विरेकः श्लेष्मान्तो न द्वितीयोऽस्ति कश्चन ॥
बलं यत् त्रिविधं प्रोक्तमतस्तत्र क्रमस्त्रिधा ।
तत्रानुक्रममेकन्तु बलस्थः सकृदाचरेत् ॥
द्विराचरेन्मध्यबलस्त्रीन् वारान् दुर्ब्बलस्तथा ।
केचिदेवं क्रमं प्राहुर्मन्दमध्योत्तमाग्निषु ॥ ११ ॥

मन्यते नहि वरविधानाय कल्पोदाह इति वक्तुं न्याय्यम् । तथाच लघुपूर्व्वं यथोचितभक्तोपयोगविधानत्र यथाक्रमशब्देन सिद्ध्यर्थरक्षितत्वात् सविहस्य मण्ड-मानायावेलायगमेऽपि वेदाक्तो बुद्धिदौर्ब्बल्यादातुरस्यानिष्टापातमगणयन् पेयां पाययितुमिच्छति तर्हि वीरापराधान् मात्रव्यतिपन्नाया पात इत विचिन्तनीयम् ॥ २—८ ॥

कफेत्यादि । तर्पणशब्देनेह युक्तिप्रदत्ता भिषजो लाजपेयामेव पाययेत् नय न-न्तुत्वात् । तर्पणलक्षणाः 'सू० ४६ प०' स्पृष्टत्रमन्यानिवरत्वेनोपदेशे-नाध्यवसितव्यम् । क्रमस्तु पुनः प्रक्रान्तत्वाद् यथाक्रमाद्युपयोगविधिरेव । प्रसङ्गा दुपनीतमनुपदिदिक्षति वेदनेति । वेदना ज्वरादयो रोगविशेषाः अलाभो भक्ष्यभोज्यादीनामप्राप्तिः, नियमो व्रतोपवासादि, वैचित्त्य

संसर्गेण विवृद्धेऽग्नौ दोषकोपभयाद्भजेत् ।
प्राक् स्वादुतिक्तौ स्निग्धाम्ललवणान् कटुकं ततः ॥
स्वाद्वम्ललवणान् भूयः स्वादुतिक्तावतः परम् ।
स्निग्धरूक्षान् रसांश्चैव व्यत्यासात् स्वस्थवत् ततः ॥ १२ ॥
केवलं स्नेहपीतो वा वान्तो यश्चापि केवलम् ।
स सप्तरात्रं मनुजो भुञ्जीत लघु भोजनम् ॥
क्षतः शिराव्यधो यस्य क्षतं यस्य च शोधनम् ।
स ना परिहरेन्मासं यावद्वा बलवान् भवेत् ॥
एकैकस्मिन् परिहरेद्बस्तौ त्र्यहं त्र्यहम् ।
तृतीये तु परीहारे यथायोगं समाचरेत् ॥ १३ ॥

यथा कथञ्चिच्चित्तवैकल्यम् । नन्वस्मिन् शास्त्रे विरेकप्रमाणविशेषेण विरिक्तान् प्रति पेयोपचारो विधीयते तदिदं जिज्ञासामहे वेदनादिभिरुपोषितान् प्रत्यतिदिष्टेऽस्मिन् विरिक्तोपचारे कीदृशकथन्ता निरूप्यते कथं वा शरणमुपगच्छेम इत्याह चाङ्केति । हि यस्मात् एक एव विरेकोऽस्तीत्यायुर्वेदविदो वदन्ति 'विरेचने मूत्रपुरीषपित्तौषधकफाः' इति 'चि० ३३ अ०' अस्य सन्दर्भेण । नेत्याद्यनुवादः । यतो विरेचने चाङ्कादिसंख्या निरूप्यते दोषवशमभिसमीक्ष्येतिशेषः, प्रायेण हि तावन्त एव विरेकाः शेषान्तरेण सम्यगातुरमुपयोजयन्ति सम्यग् विरिक्तलिङ्गेन । आतुराश्च तत्तद्विरेकप्रमाण विशेषमुपजीव्योपयुज्यन्ते आगमतारतम्येन । तदिह विरिक्तान् प्रति प्राक् पेयोपचारो विहित इत्याकूतम् । एवञ्चाङ्कादि तत्तद्विरेकप्रमाणप्रभावभावितदौर्बल्यमापद्यमानेन तत्तत् प्रमाणाधिकारोपचारप्रकारमेवाति देशेऽस्मिन् शरणमुपगच्छेत्याचार्यो भगवानाह वक्ष्यतीति । तन्नोपविष्टे-

तैलपूर्वाममृद्भाण्ड-सवर्णाणो व्रणातुराः ।
स्निग्धशुद्धाश्चिरोगार्त्ता ज्वरातीसारिणश्च ये ॥ १४ ॥
क्रुध्यतः कुपितं पित्तं कुर्य्यात् तांस्तानुपद्रवान् ।
आयास्यतः शोचतो वा चित्तं विभ्रममृच्छति ॥

अपि क्रमः प्राग्वत् यवाग्वाद्युपचारक्रमः स्निग्धेत्युपपन्नं भवति विरिक्तवदु-पाचरेदिति । उक्तमर्थं स्फुटीकृत्यावगमयति तत्रेति । तत्रोपोषितेषु मध्ये यथाक्रमो अनुक्रमं यवाग्वादिक्रमं लक्ष्यीकृत्य एकमिति एकायवागूः एका-विलेपी एकसंयहितयमितमोदनम् एकश्चांशत्रितयमितमोदनं "नपुंसक-मनपुंसकेन इति पा० सू० १।२।६९ एकवत्क्लीवत्वञ्च तदिदमेकं सकृदाचरे-देतेन सर्व्वमवदातम् । मन्दाग्न्यादयोग्युत्तरोत्तरमुपवासेन क्षीणात् क्षीणतमा भवन्ति तदिह तेषु योक्तानुक्रमेणाहारोपयोगमभीप्सतां मतं व्याजेनाङ्गीकरोति केचिदित्यादिना । संसर्गेणेति । संसर्गेण संसर्ज्जनेन यवाग्वाद्युपयोगोपचि-तेन विरेचनेनेति यावत् । तथाच 'स्नेहपीतस्येत्युपक्रम्य कायाग्निर्मन्दोभवति देहिनः इति प्रागुक्तमविप्रतिषिद्धं भवति । स्निग्धाश्चेति । नक्षत्रसा द्रव्याणि हित्वा क्वचिदपि रसानांप्रस्तिरस्तीति रसोपदेशेनैवाश्रयं द्रव्याण्युप-दिष्टान्त इत्यवोचाम मदनाद्येषु मद्यादिकं लवणेषु सिन्ध्वादिकं व्यवच्छेत्तुं स्निग्धेत्युपात्तमित्यध्यवसेयम् । कृत इति । शोधनमत्र वमनं विरेचनञ्चेति ज्ञेयम् । परिहरेदुपद्रवहेतुत्वेन विवर्जितान् क्रोधादीनिति शेषः । एकैकश इति । नेदमिदकृतिवाद्युक्तान्नमन्यम् आचार्य्या हि प्रायः प्रायेणैवं प्रयुञ्जन्ति झटित्यवबोधाय तथाच शा० ५ अ० "एकैकस्यां पादाङ्गुल्यां तिस्र-स्तिस्रः" इत्यादि परीहारे कृते इत्युक्तेयम् । तैलेत्यादि । विशेषणमिदं सर्वत्र विश्वसितत्वेन यत्नतः परिरक्षितव्यत्वमाख्यातुम् । स्निग्धा यथावत् पीतस्नेहा शुद्धा वमनादिना शिष्टदोषाः । शेषाणामिहोपदेशः प्राक-स्त्रिकः । अत्र य इति सर्वत्र समन्वीयते तेषु मध्ये क्रुध्यत इत्येवं व्याख्येयम् ।

मैथुनोपगमाद्घोरान् व्याधीनाप्नोति दुर्मतिः ।
आक्षेपकं पक्षघातमङ्गप्रग्रहमेव च ॥
गुह्यप्रदेशे श्वयथुं कासश्वासौ च दारुणौ ।
शुक्रवच्चापि रुधिरं सरजस्कं प्रवर्त्तते ॥
लभते च दिवास्वप्नात् तांस्तान व्याधीन् कफात्मकान् ।
प्लीहोदरं प्रतिश्यायं पाण्डुतां श्वयथुं ज्वरम् ।
मोहं सदनमङ्गानामविपाकं तथारुचिम् ॥
तमसा चाभिभूतस्तु स्वप्नमेवाभिनन्दति ॥
उच्चैःसम्भाषणाद्वायुः शिरस्यापादयेद्रुजम् ।
आन्ध्यं आघ्रमजिघ्रत्वं बाधिर्य्यं मूकतां तथा ॥
हनुमोक्षमधीमन्यमर्दितञ्च सुदारुणम् ।
नेत्रस्तम्भं निमेषं वा तृष्णां कासं प्रजागरम् ।
लभते दन्तचालञ्च तांस्तांश्चान्यानुपद्रवान् ॥
यानयानात् तु लभते छर्द्दिमूर्च्छाभ्रमक्लमान् ।
तथैवाङ्गग्रहं घोरमिन्द्रियाणाञ्च विभ्रमम् ॥
चिरासनात्तथा स्थानाच्छ्रोण्यां भवति वेदना ॥

तांस्तान् दाहादीनित्यभिसन्धिः । मैथुनोपगमनमूलान् व्याधीन् निवेदयति आक्षेपकमित्यादिना प्रवर्त्तते इत्यन्तेन ग्रन्थसन्दर्भेण । दिवास्वप्नमूलान् व्याधीन् दर्शयति प्लीहेत्यादिनाऽभिनन्दतीत्यन्तेन । गतं स्पष्टमिति शिवः ।

अतिचंक्रमणाद्वायुर्जङ्घयोः कुरुते रुजः ।
सक्थिप्रशोषं शोफं वा पादहर्षमथापि वा ॥
शीतसम्भोगतोयानां सेवा मारुतवृद्धये ।
ततोऽङ्गमर्दविष्टम्भ-शूलाध्मानप्रवेपकाः ॥
वातातपाभ्यां वैवर्ण्यं ज्वरश्चापि समाप्नुयात् ।
विरुद्धाध्यशनान्मृत्युं व्याधिं वा घोरमृच्छति ॥
असात्म्यभोजनं हन्याद् बलवर्णमसंशयम् ॥
अनात्मवन्तः पशुवद् भुञ्जते येऽप्रमाणतः ।
रोगानीकस्य ते मूलमजीर्णं प्राप्नुवन्ति हि ॥ १५ ॥
व्यापदां कारणं वीक्ष्य व्यापत्स्वेतासु बुद्धिमान् ।
प्रयतेतातुरारोग्ये प्रत्यनीकेन हेतुना ॥ १६ ॥
विरिक्तवान्तैर्हरिणैणलावकाः शशाश्च सेव्याः समयूरतित्तिरिः ।
सषष्टिकाश्चैव पुराणशालयस्तथैव मुद्गा लघु यच्च कीर्त्तितम् ॥१७

एवं क्रुध्यन इत्यादिना "अजीर्णं प्राप्नुवन्ति हि" इत्यन्तेन प्राक् चि० १५अ० व्याख्यातमितित्वेनाभ्युपगता आतुरनिमित्ताः पञ्चदश व्यापदो व्याख्याताः । पञ्चदशतोऽधिकानामप्यासां पञ्चदशत्वं क्रोधादिमूलत्वसाधर्म्यात्सम्बोध्यमिति नानुपपत्तिः । प्रकृतमर्थं प्रवर्त्तयन्ति व्यापदामिति । विरिक्तेति । आचार्य्योक्तमिदं हि श्लोको यत् संक्षेपेणोक्तमात्ययिकमर्थं प्रपञ्चेनावगमयतीति पुनरिह विरिक्तशब्द प्रायुक्तेति पौनरुक्त्यदोषोऽत्र नेति । परिभ्रष्टमतिदोषि-तार्थम् । ८—१७ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने आतुरोपद्रवचिकित्सितं नामैकोन-चत्वारिंशोऽध्यायः ॥ ३९ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये चिकित्सितस्थाने आतुरोपद्रवचिकित्सितं नामैकोनचत्वारिंशोऽध्यायः ।

चत्वारिंशोऽध्यायः ।

अथातो धूमनस्यकवलग्रहचिकित्सितं व्याख्यास्यामः ॥१॥

धूमः पञ्चविधो भवति तद्यथा—प्रायोगिकः स्नैहिको वैरेचनः कासघ्नो वामनीयश्चेति ॥ २ ॥

तत्रैलादिना कुष्ठतगरवर्ज्जेन श्लक्ष्णपिष्टेन द्वादशाङ्गुलं शरकाण्डं क्षौमेणाष्टाङ्गुलं वेष्टयित्वा लेपयेत्, एषा वर्त्तिः प्रायो-

---

तत्र पूर्वं 'चि० ३१ । २४ प०' "सम्यग्वान्तमभिसमीक्ष्य" इत्यादिना "पानाभ्यञ्जनगण्डूषनस्य" इत्यादिना च नाममात्रेणोपदिष्टं धूमं नस्यगण्डूषौ च सर्वे भिषजो विज्ञास्यन्ति विज्ञाय च यथावत् प्रयोक्तुमर्हन्ति तदिदानीं तानेव प्रकृत्य किञ्चिद्वक्ष्याम इत्यभिसन्धाय धूमनस्यकवलग्रहचिकित्सितमधिकरोति अथात इत्यादिना । गण्डूषः कवलग्रहश्चेति पर्य्यायौ ॥ १ ॥

धूम इति । पञ्चविधत्वमत्र पेयत्वेनेति, धूमस्तावत् प्रायः पुनरेकविधस्य

णिभि:]। स्नेहफलसारमधूच्छिष्टसर्ज्जरसगुग्गुलुप्रभृतिभिः स्नेहमिश्रैः स्नेहने। शिरोविरेचनद्रव्यैर्वैरेचने। बृहती-कण्टकारिका-त्रिकटुक-कासमर्द-हिङ्गुदी-त्वङ्मनःशिला-च्छिन्नरुहा-कर्कटशृङ्गीप्रभृतिभिः कासघ्नैश्च कासघ्ने। स्नायुचर्मखुरशृङ्गकर्कटकास्थिशुष्कमत्स्यवल्लूरकृमिप्रभृतिभिर्वामनीयैश्च वामनीये ॥ ३ ॥

तत्र वस्तिनेत्रद्रव्यैर्धूमनेत्रद्रव्याणि व्याख्यातानि भवन्ति ॥४॥

धूमनेत्रन्तु कनिष्ठिकापरिणाहम्, अग्रे कलायमात्रं स्रोतः, मूलेऽङ्गुष्ठपरिणाहं, धूमवर्त्तिप्रवेशस्रोतः, अङ्गुलान्यष्टचत्वारिंशत् प्रायोगिके। द्वात्रिंशत् स्नेहने। चतुर्व्विंशतिर्वैरेचने। षोड़शाङ्गुलं कासघ्ने वामनीये च। एते अपि कोलास्थिमात्रच्छिद्रे भवतः। व्रणनेत्रमष्टाङ्गुलं व्रणधूपनार्थं कलायपरिमण्डलं कुलत्थवाहिस्रोत इति ॥ ५ ॥

अथ सुखोपविष्टः सुमना ऋज्वधोदृष्टिरतन्द्रितः स्नेहाक्तां प्रदीप्तायां वर्त्तिं नेत्रस्रोतसि प्रणिधाय धूमं पिबेत् ॥ ६ ॥

विवक्षितत्वेऽपि नाभ्युपगतव्यानन्तावदापद्येत। ... 'सू० ३८अ०' द्रष्टव्यः। अत्र हि व्यपगतशरकाण्डाम ... पादाथ्यें ... अतुरङ्गुलं काण्डं सुष्टिबन्धं निवध्य वर्त्तिरुपसाध्यते तदिदमुच्यते अष्टाङ्गुलमिति। स्नेहफलानि तिलातसीप्रभृतीनि स्नेहसाराश्च सरलदेवदार्व्वादयः। प्रभृतिग्रहणात् श्रीवेष्टकादीनामादेशः। शिरोविरेचनानि 'सू० ३८अ०' निवेदितानि। एते इति। तुम्बरस्थानाधिष्ठानेनापिधर्म्मेणैव पूर्व्वमाचवनितयाभिमतपरे द्वे नेत्रे

मुखेन तं पिबेत् पूर्व्वं नासिकाभ्यां ततः पिबेत् ।
मुखपीतं मुखेनैवं वमेत् पीतञ्च नासया ॥
मुखेन धूममादाय नासिकाभ्यां न निर्हरेत् ।
तेन हि प्रतिलोमेन दृष्टिस्तव निहन्यते ॥ ७ ॥

विशेषतस्तु प्रायोगिकं घ्राणेनाददीत, स्नेहनं मुखनासाभ्यां, नासिकया वैरेचनं, मुखेनैवेतरौ ॥ ८ ॥

तत्र प्रायोगिकीं वर्त्तिं व्यपगतशरकाण्डां निवातातपशुष्कामङ्गारेष्ववदीप्य नेत्रमूलस्रोतसि प्रयुज्य धूममाहरेति ब्रूयात् । एवं स्नेहनं वैरेचनिकञ्च कुर्य्यादिति । इतरयोर्व्यपेतधूमोङ्गारे स्थिरे समाहिते शरावे प्रक्षिप्य वर्त्तिं मूलच्छिद्रेणान्येन शरावेण पिधाय तस्मिंश्छिद्रे नेत्रमूलं संयोज्य धूममासेवेत । प्रशान्ते धूमे वर्त्तिमवशिष्टां प्रक्षिप्य पुनरपि धूमं पाययेदादोषविशुद्धेः । एष धूमपानोपायविधिः ॥ ९ ॥

तत्र शोक-श्रम-भयामर्षौष्ण्य-विष-रक्तपित्त-मद-मूर्च्छा-दाह-पिपासा-पाण्डुरोग-तालुशोष-च्छर्द्दि-शिरोऽभिघातोद्गारापतर्पित-तिमिर-प्रमेहोदराध्मानोर्द्ध्ववातार्त्ता बाल-वृद्ध-दुर्ब्बलविरिक्तास्थापित-जागरित-गर्भिणी-रुक्ष-क्षीण-क्षतोरस्क-मधुघृत दधि-

---

छिद्रप्रमाणविशेषेण प्रयोगसौष्ठवमभिसमीक्ष्य । धूमपानप्रकारमुपदिदिक्षति पिबेति । इतरौ कासघ्नवामनीयौ ॥ २—८ ॥

सामान्येनोक्तमर्थं तदपवादं विधिमाह तत्रेति । धूमं पुनर्निबध्नाति

दुग्धमत्स्यमद्ययवागूपीताल्पकफाश्च न धूममासेवेरन् ॥ १० ॥

अकालपीतः कुरुते भ्रममूर्च्छाशिरोरुजः ।
घ्राणश्रोत्राक्षिजिह्वानामुपघातञ्च दारुणम् ॥ ११ ॥

आद्यास्तु त्रयो धूमा द्वादशसु कालेषूपादेयाः । तद्यथा— क्षुत-दन्तप्रक्षालन-नस्यस्नानभोजनदिवास्वप्नमैथुनच्छर्दिमूत्रोच्चाररुषितशस्त्रकर्मान्तेष्विति । तत्र मूत्रोच्चारक्षवथुरुषितमैथुनान्तेषु स्नैहिकः । स्नानच्छर्दनदिवास्वप्नान्तेषु वैरेचनः । दन्तप्रक्षालननस्यस्नानभोजनशस्त्रकर्मान्तेषु प्रायोगिक इति ॥ ॥ १२ ॥

तत्र स्नैहिको वातं शमयति स्नेहादुपलेपाच्च । वैरेचनः श्लेष्माणमुत्क्लेश्यापकर्षति रौक्ष्यात् तैक्ष्ण्याद्वैशद्याच्च । प्रायोगिकः श्लेष्माणमुत्क्लेशयति, उत्क्लिष्टञ्चापकर्षति साधारणत्वात् पूर्व्वाभ्यामिति ॥ १३ ॥

भवति चात्र ।

नरो धूमोपयोगाच्च प्रसन्नेन्द्रियवाङ्मनाः ।
दृढकेशद्विजश्मश्रुसुगन्धिविशदाननः ॥ १४ ॥

कास-श्वासारोचकास्योपलेप-स्वरभेद-मुखस्राव-क्षवथु-तन्द्रा-निद्रा-हनुमन्यास्तम्भ-पीनस-शिरोरोग-कर्णाक्षिशूल-वात-कफ-निमित्ताश्चास्य मुखरोगा न भवन्ति ॥ १५ ॥

तत्रेति । पवनपित्तमपतर्पणं जाड्यमित्येतत् । दूषितो दुष्टः ॥ ८—१५ ॥

तस्य योगायोगातियोगा विज्ञातव्याः । तत्र योगो रोगप्रशमनः, अयोगो रोगाप्रशमनः । तालुगलशोषपरिदाह-पिपासामूर्च्छा-भ्रम-मद-कर्णाक्षिदृष्टिनासारोग-दौर्बल्यान्यतियोगो जनयति ॥ १६ ॥

प्रायोगिकं त्रींस्त्रीनुच्छ्वासानाददीत, मुखनासिकाभ्याञ्च पर्य्यायांस्त्रींश्चतुरो वेति । स्नैहिकं यावदश्रुप्रवृत्तिः । वैरेचनिकमादोषदर्शनात् । तिलतण्डुलयवागूपीतेन पातव्यो वामनीयः । ग्रासान्तरेषु कासघ्न इति । व्रणधूमं शरावसम्पुटोपनीतेन नेत्रेण व्रणमानयेत्, धूपनाद्वेदनोपशमो व्रणवैशद्यमास्रावोपशमश्च भवति ॥ १७ ॥

विधिरेष समासेन धूमस्याभिहितो मया ।
नस्यस्यातः प्रवक्ष्यामि विधिं निरवशेषतः ॥ १८ ॥

औषधमौषधसिद्धो वा स्नेहो नासिकाभ्यां दीयत इति नस्यम् । तद्द्विविधम्—शिरोविरेचनं स्नेहनञ्च । तद्द्विविधमपि पञ्चधा । तद्यथा—नस्यं, शिरोविरेचनं, प्रतिमर्शः, अवपीड़ः, प्रधमनञ्च । तेषु नस्यं प्रधानं शिरोविरेचनञ्च ।

तस्येत्यादि । त्रिभिस्त्रिभिराक्षेपमोक्षैस्त्रिः त्रिः पिवेदित्यावेदयितुमिदमुच्यते प्रायोगिकमिति । मुखनासिकाभ्यामाददीत गृह्णीयात् पिवेदिति यावत् । पर्य्यायानुक्रमेणाहरणात् । अत्र "धूमयोग्येऽपि देहे वै शिरोघ्राणाक्षिसंश्रये घ्राणेनास्येन कण्ठस्थे" इत्यात्रेयानुशासनमनुसन्धेयम् । उपनीतेन संवृतेन आनयेत् प्रापयेत् ॥ १६—१८ ॥

स्नेहविकल्पः प्रतिमर्शः, शिरोविरेचनविकल्पोऽवपीडः प्रधमनञ्च। ततो नस्यशब्दः पञ्चधा निपातितः। तत्र यः स्नेहनार्थं शून्यशिरसां ग्रीवास्कन्धोरसां बलजननार्थं दृष्टिप्रसादजननार्थं वा स्नेहो विधीयते तस्मिन् वैशेषिको नस्यशब्दः। तत्तु नस्यं देयं वाताभिभूते शिरसि दन्तकेशश्मश्रुप्रपातदारुणकर्णशूलकर्णक्ष्वेडतिमिरस्वरोपघातनासारोगास्यशोषावबाहुकाकालजवलीपलितप्रादुर्भावदारुणप्रबोधेषु वातपैत्तिकेषु मुखरोगेष्वन्येषु च वातपित्तहरद्रव्यसिद्धेन स्नेहेनेति ॥ १९ ॥

शिरोविरेचनं श्लेष्मणाभिव्याप्ततालुकण्ठशिरसामरोचकशिरोगौरवशूलपीनसार्धावभेदकक्रिमिप्रतिश्यायापस्मारगन्धाज्ञानेष्वन्येषु चोर्ध्वजत्रुगतेषु कफजेषु विकारेषु शिरोविरेचनद्रव्यैस्तत्सिद्धेन वा स्नेहेनेति ॥ २० ॥

तदेतद्द्विविधमभुक्तवतोऽन्नकाले, पूर्वाह्णे श्लेष्मरोगिणां मध्याह्ने पित्तरोगिणाम्, अपराह्णे वातरोगिणाम् ॥ २१ ॥

अथ पुरुषाय शिरोविरेचनीयाय दन्तकाष्ठधूमपानाभ्यां विशुद्धवक्त्रस्रोतसे पाणितापपरिस्विन्नमृदितगलकपोलललाट-

---

ध्मापनमित्यादि। ध्मापनं पिप्पलीविडङ्गापामार्गादिबीजचूर्णम्। दारुणो दारुणकः [illegible] भेदः। अन्येष्वितरेषु वातपैत्तिकशिरोरोगादिष्वित्यर्थः। अत्र शिरःशूलग्रहणेनैवार्धावभेदकस्योपलब्धेऽपि पृथगुपादानं यत्र विशेषेणोपयोगित्वख्यापनार्थम्। क्रमयश्चात्र शिरोगता एव बोद्धव्याः। शिरोविरेचनद्रव्यैः "सू० २६ अ०" निर्दिष्टैः ॥ १९—२० ॥

तदेतदिति द्विविधं नस्यं शिरोविरेचनमित्यर्थः। अन्नकाले अभुक्तवत इति

प्रदेशाय वातातपरजोहीने वेश्मन्युत्तानशायिने प्रसारितकरचरणाय किञ्चित् प्रविलम्बितशिरसे वस्त्राच्छादितनेत्राय वामहस्तप्रदेशिन्यग्रोन्नमितनासाग्राय विशुद्धस्रोतसि दक्षिणहस्तेन स्नेहमुष्णानुतप्तं रजतसुवर्णताम्रमृत्पात्रशुक्तीनामन्यतमस्थं शुक्त्या पिचुना वा सुखोष्णं स्नेहमद्रुतमासिञ्चेदव्यवच्छिन्नधारं यथा नेत्रे न प्राप्नोति ॥ २२ ॥

स्नेहेऽवसिच्यमाने तु शिरो नैव प्रकम्पयेत् ।
न कुप्येन्न प्रभाषेच्च न क्षुयान्न हसेत् तथा ॥
एतैर्हि विहतः स्नेहो न सम्यक् प्रतिपद्यते ।
ततः कासप्रतिश्याय-शिरोऽक्षिगदसम्भवः ॥ २३ ॥

तस्य प्रमाणमष्टौ विन्दवः प्रदेशिनीपर्व्वद्वयनिःसृताः प्रथममात्रा, द्वितीया शुक्तिः, तृतीया पाणिशुक्तिरित्येतास्तिस्रो मात्रा यथाबलं प्रयोज्याः स्नेहनस्यं नचोपगिलेत् कथञ्चिदपि ॥२४॥

सामान्येनोक्तमर्थं दोषविशेषमभिसमीक्ष्य विशिनष्टि पूर्व्वार्द्ध इति । यथेति । अत्र शिरोविरेचनीयायेति शिरोविरेचनशब्दोऽजहत्स्वार्थया लक्षणया नस्यमपि लक्षयतीत्यवश्यं वक्ष्यमाणमनन्तरं तस्येत्यादिना तदप्यधिकृत्योपदेशात् । प्रविलम्बितेति । निषिक्तस्य स्नेहस्य सम्यक् शिरोन्तर्गमनार्थं, प्रविलम्बितशिरस्त्वन्तु खट्वोपधानोपरि विन्यस्तपृष्ठोर्द्ध्वप्रदेशत्वेन तथाविधेनान्येनोपायेन वा कार्य्यमित्युपदेशः । वस्त्राच्छादितनेत्रायेति सर्व्वथा नेत्रे स्नेहपातशङ्कामपाकरोति । तस्येति । तस्य स्नेहनस्यस्येति नैवं परमतः "स्नेहनस्यं नचोपगिलेत्" इत्याद्युपदेशात् । शुक्तिरिति शङ्खिन्यो नाम, ते द्वे पाणिशुक्तिः । तथाचाहुः "द्वात्रिंशद्बिन्दवस्तु शुक्तिरित्यभिधीयते । द्वे शुक्ती

शृङ्गाटकमभिप्लाव्य निरेति वदनाद्यथा।

कफोत्क्लेशभयाच्चैव निष्ठीवेदविधारयन्॥ २५॥

दत्ते च पुनरपि संस्वेद्य गलकपोलादीन् धूममासेवेत। भोजयेच्चैनमनभिष्यन्दि, ततोऽस्याचारिकमादिशेत्। रजोधूम-स्नेहातपमद्यद्रवपानशिरःस्नानातियानक्रोधादीनि च परिहरेत्॥ २६॥

तस्य योगातियोगायोगानां विज्ञानं भवति।

लाघवं शिरसो योगे सुखस्वप्नप्रबोधनम्।

विकारोपशमः शुद्धिरिन्द्रियाणां मनःसुखम्॥

कफप्रसेकः शिरसो गुरुतेन्द्रियविभ्रमः।

लक्षणं मूर्ध्न्यतिस्निग्धे रूक्षं तत्रावचारयेत्॥

अयोगे चैव वैगुण्यमिन्द्रियाणाञ्च रूक्षता।

रोगाशान्तिश्च तत्रेष्टं भूयो नस्यं प्रयोजयेत्॥ २७॥

चत्वारो बिन्दवः षड् वा तथाष्टौ वा यथाबलम्।

शिरोविरेकस्नेहस्य प्रमाणमभिनिर्दिशेत्॥ २८॥

नस्ये शौच्युपदिष्टानि लक्षणानि प्रयोगतः।

शुद्धहीनातिसंज्ञानि विशेषाच्छास्त्रचिन्तकैः॥

लाघवं शिरसः शुद्धिः स्रोतसां व्याधिनिर्जयः।

चित्तेन्द्रियप्रसादश्च शिरसः शुद्धिलक्षणम्॥

चाविशुद्धिश्च" इति। शृङ्गाटक शब्देन "शा० ६अ०" उक्तेषु चतुर्षु शृङ्गाटकेषु मध्ये प्राणाश्रितमेव लक्ष्योऽयम्, यथा निरेति तथा कुर्यादिति शेषः॥ २१—२७॥

शिरोविरेकस्नेहप्रमाणादिकमुपदिशन्ति चत्वार इति। नस्ये नस्य-

कण्डूपदेहौ गुरुता स्रोतसां कफसंस्रवः ।
मूर्ध्नि हीनविशुद्धे तु लक्षणं परिकीर्त्तितम् ॥
मस्तुलुङ्गागमो वातवृद्धिरिन्द्रियविभ्रमः ।
शून्यता शिरसश्चापि मूर्ध्नि गाढविरेचिते ॥ २९ ॥
हीनातिशुद्धे शिरसि कफवातघ्नमाचरेत् ।
सम्यग्विशुद्धे शिरसि सर्पिर्नस्यं निषेचयेत् ॥
एकान्तरं द्व्यन्तरं वा सप्ताहं वा पुनःपुनः ।
एकविंशतिरात्रं वा यावद्वा साधु मन्यते ॥
मारुतेनाभिभूतस्य वात्यन्तं यस्य देहिनः ।
द्विकालञ्चापि दातव्यं नस्यं तस्य विजानता ॥ ३० ॥

अवपीडस्तु शिरोविरेचनवदभिष्यन्दसर्पदष्टविसंज्ञेभ्यो दद्या-
च्छिरोविरेचनद्रव्याणामन्यतममवपीड्यावपिष्य । चेतोविकार-
कृमिविषाभिपन्नानां चूर्णं प्रधमेत् । शर्करेक्षुरसक्षीरघृतमांस-
रसानामन्यतमं क्षीणानां शोणितपित्ते च निदध्यात् ॥ ३१ ॥

कृशदुर्बलभीरूणां सुकुमारस्य योषिताम् ।
कृताः स्नेहाः शिरःशुद्ध्यै कल्केभ्यो यथा हिताः ॥ ३२ ॥

सामान्ये तोऽप्युपदिष्टानि पूर्व्वाचार्य्यैरिति शेषः । किन्तावत्तानीत्याह लाघव-
मिति । प्रतिकरोतीति हीनेति । कफवातघ्नमिति यथाक्रममन्वेयम् । मारु-
तेनेति अत्यन्तं पाणिपादमपि वाति गच्छति वायुरिति शेषः । नस्यमितिप्रकृत-
त्वात् सर्पिषेत्यवगन्तव्यम् । सम्प्रत्यवपीडप्रधमने अधिकरोति अवेति ।
शर्करेति । अत्र क्षीणानामिति विशेषणं बलवतां नासागतशोणित-
पित्तिनां शर्करापानकादिनस्योपयोगेन शोणितस्यावग्रहमाचरति ।

नस्येन परिहर्त्तव्यो भुक्तवानपतर्पितोऽत्यर्थतरुणप्रतिश्यायी गर्भिणी पीतस्नेहोदकमद्यद्रवोऽजीर्णी दत्तवस्तिः क्रुद्धो गरार्त्तस्तृषितः शोकाभिभूतः श्रान्तो बालो वृद्धो वेगावरोधितः शिरःस्नातुकामश्चेति। अनार्त्तवे चाभ्रे नस्यधूमौ परिहरेत्। तत्र हीनातिमात्रातिशीतोष्णसहसाप्रदानादतिप्रविलम्बितशिरसश्छिक्कतो विचलतोऽभ्यवहरतो वा प्रतिषिद्धप्रदानाच्च व्यापदो भवन्ति तृष्णोद्गारादयो दोषनिमित्ताः क्षयजाश्च ॥ ३३ ॥

भवतश्चात्र।

नस्ये शिरोविरेके च व्यापदो द्विविधाः स्मृताः।
दोषोत्क्लेशात् क्षयाच्चैव विज्ञेयास्ता यथाक्रमम् ॥ ३४ ॥
दोषोत्क्लेशनिमित्तांस्तु जयेच्छमनशोधनैः।
क्षयनिमित्तांस्तु यथास्वं बृंहणैर्हितैः ॥ ३५ ॥

प्रतिमर्शश्चतुर्दशसु कालेषूपादेयः। तद्यथा—तल्पोत्थितेन प्रक्षालितदन्तेन गृहान्निर्गच्छता व्यायामव्यवायाध्वपरिश्रान्तेन मूत्रोच्चारकवलाञ्जनान्ते भुक्तवता छर्द्दितवता दिवास्वप्नोत्थितेन सायञ्चेति ॥ ३६ ॥

तत्र तल्पोत्थितेनासेवितः प्रतिमर्शो रात्रावुपचितनासास्रोतोगतं मलमुपहन्ति मनःप्रसादञ्च करोति। प्रक्षालितदन्तेनासेवितो दन्तानां दृढतां वदनसौगन्ध्यञ्चापादयति।

क्षयेति। गरार्त्तस्तृषितैः शर्करादिभिरित्यध्यवसेयम्। कल्कस्तु पक्वादोष ... एव ...। कृषेति साहाय्यार्थमापचाप: ... दैव वर्त्तं सामर्थ्यमवगमयति। छिक्कितो ... इत्यर्थः ॥ २७—३३ ॥

दृष्टाभिर्निर्मक्षताऽऽसेवितो नासास्रोतसः क्लिन्नतया रजो धूमो वा नाबाधते । व्यायाममैथुनाध्वनश्च परिश्रान्तेनासेवितः श्रम-मुपहन्ति । मूत्रोच्चारान्ते वा सेवितो दृष्टेर्गुरुत्वमपनयति । कवलाञ्जनान्ते वा सेवितो दृष्टिं प्रसादयति । भुक्तवताऽऽसेवितः स्रोतसां विशुद्धिं लघुताञ्चापादयति । वान्तेनासेवितः स्रोतो-विलग्नं श्लेष्माणमपोह्य भक्ताकाङ्क्षामापादयति । दिवास्वप्नोत्थि-तेनासेवितो निद्राशेषं गुरुत्वं मलञ्चापोह्य चित्तैकाग्र्यं जन-यति । सायञ्चासेवितः सुखनिद्राप्रबोधश्चेति ॥ ३७ ॥

ईषदुच्छिङ्घतः स्नेहो यावद्वक्त्रं प्रपद्यते ।
नस्ये निषिक्तं तं विद्यात् प्रतिमर्शं प्रमाणतः ॥ ३८ ॥
नस्येन रोगाः शाम्यन्ति नराणामूर्द्ध्वजत्रुजाः ।
इन्द्रियाणाञ्च वैमल्यं कुर्य्यादास्यं सुगन्धि च ॥
हनुदन्तशिरोग्रीवा-त्रिकबाहूरसां बलम् ।
वलीपलितखालित्यव्यङ्गानाञ्चाप्यसम्भवः ॥ ३९ ॥
तैलं कफे सवाते स्यात् केवले पवने वसाम् ।
दद्यात् सर्पिः सदा पित्ते मज्जानञ्च समारुते ॥
चतुर्व्विधस्य स्नेहस्य विधिरेष प्रकीर्त्तितः ।
श्लेष्मस्थानाविरोधित्वात् तेषु तैलं विधीयते ॥ ४० ॥

तैल मिति । केवले शुद्धे । श्लेष्मेति । पूर्व्वं हि वमनस्य कफस्थान-गतस्य वातस्य पित्तस्य च कफवत् प्रतीकारो विहितस्तदिदमुच्यते श्लेष्मस्थाना-विरोधित्वादिति । शिरोविरेचनस्नानमिति प्रधानम् । तेषु केवलवातादिषु ।

अतः परं प्रवक्ष्यामि कवलग्रहणे विधिम् ।
चतुर्विधः कवलः स्नेही प्रसादी शोधिरोपणौ ॥ ४१ ॥
स्निग्धोष्णैः स्नैहिको वाते स्वादुशीतैः प्रसादनः ।
पित्ते कट्वम्ललवणै रूक्षोष्णैः शोधनः कफे ॥
कषायतिक्तमधुरैः कटूष्णै रोपणो व्रणे ।
चतुर्विधस्य चैवास्य विशेषोऽयं प्रकीर्त्तितः ॥ ४२ ॥

तत्र त्रिकटुकवचासर्षपहरीतकीकल्कमालोड्य तैलशुक्तसुरामूत्रक्षारमधूनामन्यतमेन सलवणमभिप्रतप्तमुपस्विन्नमर्दितगलकपोललाटप्रदेशो धारयेत् ॥ ४३ ॥

मुखं सञ्चार्य्यते या तु मात्रा सा कवले स्मृता ।
असञ्चार्य्या तु या मात्रा गण्डूषः स प्रकीर्त्तितः ॥ ४४ ॥

तावच्च धारयितव्योऽनन्यमनसोन्नतदेहेन यावद्दोषपरिपूर्णकपोलत्वं नासास्रोतोनयनपरिस्रावश्च भवति। तदा विमोक्तव्यः पुनश्चान्यो ग्रहीतव्य इति ॥ ४५ ॥

एवं स्नेहपयःक्षौद्र-रसमूत्राम्लसंभृताः ।
कषायोष्णोदकाभ्याञ्च कवला दोषतो हिताः ॥ ४६ ॥
व्याधेरपचयस्तुष्टिर्वैशद्यं वक्त्रलाघवम् ।
इन्द्रियाणां प्रसादश्च कवले शुद्धिलक्षणम् ॥ ४७ ॥
हीने जाड्यकफोत्क्लेशावरसज्ञानमेव च ।
अतियोगान्मुखे पाकः शोषतृष्णारुचिक्लमाः ।
शोधनीयविशेषेण भवन्त्येवं न संशयः ॥ ४८ ॥

तिला नीलोत्पलं सर्पिः शर्करा क्षीरमेव च ।
सक्षौद्रो दग्धवक्त्रस्य गण्डूषो दाहनाशनः ॥ ४९ ॥
कवलस्य विधिर्ह्येष समासेन प्रकीर्त्तितः ॥ ५० ॥
विभज्य भेषजं बुद्ध्या कुर्व्वीत प्रतिसारणम् ।
कल्को रसक्रिया क्षौद्रं चूर्णश्चेति चतुर्व्विधम् ॥
अङ्गुल्यग्रप्रणीतन्तु यथास्वं मुखरोगिणाम् ।
तस्मिन् योगमयोगञ्च कवलोक्तं विभावयेत् ॥
तानेव शमयेद्व्याधीन् कवलो यानपोहति ।
दोषघ्नमनभिष्यन्दि भोजयेच्च तथा नरम् ॥ ५१ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
धूमनस्यकवलग्रहचिकित्सितं नाम
चत्वारिंशोऽध्यायः ॥ ४० ॥

इति श्रीसुश्रुताचार्य्यविरचित आयुर्व्वेदशास्त्रे सुश्रुतसंहितायां
चिकित्सितस्थानं समाप्तम् ॥ ४ ॥

तावदिति । विमोक्षव्यत्ययव्यः । शोधनीयविशेषेण समासादितः कवल-द्रव्ययोर्व्यतारतम्येन तिला इति । दग्धवक्त्रस्य चूर्णादिनेति शेषः । परिशिष्टं निगदव्याख्यातम् ॥ ३४ - ४५ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये चिकित्सितस्थाने धूमनस्यकवलग्रहचिकित्सितं नाम चत्वारिंशोऽध्यायः ॥

समाप्तञ्चेदं चिकित्सितस्थानभाष्यम् ।